श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवेङ्कटाध्वरि विरचितम्

॥ श्रीलक्ष्मीसहस्रम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1	प्रारम्भस्तबकः प्रथमः	3
2	प्रादुर्भावस्तबकः द्वितीयः	8
3	वक्षस्स्थलावस्थानस्तबकः तृतीयः	12
4	कारुण्यस्तबकः चतुर्थः	17
5	कटाक्षस्तबकः पञ्चमः	21
6	यत्नस्तबकः षष्ठः	32
7	मङ्गलाख्यस्तबकः सप्तमः	39
8	सौन्दर्यस्तबकः अष्टमः	42
9	शृङ्गारस्तबकः नवमः	82
10	ऐश्वर्यस्तबकः दशमः	91
11	क्षान्तिस्तबकः एकादशः	95
12	उत्सवस्तबकः द्वादशः	101
13	वदान्यस्तबकः त्रयोदशः	110
14	यमकस्तबकः चतुर्दशः	114
15	नक्षत्रमालास्तबकः पञ्चदशः	124
16	चित्रचरित्रस्तबकः षोडशः	129
17	नामवैभवस्तबकः सप्तदशः	132
18	धामवैभवस्तबकः अष्टादशः	140
19	अभयप्रदानस्तबकः एकोनविंशः	147

20	देवतान्तरपरिसङ्ख्यास्तबकः विंशः	**153**
21	दशावतारस्तबकः एकविंशः	**159**
22	चित्रस्तबकः द्वाविंशः	**166**
23	सङ्कीर्णस्तबकः त्रयोविंशः	**174**
24	निर्वेदस्तबकः चतुर्विंशः	**180**
25	शरणागतिस्तबकः पञ्चविंशः	**183**

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ प्रारम्भस्तबकः प्रथमः ॥

लक्ष्मी चरणराजीवलाक्षालक्षित वक्षसे।
विश्वसर्गादिलीलाय वेङ्कटब्रह्मणे नमः ॥ **1.1** ॥ 1

असदृशमरुणाब्जदृशं प्रस्विन्नपयोधरस्फुरन्मूर्तिम्।
मनसि दधीमहि सततं मातारं मातरं च लोकानाम् ॥ **1.2** ॥ 2

प्रातरम्बुजविडम्बिलोचनां मातरं त्रिजगतामुपास्महे।
शीतरम्यकरुणावलोकनैः या तरङ्गयति मङ्गलानि नः ॥ **1.3** ॥ 3

आचक्रायुधमा च मामकगुरोराचार्यवर्गं भजे
    मध्यस्थैरिह नाथयामुनमुखैर्मान्यैः सनाथीकृतम्।
क्षीराम्भोधिसुतापयोधरपयः पूरा इवोदित्वराः
    यद्वाचां विसरा जगन्ति नितरामुज्जीवयन्ति स्वयम् ॥ **1.4** ॥ 4

भुवनजननीं तुष्टूषन्ती पुरो रसनाऽधुना
    रचयति नमो वाचे प्राचेतसाननजन्मने।
जनकतनया दिव्योदन्तामृत द्रव वर्षिणीं
    जगति कवयः श्राव्यं काव्यं गृणन्त्यवलम्ब्य याम् ॥ **1.5** ॥ 5

पराशरमुनीशितुः प्रणतिकर्म कुर्मस्तराम्
    अहीनगुणशोभितैरमृतसाधनोत्कण्ठिभिः।
यदीयकृतिसिन्धुना विमथितेन यत्नाद्बुधैः
    प्रकाशमिह नीयते परमपूरुषप्रेयसी ॥ **1.6** ॥ 6

दद्यादद्य कुदृष्टिसर्पगरुडस्त्रय्यन्तविद्यागुरुः
　　श्रीमान् वेङ्कटनाथदेशिकमणिः श्रेयांसि भूयांसि नः।
दत्से दृष्टिलवेन देवि भजतां या त्वं विभुत्वं रमे
　　तस्या हन्त तवापि येन विभुता सुष्ठु प्रतिष्ठापिता॥ **1.7**॥ 7

शीतज्योतिः शिखरिनगरीसागराम्भोधरादेः
　　जल्पं जल्पं जलधितनये हन्त मिथ्यासमृद्धिम्।
निर्विण्णा मे ननु भगवती भारतीयं त्वदीयं
　　स्तोत्रं चित्रं स्फुरति जननि स्वैरमारब्धुकामा॥ **1.8**॥ 8

मदान्धक्षोणीपत्यपसदमनः प्रीणनकृते
　　नमस्कारान् ब्रूमो भगवति चमत्कारवचसे।
विधात्रीमानन्दं विपुलमिह चाऽमुत्र च तव
　　स्तुतिं प्रस्तौत्वंहोभरनिरसनायाऽद्य रसना॥ **1.9**॥ 9

तत्तादृग्रचनाविदग्धरसनाकण्डूतिनिर्धूतये
　　केचिन्नीचविचारगोचरगिरो गृध्नन्ति मिथ्याकृतिम्।
स्वं वाग्ब्रह्म पुराणजिह्मगशिरः कम्पावहं पावनी
　　कर्तुं देवि वयं पुनस्तव कथारम्भाय जृम्भामहे॥ **1.10**॥ 10

शय्या शब्दगुणानुशासनचणा छन्दोमयं वाहनं
　　सोदर्यस्तु कलानिधिस्तव रमे सूनुश्च वाणीपतिः।
तस्यास्ते पुरतः स्तवं मितमतिः प्राज्ञोचितं श्रावयन्
　　गुञ्जाविक्रयिणः श्रयामि पदवीं माणिक्यपुञ्जापणे॥ **1.11**॥ 11

कवीनां प्रत्नानां कबळितसुधास्वादिममदैः
　　अनूचीनैः स्तोत्रैः श्रुतिजडिमभाजो जननि ते।
अजामित्वायैव स्तवमिममकूपारतनये
　　वियाता ग्रथ्नीमो विहसनपदैः कैरपि पदैः॥ **1.12**॥ 12

विद्वद्भ्यः स्वदमानया यदनया विश्वाम्ब नाधीयते
    स्तुत्या ते सुखमज्ञचेतसि दृषत्प्राये न दूये ततः।
गान्धर्वी हि पुरन्दरादिशिरसामान्दोलयित्री चिरं
    गीतिः सा बधिरान्न नन्दयति चेत् किं छिन्नमेतावता॥ **1.13**॥ 13

वक्तुं नैव चतुर्विधा श्रुतिरसावीष्टे न चाष्टश्रुतिः
    नो चक्षुः श्रुतिरप्यहो तव गुणान् नारायणप्रेयसि।
स्तोतुं त्वामपि तामहं व्यवसितो दूरं हनूमन्मुखैः
    दुर्लङ्घ्यं जलधिं तरीतुमनसः पङ्गोर्दधे चापलम्॥ **1.14**॥ 14

गर्वद्दुर्वसुधापतिस्तुतिपरव्याहारकूहान्धता
    निर्विण्णाशय एष वेङ्कटकविः पङ्केरुहावासिनि।
अद्य त्वद्गुणवर्णनामृतरसैरानन्दितुं जृम्भते
    चिञ्चापर्णरसावसन्नरसनः पुण्ड्रेक्षुसारैरिव॥ **1.15**॥ 15

नाहं जाने नवरसगतीर्नार्थमक्षुण्णमन्यैः
    नालङ्कारानपि च न वचोगुम्भगम्भीरिमाणम्।
स्तोतुं मातस्तदपि भवतीं त्यक्तलज्जो यतेऽहं
    मन्तुं किं तु प्रथितकरुणा क्षन्तुमर्हस्यमुं त्वम्॥ **1.16**॥ 16

चक्षुष्मन्तश्चरणकमले चक्षुषा श्रोत्रवन्तः
    श्रोत्रे भूमेर्जननि जगतां जन्मवन्तोऽपि न स्मः।
वक्त्राण्यासन् भगवति न षट् पञ्च चत्वारि वा नः
    कस्मादस्मान्न हसतु जनः स्तोष्यतस्त्वद्गुणौघम्॥ **1.17**॥ 17

अभूमिस्त्वद्भूमा जननि जरतीनामपि गिराम्
    असौ कस्मादस्मादृशकृशमनीषोक्तिविषयः।
अशक्यानामौर्वाग्निभिरपि निपातुं निधिमपाम्
    अपारं तं पातुं मशकशिशुकः किं प्रभवति॥ **1.18**॥ 18

प्रकृष्यन्तामस्मत्परमितरकाले विधिमुखाः
वयं मातस्ते वा तव नुतिदशायां समधियः।
निकर्षोत्कर्षौ स्तां निशि तु शशिखद्योतमहसोः
दिवा को वा भेदो दिनकरकरव्रातजटिले ॥ **1.19** ॥ 19

वाग्भिः कोरकितानि ते रचयतः स्तोत्राणि वाणीपतेः
अस्माकं सुमितां स्तुतिं कलयतामप्यम्ब तुल्यं फलम्।
कौबेरीं श्रियमानशे बहुतरैः कश्चित्तपोभिश्चिरात्
एनामाशु कुचेल एव जगृहे धानाप्रदानादपि ॥ **1.20** ॥ 20

आसन् धन्यतमाः गुणांस्तव बहूनास्वाद्य शक्रादयो
गृह्णन्तोऽपि गुणार्णवामृतकणान्मातः कृतार्था वयम्।
आचामन्ति सुधाझरान् सुमनसो द्वित्रांश्चकोराः करान्
ऐणाङ्कानविशेषमार्तिशमनं तत्रोभयेषामपि ॥ **1.21** ॥ 21

देवि श्रीर्वृषशैलदेवदयिते दाक्षिण्यपुण्यक्षिते
मातः साहसतस्तव स्तवमिमं कर्तुं प्रवृत्तस्य मे।
उन्मीलन्तु परं गिरस्तव करालङ्कारपङ्केरुह -
प्रेङ्खत्तुङ्गषडङ्घ्रिसङ्घ विसरज्झङ्कारशङ्काकराः ॥ **1.22** ॥ 22

पद्यानां दशभिर्यदस्तुत शतैस्त्वत्प्रेयसः पादुकां
त्रय्यन्तार्यगुरुः परो हयमुखस्तत्राम्ब ! को विस्मयः।
स्तोकप्रज्ञमतीव मूकमपि मां श्लोकैः सहस्रेण ते
स्तोतारं समवेक्ष्य सूक्ष्ममतिभिः कस्मान्न विस्मीयते ॥ **1.23** ॥ 23

मन्ये सत्स्वपि वाङ्मयेषु विदुषामन्येषु धन्यैर्बुधैः
उक्तिर्मे भुवि देवि तावकगुणस्पर्शादुपादीयते।
भद्रे त्वद्रमणप्रशस्तचरणद्वन्द्वैकसंसर्गतो
भर्गः स्वर्गधुनीं बिभर्ति शिरसा भूयस्सु सत्स्वम्बुषु ॥ **1.24** ॥ 24

तव स्तोत्रे मन्दाः कतिचिदतिचित्रेऽपि कमले
न विन्दन्त्यानन्दं यदि तदपि न म्लायति मनः।
सृजेदेव स्रष्टा स किल विपुलेऽस्मिन् क्षितितले
चमत्कारानन्दानुभवचतुरान् द्वित्रिचतुरान्॥ **1.25**॥ 25

सुचारुमधुवीचिकारसमुचो वचोदेवता -
कुचामृतकचाकचिप्रथनचातुरीमेदुराः।
नराः सततमिन्दिरागुणकथासुधादोहिनीः
उपाध्वमिह वेङ्कटाध्वरिकवेरुदारा गिरः॥ **1.26**॥ 26

स्वैरं प्ररोहयतु पद्यसहस्रमेतत्
दासस्य मे वदनसीम्नि तवाऽवलोकः।
यः क्वापि हन्त सकृदञ्जलिबन्धभाजि
जन्तौ जगज्जननि सौति सहस्रमक्ष्णाम्॥ **1.27**॥ 27

पङ्कजनिलये स्तोत्रं
वेङ्कटकविगीतमेतदविगीतम्।
किङ्करकृतमिति कृपया
त्वङ्कलयितुमर्हसि प्रसीदन्ती॥ **1.28**॥ 28

रसिकालिभिरास्वाद्यं रम्यं श्रीकरविलसदलङ्करणम्।
विकसतु सूर्यालोकात् पद्यसहस्रं सहस्रपत्रमिव॥ **1.29**॥ 29

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे प्रारम्भस्तबकः प्रथमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ प्रादुर्भावस्तबकः द्वितीयः ॥

भजे दुग्धाम्बुधिं यत्र परिष्कर्तुं हरेरुरः।
कठिनं सुकुमारं च रत्नं प्रादुरभूद् द्विधा ॥ 2.1 ॥ 30

चतुर्मुखादीन् जगदम्ब डिम्भान्
दुग्धैर्बहून् वर्धयितुं समृद्धैः।
पयः पयोधेः भवती दयाळुः
सत्यं प्रजज्ञे सह कामधेन्वा ॥ 2.2 ॥ 31

त्वयोज्ज्वलं दुग्धपयोधिमध्ये
महोद्वयं देवि सहोदियाय।
हरेरुरोभूषणमेकमासीत्
अन्यच्छिरोभूषणमष्टमूर्तेः ॥ 2.3 ॥ 32

जीवं जीवं प्रत्युदारां समृद्धिं
कर्तुं हर्तुं कञ्जधामे तमांसि।
सर्वं त्रातुं सत्कदम्बं पुराब्धेः
चान्द्री मूर्तिर्जायते तावकी च ॥ 2.4 ॥ 33

विश्वासेचनकं मुखं तव पयः सिन्धोरुदञ्चत्तदा
शङ्कित्वा विगलत्कलङ्कमपरं चन्द्राङ्कुरं शङ्करः।
न्यस्तं मस्तपदे विधुं प्रथमतो नूनं भृशं न्यूनमि -
त्यम्ब भ्रंशयितुं स्तुवन्निव शिरःकम्पं रमे निर्ममे ॥ 2.5 ॥ 34

दातुं त्वां पुरुषोत्तमाय तनयां पद्मे गृहीतव्रतः
प्रादात् कामगवीं मुदे सुमनसां पानीयमप्यम्बुधिः।
कञ्चित् सप्तिमनुत्तमं मघवते कल्पद्रुमं चेष्टदं
सर्वज्ञाय सितांशुकं धृतजटावर्गाय दिग्वाससे ॥ **2.6** ॥ 35

हर्षादब्धेरमृतकलशं त्वाददे देवसङ्घः
श्रीमानुच्चैःश्रवसममरक्ष्मापतिश्चन्द्रमीशः।
तेषामेकं न किल जगृहे त्वां शुभामेव शार्ङ्गी
पद्मे सारग्रहणनिपुणः पारिशेष्याद् ग्रहीतुम् ॥ **2.7** ॥ 36

छाया मुखे जननि चान्द्रमसी तवासीत्
कल्पद्रुपल्लवरुचिः करयोः पदोश्च।
सौधा रसी वचसि सम्पदतो न मिथ्या
भ्रातृश्रियं सहभुवः परिबिभ्रतीति ॥ **2.8** ॥ 37

सुधादयः सन्तु तथापि तोयधिः
ध्रुवं भवत्यैव भवत्यपत्यवान्।
गुणा रमे जाग्रतु विक्रमादयो
गुणी महोदारतयैव भूपतिः ॥ **2.9** ॥ 38

श्राम्यत्पन्नगवक्त्रकोटरमरुन्नुन्नोर्मिसङ्घट्टनाद्
झाटित्योर्ध्वविसारिदुग्धकणिकानिष्पन्नपुष्पाञ्जलिः।
सिन्धुर्मन्थवसुन्धराभृदुदयद्धुन्धुं ध्वनिच्छद्मना
स्तुत्वा माधवमद्भुतामलभत त्वामम्ब कन्यामणिम् ॥ **2.10** ॥ 39

सिन्धुक्रोडस्थपुटविलुठन्मन्थलब्धावतारैः
धुन्धुङ्कारैस्त्वदुदयमहे दुन्दुभिश्रीमति श्रीः।
प्राज्ञो झञ्झानिलपटुनटोन्नाटितप्रौढवीची -
वल्लीहल्लीसकमकलयन्नन्तरुल्लीढहर्षाः ॥ **2.11** ॥ 40

बर्हं भ्रान्त्वा चिकुरमुदधेरुद्भवन्त्या भवत्या
बद्धा मन्थक्षितिभृति सुरैः पन्नगाः स्विन्नगात्राः।
तत्कालैकोचितमतिजुषः त्रासतस्त्यक्तचेष्टाः
राजीवाक्षप्रणयिनि भृशं रज्जुतामभ्यनैषुः ॥ **2.12** ॥ 41

आलोक्य तत्रभवतीमवतीर्णरूपां
वृष्टा मुदा सुमनसः सुमनः प्रधानैः।
पिण्डीभवद्भिरखिलाम्ब पयः पयोधेः
डिण्डीरखण्डनिवहैः सममाप्लवन्त ॥ **2.13** ॥ 42

अम्ब स्वयं त्वयि चिरादवतीर्णवत्यां
मन्थश्रमव्यपनयाय मखाशनानाम्।
श्रान्ताहिरज्जुकबलीकृतिशङ्कयेव
क्षीरोदरोधसि शनैरनिलश्चचार ॥ **2.14** ॥ 43

सान्द्रोत्कण्ठामसृणमधुजित्सादरापाङ्गधारा -
सध्रीचीभिः श्वसनविसरद्दुग्धवीचीभिरब्धिः।
उद्वाहाख्यं कमपि भवतीमुत्सवं लप्स्यमानां
मातस्तातो मधुरमनयन्मङ्गलस्नानकर्म ॥ **2.15** ॥ 44

सुधोदधिसमुद्भवत्सुरतरुच्छटान्तर्गते
मनोज्ञमणिमण्टपे महति रत्नसिंहासने।
स्थितां मणिसरोरुहे त्रिदशसुन्दरीसेवितां
जयाय भवतीमहं जननि सन्ततं चिन्तये ॥ **2.16** ॥ 45

अभ्यर्णस्फुरदप्सरःकरधृतैरुद्दामदुग्धाम्बुधिः
स्वैरोत्सृत्वरवीचिकासहचरैः संवीजितां चामरैः।
हस्तालङ्कृतपङ्कजामभिनवाकल्पैरनल्पैः शुभाम्
अम्ब त्वामुषसि स्मरामि जगतामातङ्ककूलङ्कषाम् ॥ **2.17** ॥ 46

भूयासुस्ते त्वदीया मयि हरिदयिते स्थूललक्षाः कटाक्षाः
यल्लिप्साव्यग्रभर्गाद्यमरविरचितैरञ्जलीनां प्रपञ्चैः।
मन्थाद्रिक्षोभदुःस्थं कलशजलनिधेर्मध्यमुत्सृज्य वेलां
प्राप्तै रेजे सरोजैरिव नवरजनीनायकालोकमूकैः ॥ **2.18** ॥ 47

अग्रे मुरारेररविन्दपीठे
हरित्करीन्द्रैरभिषिच्यमानाम्।
अवेक्ष्य पुत्रीमखिलेश्वरीं त्वाम्
आनन्दसिन्धौ निममज्ज सिन्धुः ॥ **2.19** ॥ 48

प्रसभमुदधिकन्ये पश्यतां देवतानां
परमपुरुषवक्षः पीठमाढौकथास्त्वम्।
सह दयिततमेन स्वैरकेलौ सतीनां
न खलु निजशिशूनां सन्निधिर्व्रीडहेतुः ॥ **2.20** ॥ 49

कलितकलशसागरोर्मिगङ्गं
कमपि मुकुन्दमहः कलिन्दजौघम्।
कनकसुहृदभूषयत्तवाभा -
विततिरतीव रमे सरस्वतीव ॥ **2.21** ॥ 50

द्युनदीशिशिरं शिरः पुरारेः
भजतीन्दुर्भवती दयारसार्द्रम्।
हृदयं मुरहर्तुरब्धिजे वां
उचितैव स्थितिरुद्भवानुरूपा ॥ **2.22** ॥ 51

कमले तोषयितुं त्वां कान्तभुजान्तरनिशान्तमुपयान्तीम्।
प्रायच्छदूर्मिहस्तैः प्रत्नं रत्नगणमम्बुधिर्हरणम् ॥ **2.23** ॥ 52

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे प्रादुर्भावस्तबकः द्वितीयः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ वक्षस्स्थलावस्थानस्तबकः तृतीयः ॥

श्रये शेषाचलमणेः शार्ङ्गिणो हृदयङ्गमाम्।
अनुकम्पामिवाकम्पामम्बामम्बुजवासिनीम्॥ **3.1** ॥ 53

कल्याण दिव्य करुणादि गुणाम्बुराशे
काङ्क्षाधिकाभ्युदयदायिकटाक्षलेशे।
भद्राय दैत्यजिदुरःकृतनित्यवासे
भक्तिस्थिरेण मनसा भवतीमुपासे॥ **3.2** ॥ 54

नालीकसम्भवभवादिसुराभिवन्द्ये
नानाविधाकृतक वाङ्मय मौळिवेद्ये।
पाथोधिपुत्रि पतिवक्षसि नित्यहृद्ये
भान्तीमनन्यशरणो भवतीं प्रपद्ये॥ **3.3** ॥ 55

शय्यागृहं तव पिता जगतां नियन्तुः
भ्राता दृगेक इतरः पुनरङ्गभूषा।
वक्षस्यमुष्य वरदे त्वमवस्थिता तत्
वाल्लभ्यमम्ब भवदीयमनन्यलभ्यम्॥ **3.4** ॥ 56

भ्रातुर्विधोर्वसुसमृद्ध्यसहेषु पद्मे -
ष्वास्ते रमेत्यपयशः प्रशमाय नूनम्।
सोदर्यकौस्तुभशुभावहमब्धिकन्ये
वक्षस्त्वमावससि वेङ्कटनायकस्य॥ **3.5** ॥ 57

भगवतः प्रतिघो हृदि मा स्म भूत्
समुदयद्वृजिनेषु जनेष्विति।
अवहिता जगदम्ब हिताय नो
हृदयमेव हरेरधितिष्ठसि ॥ **3.6** ॥ 58

फणिशैलपतेस्त्वमिन्दिरे
भवसि प्राणसमेति साम्प्रतम्।
अमुना भवती यतः स्वयं
हृदये प्राणपदे निवेशिता ॥ **3.7** ॥ 59

उरगाद्रिपतेरुरःस्थलस्था
कमले तद्गलशङ्खगर्भमुक्तैः।
शुचिहारमहः सुरस्रवन्ती
सलिलैरम्ब सदाऽभिषिच्यसे त्वम् ॥ **3.8** ॥ 60

कुमारि क्षीराब्धेः कुसुमसुकुमाराङ्गि भवती
नवं पद्मं सद्म म्रदिम रमणीयं विजहती।
शरण्ये त्रातुं नः शरकिणघनं कौस्तुभशिला -
कठोरं गाढोरः श्रयसि कृपया कैटभरिपोः ॥ **3.9** ॥ 61

श्रीवत्साङ्कं चिरतरमुरः सीमगोष्ठं मुरारेः
अध्यासीनामनघहरितोदारकान्त्याभिरामम्।
कल्याणि त्वां सुलभममृतं संश्रितानां दुहानां
क्षीराम्भोधेः समुदितवतीं ब्रूमहे कामधेनुम् ॥ **3.10** ॥ 62

विश्वातीतो जयति वृजिनह्रासदे वासुदेवः
पद्मे तस्याप्युपरि महिमा भासते तावकीनः।
क्षेत्रज्ञानां हृदयमनिशं कञ्जनाभोऽधिशेते
तस्यापि त्वं हृदि हृततमोराजसे राजसे यत् ॥ **3.11** ॥ 63

वीक्षन्ते ये वेङ्कटक्ष्माभृदिन्दोः
    सूरस्थाने शोभमानामिह त्वाम्।
दुग्धोदन्वत्पुत्रि दिव्यं पदं ते
    सूरस्थानं हन्त भित्वा विशन्ति ॥ **3.12** ॥ 64

बलिवसुमुषः प्रहर्षा -
    दुच्चोरस्स्थलमुपेत्य कमले त्वम्।
अस्माकमपथगानां
    हरसे चिरकालसञ्चितानर्थान् ॥ **3.13** ॥ 65

शशिलेखा भवती च
    श्रीरब्धेरुद्गते तयोराद्या।
धारयति कृष्णमन्तः
    कृष्णेनान्तस्तु धार्यते चरमा ॥ **3.14** ॥ 66

वनमालाया मुषितां
    विश्वविभोर्भुजतमालविटपान्तः।
कामपि कनकलतां त्वां
    कलशाकूपारकन्यके मन्ये ॥ **3.15** ॥ 67

परमतुलसीतमनघे
    वनमालाप्तं सुलक्ष्मणाकलितम्।
कलयसि सद्रूपयुतं
    कमले वक्षो हरेर्महारामम् ॥ **3.16** ॥ 68

दृष्टात्मप्रतिबिम्बितेषु मणिषु द्रागिन्दिरे मा स्म भूत्
    अन्तःस्थेष्वबलान्तरस्थितिधिया कोपस्तवेत्यच्युतः।
शङ्कोन्मेषकथापथातिपतितं सन्त्यक्तरत्नान्तरः
    तं त्वत्सोदरमेव कौस्तुभमणिं धत्ते भुजाभ्यन्तरे ॥ **3.17** ॥ 69

सस्नेहपूर्तिरुदितत्रिदशोपसेवः
दीप्तो हरेरुरसि देवि तवेष्टगेहे।
अस्माकमान्तरतमः प्रशमय्य मुक्तेः
मार्गं प्रकाशयतु कौस्तुभरत्नदीपः॥ **3.18** ॥ 70

सरसिजनिलयापि वैभवेन
स्फुरसि निरेनसि मानसे मुनीनाम्।
उरसि मुररिपोरुपोढहारे
शिरसि च देवि गिरां पुरातनीनाम्॥ **3.19** ॥ 71

शुभश्रीवत्साङ्कं शुचिरुचिरहारं मुररिपोः
तमालाभं वक्षस्तरलवनमालासुरभिलम्।
परिष्कुर्वाणां त्वां भवजलधिशोषाय कलये
जगन्मातः प्रातस्तनजलजदायादवदनाम्॥ **3.20** ॥ 72

प्राचीनवाक्परिषदां परतत्त्वचिन्तां
व्यालेन्द्रभूधरपतिर्व्यपनेतुकामः।
कान्तो बिभर्ति भवतीं कलशाब्धिकन्ये
भूषाविशेषमिव देवि भुजान्तराले॥ **3.21** ॥ 73

स्वभावादुन्मीलद्बकुलसुमनः कोमलतनोः
तव क्लेशाशङ्काकुलितहृदयेनापि हरिणा।
त्वदाक्रान्ते हन्त व्युदसितुमुरस्यम्ब पुलका
न शक्यन्ते पद्मे न खलु सुलभः कण्टकजयः॥ **3.22** ॥ 74

निरत्ययं नीलमहोनिधानं
कान्तं मुकुन्दाभिधमिन्दिरे त्वम्।
निरञ्जनैरेव जनैर्गृहीतं
वीक्ष्य स्थिता वक्षसि रक्षितुं किम्॥ **3.23** ॥ 75

जननि पुष्यसि तामरसं पदं
　　वितनुषे च नतामरसंपदम्।
परमुरस्फुरणप्रतिरोधिनं
　　परमुरः स्फुरणं नयसेऽद्भुतम्॥ **3.24**॥ 76

यदि नाम विष्णुवक्षः
　　क्षणमत्यक्षः क्षमामयि रमे त्वम्।
आगस्विनस्तदा नो
　　नैवारक्षिष्यदूष्मलो नाथः॥ **3.25**॥ 77

हृदये कमलदलाक्षि
　　त्वत्पदलाक्षीयलक्ष्म भवतीं च।
दधदूष्मलोऽपि कृष्णो -
　　ऽप्यधिकारुण्यं वहत्यहिगिरीशः॥ **3.26**॥ 78

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे वक्षस्स्थलावस्थानस्तबकः तृतीयः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ कारुण्यस्तबकः चतुर्थः ॥

भजे भुजङ्गशैलेश भुजान्तरपरिष्क्रियाम्।
तनयां दुग्धजलधेः दयामिव कृतोदयाम्॥ **4.1** ॥ 79

जननि जीवयितुं जगदर्दितं
दशमुखप्रमुखैस्त्रिदशारिभिः।
जनकयज्ञमहीजठरे जनिं
कृतवती भवती कृपया रमे॥ **4.2** ॥ 80

अकरुणा करुणा ध्रुवमम्ब ते
क्षितितले भवतीमवतार्य या।
अहह यातुपुरस्थितिवेदनां
अगमयज्जगदार्तिनिवृत्तये॥ **4.3** ॥ 81

अविरतविविधापराधकारि -
ण्यपि मयि देवि दयां करिष्यसीति।
जननि मम भयातुरस्य धैर्यं
जनयति वायसदानवापदानम्॥ **4.4** ॥ 82

राघवस्य हृदयं स्थिराघवत्
वायसं प्रति न वायसक्रमम्।
देवि जानकि दयारसात्त्वया
पादयोजनकृता द्रवीकृतम्॥ **4.5** ॥ 83

अब्धेः कन्ये जननि महतामागसां जन्मगेहे -
    ष्वस्माद्दृक्षेष्वपि च करुणामादधासि ध्रुवं त्वम्।
साक्षी तस्मिन् युधि दशमुखे सारसाक्षि व्यपेते
    यातुस्त्रीणां कबलनविधिं याचमानो हनूमान्॥ **4.6**॥ 84

रामस्तिष्ठतु नाम यो न विदयो जिह्रेति निर्हेतुकं
    सुग्रीवैकविरोधिनं क्षितिसुते संहृत्य तं वालिनम्।
कारुण्याम्बुनिधिस्त्वमेव नियतं क्लृप्तात्मपीडं यतो
    रक्षःस्त्रीनिकरं ररक्षिथ तमप्यार्द्रागसं वायसम्॥ **4.7**॥ 85

गुरुणा प्लवेन करुणात्मना विना
    हरिणाङ्कसोदरि गुणाम्बुधे तव।
जननाधिरोगमरणादिवेदना -
    वरुणालयस्य तरणाय का गतिः॥ **4.8**॥ 86

त्वय्येवायतते कृपा रघुपतेर्देवस्य सत्यं यतो
    वैदेहि त्वदसन्निधौ भगवता वाली निरागा हतः।
निन्ये कापि वधं वधूस्तव तु सान्निध्ये त्वदङ्गव्यथां
    कुर्वाणोऽप्यवितः पतन्नशरणः काको विवेकोज्झितः॥ **4.9**॥ 87

द्विपञ्चग्रीवाज्ञाचकित समुदञ्चन्निशिचर -
    प्रपञ्चप्रक्षिप्तः पवनसुतवाले हुतवहः।
यतो जातः शीतस्तमिह भवसन्तापविवशे
    कृपापूरं स्वैरं किरतु मयि लोकाम्ब भवती॥ **4.10**॥ 88

विष्णावुष्णांशुवंशं गतवति विबुधद्वेषिशोषाय रोषात्
    एष्यत्तद् योषिदागः शतमपि कृपया क्षन्तुकामेव नूनम्।
धत्ते कन्या जनन्या गुणमिति निपुणं किंवदन्तीं विदन्ती
    पूर्वं सर्वं सहायामुदयमकुरुथा भोगिशैलेन्द्रकान्ते॥ **4.11**॥ 89

अवितुमिह दया ते देवि मार्गत्यशक्तान्
    अहमपि शरणार्थी हन्त मज्जन् भवाब्धौ।
घटनमुचितमासीदावयोर्दैवयोगात्
    कलशजलधिकन्ये हातुमेतन्न युक्तम्॥ **4.12**॥ 90

कार्येषु कारणगुणाः नियतं भवन्ती -
    त्युक्तिं सतामवितथामवधारयामः।
चान्द्री कला च भवती च पयोधिमध्यात्
    जाते यदम्ब सुधया दयया च शीते॥ **4.13**॥ 91

आसादितोन्नतपदेषु गिरीशमुख्ये -
    ष्वारोढुमब्जनिलये शिथिलाभिलाषा।
नीचे तु मादृशि दयारसनिम्नगा ते
    प्राप्तादरा प्रवहतीत्यनुरूपमेतत्॥ **4.14**॥ 92

शौरिश्चकास्ति हृदयेषु शरीरभाजां
    तस्यापि देवि हृदयं त्वमनुप्रविष्टा।
पद्मे तवापि हृदये प्रथते दयेयं
    तामेव जाग्रदखिलातिशयां श्रयामः॥ **4.15**॥ 93

नित्यं विश्वं वशयति हरिर्निग्रहानुग्रहाभ्याम्
    आद्ये शक्तिं विघटयति ते हन्त कारुण्यपूरः।
ईषन्न्यूनं तदिह दयितादीशितृत्वं भवत्याः
    तच्छेषत्वं कथमितरथा देवि तुल्येऽपि भूम्नि॥ **4.16**॥ 94

विहितं जहतं विवेकहानात्
    अहितं कर्म च नित्यमाचरन्तम्।
अपयातगुणं हरिप्रिये मां
    कृपया केवलयैव पालयेथाः॥ **4.17**॥ 95

क्षणमप्यसहास्थितौ जनागः
कमिता न क्षमितेति सानुकम्पा।
अवतारदशासु देवि रूपैः
अनुरूपैरनुगाहसे मुकुन्दम्॥ **4.18** ॥ 96

गलति कलितायासे श्वासे कफार्गलिते गले
भ्रमति नयने भ्रान्ते स्वान्ते यियासुषु चासुषु।
त्वरयति दया जन्तोरन्तोत्क्रमे भवतीं रमे
त्वमपि कृपणत्राणे प्राणेश्वरं च पराङ्मुखम्॥ **4.19** ॥ 97

दुःखाक्रान्तं भवजलनिधिं दुस्तरं योगिवर्यैः
पापानां नस्तरितुमधुना का कथा लोकधात्रि।
एवं यद्यप्युदयति मतिस्तावकीमब्धिकन्ये
धन्ये दृष्ट्वा तदपि करुणां धैर्यमेत्यन्तरात्मा॥ **4.20** ॥ 98

तपोभिरिह योगिनस्तव दयामविन्दन्त याम्
अकिञ्चनतयैवताममृतसोदरि प्राप्नुमः।
समाधिपटवः श्रमादनुभवन्ति यद्दैवतं
तदेव यमुनातटीतरुगणः सुखेनान्वभूत्॥ **4.21** ॥ 99

अपारपरितापकृद्भवतपातपान्धा वयं
प्रपामिव सुपावनीं तव कृपामुपासीमहि।
उदञ्चितधनञ्जयः प्रभुरुदारहेतिर्यया
ययावुदधिकन्यके तपनमध्यगः शीतताम्॥ **4.22** ॥ 100

कंसारातिप्रेयसि संसाराब्धौ भ्रमन्ननाथोऽहम्।
अम्ब तव साध्वकम्पाम् अनुकम्पान्नावमवलम्बे॥ **4.23** ॥ 101

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे कारुण्यस्तबकः चतुर्थः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ कटाक्षस्तबकः पञ्चमः ॥

लक्ष्मीवदन लावण्य सुधोदधि कृतोदयः।
कल्पवृक्षः कटाक्षात्मा काङ्क्षितानि करोतु नः ॥ 5.1 ॥ 102

क्षमाकुमारि क्षणमीक्षणं त्वं
यदृच्छया न्यस्यसि यस्य जन्तौ।
स ईक्षणानां त्रयमष्टकं वा
सहस्रकं वा सहसा दधाति ॥ 5.2 ॥ 103

अम्ब स्तोकालोकसुधाशीकरलेशैः
अङ्गं जन्तोरार्द्रयसे यस्य स एषः।
हस्तात् स्वीयाद्वारणमस्ताच्च गलद्भिः
दानाम्भोभिः पङ्किलगेहाङ्कणभूः स्यात् ॥ 5.3 ॥ 104

त्वद्वीक्षणामृतकणोऽपि न येषु तेषां
सद्मानि जीर्णशिथिलच्छदिराप्तिरक्तैः।
अभ्रच्युतैरुदकबिन्दुभिरश्रुमिश्रैः
जम्बालितानि जगदम्ब चिरं भवन्ति ॥ 5.4 ॥ 105

कनकशिबिकारूढाः प्रौढाधिराज्यपदे स्थिताः
कतिचिदतुलं मन्या धन्याश्चरन्ति यदिन्दिरे।
यदपि च वहन्त्येनां दीनाः परे फलमम्ब तत्
द्वयमपि तव स्तोकालोकान्वयव्यतिरेकयोः ॥ 5.5 ॥ 106

जडं मामप्यार्तं जननि शिशिरापाङ्गविसरैः
कृपापूरस्मेरैः क्षणमिह कृतार्थी कुरु मुदा।
ततः को वा दोषस्तव भवति दैत्यारिदयिते
मरौ वा मेरौ वा भगवति समं वर्षति घनः ॥ **5.6** ॥ 107

द्वारि द्वारि दुरीशकिङ्करकृतैरातङ्कदैर्हुङ्कृतैः
अप्युच्चैरतिमात्रवेत्रपरुषाघातैरनुच्चाटितः।
दुर्दारिद्र्यदशापिशाचनिचयो दूरात्समुत्सार्यते
देवि त्वत्करुणाकटाक्षतटिनी स्नानार्जवेनाधुना ॥ **5.7** ॥ 108

शुचौ वंशे जन्म श्रुतिनयमतिर्मातरतुला
विकम्पा संपत्तिर्विशदमविगीता च कविता।
प्रपत्तिर्दैत्यारौ हितपरमपत्यं शुभयशो
विवर्त्ताः सप्तामी ध्रुवमसदृशां तावकदृशाम् ॥ **5.8** ॥ 109

अलमलमनुसृत्य स्वामिनि ज्ञानहीनान्
अकलितबहुमानानन्वहं किंपचानान्।
शरणमुपगतं मां चारु कारुण्यतुङ्गैः
स्नपय जननि संपन्नृत्तरङ्गैरपाङ्गैः ॥ **5.9** ॥ 110

कृती वसुमतीपतीन् कृतचटुस्तवः सेवतां
दिशः स्फुटमटाट्यतां दिशतु धातुवादे दृशम्।
जपत्वपि मनून् बहून् जलनिधेः सुते यस्तु ते
दृशामिह दयास्पृशामविषयो दरिद्राति सः ॥ **5.10** ॥ 111

कृपणदशापिशाचगणमोचनवेत्रलताः
मधुरिपुभक्तिवल्लि परिवृद्धिसुधाम्बुधराः।
हृदयतमोविमोक्षहिमधामकराः कमले
भगवति नः पुनन्तु भवदीयकटाक्षलवाः ॥ **5.11** ॥ 112

उदीता दुग्धाब्धेः कुवलयपरीतापशमनी
पदे विष्णोर्भान्ती रजनिचरचक्रव्यसनदा।
दिशन्ती सार्वज्ञं भजति शिरसा क्वापि कमले
शुभालोकैः शोकं हरतु शशिलेखेव भवती ॥ **5.12** ॥ 113

दूराजावसथाभिधान निरयद्वाराग्रजाग्रन्नर -
क्रूरालापशराहतिव्यतिकरं दूरान्निराकुर्वतीः।
पारावारसुते तरङ्गय मयि स्मेराम्बुजस्पर्धिनीः
घोरापारसमस्तदुष्कृत परीहाराय धीरा दृशः ॥ **5.13** ॥ 114

अघटितघटनापटीयसी ते
हरिगृहिणि प्रकटा कटाक्षरेखा।
स्थिरवसुमवनीपकं विधत्ते
जननि वनीपकमेव हन्त जन्तुम् ॥ **5.14** ॥ 115

नयने फणीन्द्रशयनेष्टनायिके
यदि नादधासि सुदिनाब्जशोभने।
बलभेदनोऽपि न लभेत संपदं
मरुतामयेत मरुतामपि स्थली ॥ **5.15** ॥ 116

करुणारसेन वरुणालयात्मजे
म्रदिमानमेत्य यदि मामवेक्षसे।
मलिनात्मनापि कलिना क्रियेत किं
मम किं करोतु यमकिङ्करोऽपि वा ॥ **5.16** ॥ 117

मामपाङ्गलहरी गरीयसी
तावकी स्पृशतु देवकीस्नुषे।
अन्तकस्य तु रुषा कषायिता
मा पतन्तु मयि दृष्टिवृष्टयः ॥ **5.17** ॥ 118

बन्धुरगुणे कृपणबन्धुमनपायं
सिन्धुतनये तव कटाक्षमकरन्दम्।
इन्दुकरवृन्दजडचन्दनमहीभृत्
कन्दरमरुच्छिशिरसुन्दरमुपासे॥ **5.18** ॥ 119

आर्तिं लुम्पत्वम्ब तवापाङ्गसुधात्मा
गङ्गा सैषा चित्रगतिर्वर्जितभङ्गा।
नेत्री शोषं प्रत्युत पद्मे भवमेव
प्राज्ञानां या भासितरूपं च विधत्ते॥ **5.19** ॥ 120

उच्चकोरकनवाभ्युदयं ते
वीक्षितं मनुमहे मकरन्दम्।
यत्र तल्लगति षट्पदमन्त्रः
तत्र भाति शतपत्रगृहे यत्॥ **5.20** ॥ 121

यक्षश्रीजननचणैस्तवावलोकैः
लक्ष्मि श्रीक्षयपिशुना निरस्यमाना।
नालीकासनलिपिरप्यलीकलीना
नालीका भवति नृणां प्रतीपगत्या॥ **5.21** ॥ 122

दुग्धाब्धिकन्ये त्वदपाङ्गभृत्या
वित्ताधिपत्यादिपदाभिषिक्ताः।
हृत्तापयुक्तास्तव देव्यभक्ता
मर्त्या जगत्यां विलपन्ति रिक्ताः॥ **5.22** ॥ 123

वीक्षितानि तव वारिधिकन्ये
यत्र पालितजगन्ति लगन्ति।
चित्रमत्र स परत्र च देही
देहिशब्दमपहाय चकास्ति॥ **5.23** ॥ 124

तव देवि पटुर्नटः कटाक्षो
गुणवत्तालसदुच्छ्रयः स नूनम्।
ननु नर्तयते सरस्वतीं यः
सततं संश्रितमञ्जुलास्यरङ्गे ॥ **5.24** ॥ 125

भावत्कैर्भगवति कज्जलानुविद्धैः
कृष्णो यैर्भवति विधुः कटाक्षपूरैः।
तल्लेशैरधिकतमश्रियां निदानैः
मालिन्यं हरसि विचित्रमान्तरं नः ॥ **5.25** ॥ 126

विकस्वरामोदभरं वितन्वती
पुरोवसन्तं प्रथितागमाञ्चिता।
कटाक्षवल्ली तव माधवप्रिये
प्रसौत्यनन्तं सुमिताप्यसौ फलम् ॥ **5.26** ॥ 127

न विप्रयोगि व्यसनाय कल्पते
न मार्गणानां सहते च पञ्चताम्।
भवं जवात् प्रत्युत दन्दहीत्ययं
जयत्यपाङ्गस्तव चित्रमिन्दिरे ॥ **5.27** ॥ 128

विकचकमलशोभाविभ्रमोद्भूतिसीमा
विधुमिह सदुपास्यं तन्वती सुप्रसन्नम्।
शरदिव तव वीक्षा शार्ङ्गिणः प्राणकान्ते
शमयतु किल मेघाटोपमुज्जृम्भितापम् ॥ **5.28** ॥ 129

नित्यामेव विभूतिमम्ब ददतो निर्व्याजबन्धोर्भवत् -
दिव्यापाङ्गलवस्य वर्णनविधौ को लब्धवर्णो भुवि।
जुष्टो दृष्टिभिरष्टभिश्च तिसृभिः प्रायः सहस्रेण वा
देवि द्वादशभिश्च दैवतगणो यस्मै चिरं तिष्ठते ॥ **5.29** ॥ 130

तत्तादृक्षकटाक्षकङ्कटधरः श्रीवेङ्कटाद्रीशितुः
प्राणप्रेयसि भूयसीं प्रभजते शौर्याभिमुख्यश्रुतिम्।
सत्कीर्त्या सहसामरोत्तमजयं प्राप्तस्तवोपाश्रितो
वाग्बाणैर्न विहन्यते क्षितिभुजां निर्जित्य नित्यद्विषः॥ **5.30** ॥ 131

यावद्भावत्कवीक्षा विशति तनुभृतामिन्दिरे मन्दिरेषु
व्यक्तं नृत्तं विधत्ते धनपतिविभवादुत्तरा वित्तराजिः।
द्वारे तारेशगौरास्तुरगपरिबृढा बन्धुराः सिन्धुरा वा
गर्वात् घुष्यन्त्यखर्वाभ्युदयमधिमुखं राजते राजतेजः॥ **5.31** ॥ 132

धन्यः कश्चिज्जगति विषयस्तावकालोकितानाम्
अत्रामुत्राप्यखिलजननि प्राप्य गोत्राधिकृत्त्वम्।
सत्सन्तानप्रभवसुमनः सेवयाऽऽमोदशाली
जैत्रस्थानं किमपि भजति श्रीमदुच्चामरं च॥ **5.32** ॥ 133

शय्योत्थायं जननि धनिनां वासमासायमित्थं
गत्वा गत्वाऽप्यनुदिनमनुच्छिन्नतृष्णोद्गमोऽहम्।
हृद्यापाङ्गामिव भवदवप्लोषशान्त्यै रमे त्वां
हृद्यापाङ्गां मधुरिपुवशीकारविद्ये प्रपद्ये॥ **5.33** ॥ 134

वितन्वन्त्यामिष्टं विविधमचिरादीक्षणलवैः
भवत्यां जाग्रत्यां भगवति नरान् सेवितुमनाः।
क्षरन्तीमभ्यर्णे कमलसुरभिस्वादुसलिलां
स्रवन्तीमुल्लङ्घ्य श्रयति मृगतृष्णामतितृषा॥ **5.34** ॥ 135

अजीर्यदघनाशनं दृढगदाकरं देवि यत्
पुराणमपि पूरुषं पुनरलङ्घ्नं पुष्यति।
तदेतदिह पातु नस्तव कटाक्षदिव्यौषधं
फणीन्द्रशयजीविके भवविपन्मयादामयात्॥ **5.35** ॥ 136

दुर्लङ्घ्य संसृतिदुरर्णवकर्णधाराः
    संपद्द्रुधूसतत नर्तनसूत्रधाराः।
अज्ञानकाननविदारकुठारधाराः
    पद्मे जयन्ति भवदीयकटाक्षधाराः॥ **5.36** ॥ 137

स्वादुशीतलदयारसपूर्णं
    सेवितं द्विजवरैरमृतोत्कैः।
देवि तावककटाक्षतटाकं
    विश्वतापविगमाय विगाहे॥ **5.37** ॥ 138

करुणया कलशोदधिकन्यके
    जडतमेष्ववलोकमघापहम्।
वितनुषे सकृदेष पुनस्तनो -
    त्यनवलोकमधन्यदुरासदम्॥ **5.38** ॥ 139

देवि कटाक्षलवस्तव रिक्ते
    संपदमाधिपदेऽपि निधत्ते।
सिन्धुकुमारि तथाप्यतमस्के
    सिध्यति तत्र समाधिरदृप्ते॥ **5.39** ॥ 140

प्रागेव स्यात् प्रार्थितार्थस्य सिद्धिः
    पश्चादम्ब त्वत्कटाक्षोपलम्भः।
दृष्टान्तो नस्तत्र ते दृष्टिपातात्
    प्रागम्भोधिं लङ्घयन् पावमानिः॥ **5.40** ॥ 141

वक्षोरक्षे शार्ङ्गिणः स्थूललक्षे
    तत्तादृक्षे जाग्रति त्वत्कटाक्षे।
सूनश्रीभिः सान्द्रगन्धे परोक्षे
    कुर्यादास्थामल्पधीः कल्पवृक्षे॥ **5.41** ॥ 142

रचयति तव वीक्षा नूनमज्ञेऽपि रक्षां
दुरितचरितभेदी देशिको मन्त्रवादी।
तदिह गलितमोहो द्रागयं पद्मगेहे
विषयरुचिपिशाची विक्रियाभिर्व्यमोचि ॥ **5.42** ॥ 143

जगदम्ब तवापाङ्गो
जलजातशरः प्रपुष्टमधुकालः।
कमले कथय कथं वा
करोत्यसौ सर्वमङ्गलेनाप्तिम् ॥ **5.43** ॥ 144

तिष्ठन्त्वष्टम एव भूसुतशनिप्रष्ठाश्च दुष्टा ग्रहाः
फाले कामपि लेलिखीतु जगतः स्रष्टापि कष्टां दशाम्।
ते किं कुर्युरपाङ्गतो मयि सकृद्देवि त्वयाऽङ्गीकृते
नीहारो न करस्थमम्बरमणेर्लीलाम्बुजं बाधते ॥ **5.44** ॥ 145

विजयापजयौ रमे भवेतां
त्वदपाङ्गान्वयतद्विपर्ययाभ्याम्।
अजयत्तव वीक्षया हनूमान्
अधिलङ्कं विकटाक्षराक्षसौघम् ॥ **5.45** ॥ 146

प्रतिघोष्णमधीशितुर्न पद्मे
भवदीक्षाविषयं प्रवेष्टुमीष्टे।
त्वदपाङ्गसुधार्द्रितस्तुषारी -
भवदग्निर्हनुमानिह प्रमाणम् ॥ **5.46** ॥ 147

कटाक्षप्रत्यूषे तव मिषति कंसारिदयिते
तमः शाम्यत्यन्तर्गतमपि च सूर्याकलनतः।
स्वयं दोषोन्मेषो विरमति पुनस्सारसवन -
श्रियः सम्पद्यन्ते दिवि च भविता भासनमपि ॥ **5.47** ॥ 148

सुरभिस्तनुते तवावलोकः
सुमनः संपदमम्ब भूमिजानाम्।
अविपल्लवतां विधाय पुष्णा -
त्यपि चामोदमदीप्तिकाननानाम्॥ **5.48** ॥ 149

कमले गभीरकरुणाजलधे
त्वयि मन्दरक्षणविकासिहृदि।
कलितोदया मृदुकटाक्षसुधा
प्रथयत्यसौ सुमनसां प्रमदम्॥ **5.49** ॥ 150

प्रतिघानलं भुजगशैलपतेः
प्रशमं नयन्त्यतितरां शिशिरा।
कमलालये तव कटाक्षझरी
विधुनोतु मे वृजिनतापभरम्॥ **5.50** ॥ 151

दृशो लेशं देयास्त्रियुगसखि देयं कियदिदं
महोदारायास्ते मम तु सुमहानेष विभवः।
कणानत्र द्वित्रान् गणयति न वारां जलधरः
प्रपद्यन्ते शुक्तौ परिणतिममी मौक्तिकतया॥ **5.51** ॥ 152

बिलेशयकुलेशभूधरपतिप्रिये त्वद्दया
तरङ्गितमपाङ्गितं धृतवतश्चिरं दृश्यते।
विकस्वरपिकस्वर व्यतिकरस्फुरन्निष्कुटं
नटद्युवतिनूपुर क्वणितसुन्दरं मन्दिरम्॥ **5.52** ॥ 153

नारायणप्रणयिनि त्वमपाङ्गदुग्ध -
धाराभिराभिरभिषिञ्च दयाम्बुधे माम्।
स्मेरानवद्यनिरुपाख्यसुखं यतो मे
स्वाराज्यभाग्यमपि सेत्स्यति शाश्वतं तत्॥ **5.53** ॥ 154

भो भूपभूमौ भ्रम भीमपाप -
भूमेति मे मूर्ध्नि लिपिं विधातुः।
पवर्गगर्भां परिमृज्य पद्मे
लिखस्यपाङ्गैरपवर्गगर्भाम्॥ **5.54**॥ 155

यं त्वं देवि निरीक्षसे यदुपतेः कान्ते दृशा तादृशा
तत्र स्तोत्रगिरश्चरन्ति विदुषां तत्रैव चित्रा गुणाः।
तेनैव व्यपदेशमृच्छति कुलं तस्मै मतिस्तिष्ठते
द्रष्टा पृष्ठमरेस्स एव न पुनर्धन्यं तदन्यं विदुः॥ **5.55**॥ 156

अपारसंसारतपातपार्ति -
व्यपायदच्छायमपास्तदोषम्।
कृपामरन्दैः शिशिरं रमे त्व -
दपाङ्गकल्पद्रुमुपाश्रयामः॥ **5.56**॥ 157

भावत्कमार्तिशमनं विरजातरङ्गं
पश्याम्यपाङ्गमखिलाम्ब यदाप्लुताङ्गः।
पीताम्बराकलितदीप्ति पदं परार्ध्यं
मुक्तादिभूषितमुपेत्य मुदं दधाति॥ **5.57**॥ 158

दुर्वर्णमर्णवसुते नमतां ललाटे
लोकाम्ब लुम्पति कटाक्षझरस्त्वदीयः।
ते राजताभ्युदयिनः पुनरुल्लसन्ती -
त्येतत् करोति हृदि विस्मयमस्मदीये॥ **5.58**॥ 159

देवि दुर्गतमरौ तव वीक्षा
कालिका दिशति काञ्चनवृष्टिम्।
तस्य सिध्यति सुकीर्तिरुदञ्च -
द्धीरसस्यविभवश्च ततः स्यात्॥ **5.59**॥ 160

वरुणालयसार्वभौमकन्ये
    करुणापाङ्गमधुव्रतस्त्वदीयः।
मधुनाशनमेत्य वृद्धिमृच्छन्
    अधुना नीरजसङ्गतिं विधत्ताम्॥ **5.60**॥ 161

निद्राजुषां भवविषादमये निशीथे
    स्वापाङ्गमर्पयसि शोभनमौषधं नः।
चित्रं ततोऽपि जगदम्ब चिरं विनिद्रं
    वेत्स्यामहे विगतदुःखपदं प्रबोधम्॥ **5.61**॥ 162

स्वालोकं शिशिरं चिराय नयसे यं जायमानं जनं
    संपश्येन्मधुकाल एव सुमनः सत्त्वावहस्तं ततः।
पाथोजायतने रजांसि जनयन् वेधोदृगूष्मागमो
    रौद्रालोक घनागमश्च तमसां कर्ता न तत्रास्पदी॥ **5.62**॥ 163

प्रायः कञ्चिददृष्टवन्तमवनौ पद्मे दृशा स्वीयया
    संयोज्य प्रसभं क्षणेन तनुषे जन्तुं सहस्रेक्षणम्।
आधित्सस्यसदृक्पदे त्रिदशनेत्राकारभाजं तम -
    प्येणाङ्कस्वसरीदृशं घटयितुं द्रागीशिषे दुर्घटम्॥ **5.63**॥ 164

मुखरुचिसरित्तरङ्गाः स्मितसितशतपत्रलोलकलभृङ्गाः।
संपन्नर्तनरङ्गा जयन्ति जगदम्ब तावकापाङ्गाः॥ **5.64**॥ 165

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे कटाक्षस्तबकः पञ्चमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ यत्नस्तबकः षष्ठः ॥

श्रीनिवासस्य महिषीं श्रेयसे तामुपास्महे।
यदर्थमेव विदधे यत्नं भूयांसमच्युतः ॥ **6.1** ॥ 166

कमले कमलेक्षणस्त्वदर्थे
    कठिनं कर्म करोत्यसौ न किं वा।
कलशोदधिमन्थनप्रयासात्
    अपरं किं श्रमदायि कर्म लोके ॥ **6.2** ॥ 167

तव गुरुस्तनशैलभरं सदा
    जननि वोढुमना जगतां पिता।
उरुभरोद्वहनाभ्यसनाय किं
    तमपि मन्दरमम्बुनिधौ दधौ ॥ **6.3** ॥ 168

नादत्तमध्यवनि सिध्यति किञ्चनेति
    निश्चिन्वता भगवतापि विवित्सता त्वाम्।
वैदेहि कामपि शिलामबलां विधाय
    कन्याप्रदानविधिरक्षपदाय चक्रे ॥ **6.4** ॥ 169

विद्यां बलां रघुपतिः पथि गाधिपुत्रात्
    सम्प्राप्य निह्नुतसमस्त तनुक्लमोऽपि।
अम्बातनुक्लम हरामबलामिह त्वां
    स्वस्य ध्रुवं घटयितुं तमुपास्त भूयः ॥ **6.5** ॥ 170

शंसन्ति पङ्क्तिरथयागविधेः फलं यं
सोऽयं मघावनिभवां जनकात्मजे त्वाम्।
प्राप्तुं व्यधात् कुशिकनन्दनयज्ञरक्षां
रक्षांसि हन्त दमयन् युधि रामचन्द्रः॥ **6.6**॥ 171

भगवति क्षितिपुत्रि भवत्कृते
भवहरोऽपि भवन् रघुनन्दनः।
समभवद्भवचापलतान्तधीः
स इति विस्मयवन्त इहास्महे॥ **6.7**॥ 172

त्वद्भ्रूभटस्य धनुषा विजितः सुमेषो
रामस्तमेव नितरामभिराद्धुकामः।
तत्प्रीतये जनकनन्दिनि तद्विपक्ष -
कोदण्डभङ्गमुपहारमिवाजहार॥ **6.8**॥ 173

कर्तव्ये जनकेन मैथिलि तवोद्वाहक्रमालोचने
सोऽयं वागुपकारमारचयितेत्यालोच्य भाविस्थितिम्।
तद्वंशैकपुरोहितस्य हि शतानन्दस्य हर्षाय तन् -
मातुर्ग्रावदशां हरन् रघुपतिस्तस्योपकारं व्यधात्॥ **6.9**॥ 174

सुन्दस्त्रीतनुभूसुबाहु कुहनोपज्ञं तु यज्ञक्रिया -
प्रत्यूहं शमयन् प्रहृष्य घटकं शुश्रूषया कौशिकम्।
दुर्दर्शं शशिखण्डमण्डन महादोर्दण्डकोदण्डम -
प्युर्वीनन्दिनि खण्डयन्नुदवहत् त्वामम्ब रामः श्रमात्॥ **6.10**॥ 175

त्वां मार्गमाणस्त्वदुदन्तशंसिने
वृद्धाय गृध्राय रमे रघूद्वहः।
योग्यैकयोग्यानि पदान्यदादहो
सन्तोऽपि वेलामतियन्ति रागतः॥ **6.11**॥ 176

अपि सकलशरण्यो मानिनामग्रगण्यो
भगवति भवदर्थे भानुवंशाधिनाथः।
कपिमपि शरणोत्कः कञ्चिदानञ्च कष्टं
गणयति न फलार्थी गौरवं लाघवं वा ॥ **6.12** ॥ 177

त्वद्दाने जनकेन मैथिलि पुरा शुल्कीकृतं स्वामिनः
पाण्यङ्गुष्ठकिणं व्यधात् पशुपतेश्चापे गुणारोपणम्।
त्वत्संप्राप्ति सहायवानरपतेः प्रत्यायनार्थं त्वभूत्
पादाङ्गुष्ठकिणाय दुन्दुभितनोस्तद् दूरतः क्षेपणम् ॥ **6.13** ॥ 178

निशिचरपतिमन्तं नेष्यता तद्गृहीतां
पुनरवनिसुते त्वां प्राप्स्यता राघवेण।
तरणिजमभिराद्धुं तत्र कार्ये सहायं
सपदि निरपराधः सादितो हन्त वाली ॥ **6.14** ॥ 179

परोरजसि धामनि श्रुतिशिरोभुवि च्छान्दसे
महामहसि योगिनां दहरमन्दिरे च स्थितः।
धरादुहितरादरात् तव कृते कपीन्द्रागतिम्
प्रतीक्ष्य दिवसान् बहूनवसदृश्यमूके प्रभुः ॥ **6.15** ॥ 180

रघुकुलपतिना ते लोकनायैव सीते
कृतरविसुतसेवः कोऽपि दत्तानुभावः।
वनशिखरिविहारी वानरब्रह्मचारी
जलधिमपि ललङ्घेऽजात खेदं ललन् खे ॥ **6.16** ॥ 181

द्रष्टुं त्वां ननु हनुमन्तमग्निदाहा -
द्यातङ्कं बहुमधिलङ्कमाप्तवन्तम्।
सर्वस्वायितपरिरम्भसौख्यदानात्
काकुत्स्थो जननि चकार निर्व्रणं तम् ॥ **6.17** ॥ 182

दरादुपनतं रमे दशशिरोऽनुजं त्वत्कृते
    समस्तनयकोविदः सपदि सङ्ग्रहीतुं प्रभुः।
असाधितरिपुस्थलोऽप्यभिषिषेच तं तत्पदे
    नरः कुशलमश्नुते न खलु साहसिक्यादृते॥ **6.18** ॥ 183

स्त्रीहेतोः प्रथमं निजेन गुरुणा व्युत्पादितं ज्यायसः
    साम्राज्यानुभवे भवेदनुज इत्येतत् विगीतक्रमम्।
सुग्रीवे च विभीषणे च भगवानाम्रेडयामास तं
    भूमेः पुत्रि भवत्कृते पितृगुणः पुत्रे हि धत्ते पदम्॥ **6.19** ॥ 184

देवि त्वदर्थे दयितं नदीनां
    सतां शरण्यः शरणं स गच्छन्।
कुशेशयाक्षोऽपि कुशेशयत्वं
    प्राप त्वदावासपदाशयेव॥ **6.20** ॥ 185

प्रत्यानेतुमुपागताय भवतीमासन्नलङ्कोषितां
    वात्सल्यादिव ते विभागचकितो वारां निधिस्त्वद्गुरुः।
काकुत्स्थाय चिराय मार्गमदिशत् कालाग्निनेवामुना
    शोणाक्षेण रुषा शुशोषयिषितः सीते शितैः सायकैः॥ **6.21** ॥ 186

प्रपात्य महतो गिरीन् प्रसभमन्तरिन्द्रेण यो -
    ऽप्यधायि वसुधासुते तदनुजस्त्वदर्थं प्रभुः।
अमुं बहिरिलाधरैरपि दधन्निधिं पाथसां
    कपिव्रजकरार्पितैः किमिह शेषपूर्तिं व्यधात्॥ **6.22** ॥ 187

अङ्घ्र्योरक्ष्णोरपि किल फलं वानराणां नराणाम्
    आराद्राशिं तरितुमनसामम्भसामंहसां च।
मानार्हस्त्वामहित भवनाद्मानिनीमानिनीषुः
    काकुत्स्थोऽसौ जननि विदधे कौतुकात् सेतुकार्यम्॥ **6.23** ॥ 188

अन्तर्यः स्फुटमनलेन वारितोऽभूत्
विश्वेषां जननि विधातुमेष सेतुम्।
त्वल्लिप्साकुलरघुनाथचोदनातः
पाथोधिर्बहिरपि वारितो नलेन ॥ **6.24** ॥ 189

सेतुं देवि भवत्कृते रघुपतिः सृष्ट्वा जनांश्चापुनात्
एतेषां सगरान्ववायजनुषामेष स्वभावो ध्रुवम्।
स्वर्गादेव भगीरथः पितृकृते भर्गाच्च रोषाविलात्
आनीतैरपुनीत लोकमखिलं गाङ्गैस्तरङ्गैः कृती ॥ **6.25** ॥ 190

प्रभोरलङ्कोपनिरोधमम्ब
कृतेऽपराधेऽपि करिष्यसीति।
लङ्कोपरोधं रघुवीरदासा
हन्त त्वदर्थं हरयो वितेनुः ॥ **6.26** ॥ 191

प्रीतिं निनीषुः प्रियदेवतां त्वां
समुद्रतीरेऽभिचरन् स रामः।
महाहवं मैथिलि वर्धयिष्यन्
अयोमुखेन व्यलुनात् पलाशान् ॥ **6.27** ॥ 192

त्वल्लिप्सयैव धर्मे -
ष्वासक्तो विप्रयोगिवद्व्यसनी।
काञ्चन दानसमृद्धिं
भुवि वरदे विप्रहस्तमनयदिनः ॥ **6.28** ॥ 193

सदस्युदारेऽप्यतिकायमान
महालये सत्यभितो रणाग्रे।
जयश्रिया हन्त बलाद्वृतोऽपि
त्वय्येव विन्यस्तमनाः स नाथः ॥ **6.29** ॥ 194

विष्णुः स्वयं त्वद्विरहासहिष्णुः
अपांसुले हंसकुलावतंसः।
तपस्वरूपस्य कृतप्रभेदं
निनिन्द भूनन्दिनि मेघनादम्॥ **6.30** ॥ 195

उच्चैरावणपुष्टः
कुम्भस्तव देवि कुम्भिनीतनये।
सद्यस्स्तनवैरीति
क्रोधादेनं जघान रघुनाथः॥ **6.31** ॥ 196

लोकव्रातालम्भकं कुम्भकर्णं
लुम्पन्नम्ब त्वत्कृते रामचन्द्रः।
अर्थादेष त्वज्जनन्या धरण्या
भूरिं भारं देवि दूरीचकार॥ **6.32** ॥ 197

निर्णीय भूयस्तरपुण्यलभ्यं
रामः क्षमापुत्रि समागमं ते।
नीत्वाऽऽहवं पुण्यजनाननेकान्
अकारयत् स्वर्वनिताविवाहम्॥ **6.33** ॥ 198

धर्मं हि पूर्वमवलम्ब्य कृते जनन्याः
कालं निनाय कुतुकादधिकाननं यः।
देवि त्वदर्थमवलम्ब्य तमेव रामः
कालं निनाय कुतुकादधिकाननं सः॥ **6.34** ॥ 199

पापपङ्कनिरासहेतुना
सेतुना तव कृते महीसुते।
एत्य पापदशकं विनाशयन्
ईशिता चतुरतामदर्शयत्॥ **6.35** ॥ 200

परमार्थयितुं हुताशनात्
श्रियमिच्छेदिति साधुभाषितम्।
भवतीं श्रियमम्ब पावकात्
जगृहे जानकि लक्ष्मणाग्रजः॥ **6.36** ॥ 201

प्राणव्ययं कृतवतः प्लवगांस्त्वदर्थे
भूयोऽपि जानकि जिजीवयिषुः स रामः।
वव्रे वरं त्रिजगतां वरदोऽपि देवान्
कार्यार्थिनो हि पुरुषस्य कुतोऽवलेपः॥ **6.37** ॥ 202

काकुत्स्थः कमनीयभूषणमणिक्षौमाग्र्यहेमादिभिः
तोषं देवि निनाय वानरभटांस्त्वत्कार्यधुर्यान् प्रभुः।
एतद् युक्तमिदं तु विस्मयकरं यत् सर्वनिर्वाहिणे
रङ्गं हन्त विभीषणाय दिदिशे रत्नादियोग्याय सः॥ **6.38** ॥ 203

अवतारान् दश भगवान्
अपत्यभूतं जगत् समस्तं ते।
त्रातुं मातरकार्षीत्
त्वदिष्टकरणादृते न तस्य फलम्॥ **6.39** ॥ 204

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे यत्नस्तबकः षष्ठः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ मङ्गलाख्यस्तबकः सप्तमः ॥

भागधेयं भजेयं तत् फणिशैलकुटुम्बिनः।
मनीषिणो यदेवाहुः मङ्गलानां च मङ्गलम्॥ 7.1 ॥ 205

तनोति सिन्धोस्तनये कथञ्चित्
तवांशलेशो यदि सन्निधानम्।
तृणोऽपि माङ्गल्यमुपैत्यखर्वं
दूर्वादिरेवात्र निदर्शनं नः॥ 7.2 ॥ 206

गरुडध्वज वल्लभे शुभे
गणवर्णादिज दोष शान्तये।
वरदे तव वाचकं पदं
कवयः काव्यमुखे प्रयुञ्जते॥ 7.3 ॥ 207

विदुः पदाब्जं तव विश्वमङ्गलं
हरिप्रिये यत्परिवार वैभवात्।
समाश्रिता स्थाणुमपि श्मशानगं
जगत्यपर्णाऽजनि सर्वमङ्गला॥ 7.4 ॥ 208

तातो दुग्धपयोनिधिः सहभुवस्ते कौस्तुभाद्याः शुभाः
देवस्त्वव्यय दिव्य मङ्गलवपुः श्रीवत्सलक्ष्मा पतिः।
नाम श्रीरिति धाम पद्ममखिल क्षेमङ्करः पक्षिराट्
वाहः को हरिवल्लभे कथयितुं माङ्गल्यमीष्टे तव॥ 7.5 ॥ 209

यस्तु श्रीर्न पुरस्करोत्यविनयाद्धस्तु त्वदीयं शुभं
तस्मिन् नृत्यति दुर्गतिश्चिरतरं तत्र प्रमाणं तु नः।
दुर्वासः प्रतिघोद्गमादधिगतः स्वर्वासवत्त्वच्युतिं
दिव्यं माल्यमहो मदादगणयन् देवः शचीवल्लभः॥ **7.6** ॥ 210

दृष्टिः शिवोदयकरी करुणाभिरार्द्रा
युक्तं तवाम्ब भजते भवतारकत्वम्।
ज्येष्ठाश्रयोऽपि मघवान् स्तुतिभिस्तवाहो
प्राप्यातुलोऽजनि पुनर्वसुवर्गमुच्चम्॥ **7.7** ॥ 211

फणिशयदयिते तव स्तुतिः
भगवति पावनरीतिमाश्रिता।
अवितथमत एव तद्बलात्
शुभमगतोऽपि सुमङ्गलत्यहो॥ **7.8** ॥ 212

त्वद् भ्रातुरिन्दोरनुचारयोगात्
प्रायेण मूढोऽप्यशुभः कुजन्मा।
सुभूविभूषे स बुधाग्रगण्यो
बभूव जग्राह च मङ्गलाख्याम्॥ **7.9** ॥ 213

जगृहे क्वचिदच्युतोऽवतारे
जगतां मातरिनान्वयं पुरा यः।
तमजस्रमिनान्वयं नयन्ती
शिवतातं शिवतातिमातनोषि॥ **7.10** ॥ 214

कूत्पत्तिमूलमपि केशवपादपद्मं
कल्याणि ते शुभ कराम्बुज मेलनेन।
त्रैलोक्यमङ्गल मजीजनदब्धिकन्ये
तीर्थं शिवत्वपरिदायि कपालिनोऽपि॥ **7.11** ॥ 215

कन्ये दुग्धोदन्वतस्तावकीनं
मन्ये रूपं मङ्गलं मङ्गलानाम्।
यत्सावर्ण्यप्राप्तभद्रा हरिद्रा
सौमङ्गल्यं संविधत्ते वधूनाम्॥ **7.12**॥ 216

यस्ते रूपमुपास्ते
शुभं प्रपन्नं श्रियं हरिद्राजाम्।
तत्क्रतुनयेन स वहेत्
अमुत्र जननि श्रियं हरिद्राजाम्॥ **7.13**॥ 217

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे मङ्गलाख्यस्तबकः सप्तमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ सौन्दर्यस्तबकः अष्टमः ॥

वन्दे सौन्दर्यपर्याप्तिभूमिं कामपि देवताम्।
अब्जं सहोदरं यस्याः शंसन्त्यब्जशरं सुतम्॥ **8.1** ॥ 218

अद्वैतमक्षिभिरिह श्रवसां यदि स्यात्
    द्वैतं पृथग्यदि पुना रसनासु च स्यात्।
ईशीय वर्णयितुमर्णवराजकन्ये
    तत्तादृशं किल तवावयवाभिरूप्यम्॥ **8.2** ॥ 219

मौलौ त्वयाऽपि विधृतो मधुपौघ मैत्रीं
    चित्रं करोति कमले चिकुरप्रपञ्चः।
माने कृतेऽपि भजते मलिनैकसख्यं
    प्रायेण देवि कुटिलप्रकृतिः स्वभावः॥ **8.3** ॥ 220

न त्वं दधासि नवचम्पकमाल्यमम्ब
    कर्तुं निसर्गसुरभौ कबरे सुगन्धम्।
किं तर्हि कुन्तळपरीमळसारलाभ -
    लोभभ्रमद् भ्रमरलोकनिवारणाय॥ **8.4** ॥ 221

रुचं रचयितुं कचे रुचिरपुष्पवर्गैः समं
    सदा वहसि भूषणं सह सुधांशुना पूषणम्।
उभावभवतामतो जननि पुष्पवन्ताविमौ
    तयोर्घटनयोत्तमश्रियमुपैषि तत्रार्थिकीम्॥ **8.5** ॥ 222

सुमनोवरवासवासना -
ध्युषिताः कृष्णघनाप्तिशालिनः।
वरदे विजयन्ति कुन्तळा
भवदीयाः सकलापभृज्जयाः ॥ **8.6** ॥ 223

जलभृद्रुचिभाजि सिन्धुकन्ये
शिखिषु द्वेषमुपेयुषि प्रकामम्।
तमसाकलिते तवोपपन्नः
कुटिले कुन्तळमण्डलेऽहिबन्धः ॥ **8.7** ॥ 224

अलकाकृतिरग्र्यपुष्पकान्ता
प्रबलश्रीदतया तव प्रसिद्धा।
वरनीलरुचोज्ज्वला मुरारेः
वनिते भाति मुकुन्दलालितश्रीः ॥ **8.8** ॥ 225

भुवनोत्तरसिन्धुभूषितो
घनशैवालकवत् कचो ध्रुवम्।
सुरुचा महितो हिमालयो -
दितयोद्भासितमीनलाञ्छनः ॥ **8.9** ॥ 226

हन्त लक्ष्मि तव कुन्तलव्रजं
चामरं वदति पामरोऽपि कः।
प्राक्तनस्तु हरिणोपलालितः
पश्चिमं यदपुरस्कृतं मृगैः ॥ **8.10** ॥ 227

सिन्दूरकान्तां जगदम्ब मल्ली -
सराभिरामां चिकुरावलिं ते।
मन्यामहे देवि कलिन्दकन्यां
गङ्गासरस्वत्युदितानुषङ्गाम् ॥ **8.11** ॥ 228

सुतरामलकव्रजः प्रसूना -
न्यलमम्लानिविशोभितानि बिभ्रत्।
सुरभिस्फुरितः सुपुत्रि धात्र्याः
सुमहारामविभूषितो विभाति ॥ **8.12** ॥ 229

आपीडयन्ति कुसुमेषुशरा निकामम्
आत्मानमित्यखिलधात्रि रुषेव देवः।
आपीडयत्यनुदिनं तव कुन्तलात्म -
न्यन्धे तमस्यहह सूनकुलं मुकुन्दः ॥ **8.13** ॥ 230

बध्नासि हन्त सुरभौ सुमनोभिरम्ब
साकं हरेरपि मनस्तव केशपाशे।
आमोदमग्र्यमत एव तदेत्यनन्तं
किं न क्षमं गुणवदाश्रयणं गुणाय ॥ **8.14** ॥ 231

त्रैलोक्यमातरजहत्तरुशाखमेव
दृष्टं कुलं सुमनसां फलवद्धि लोके।
अप्याहृतं बहिरहो सफलं प्रसूनं
काल्पद्रुमं तु भवतीकचमण्डनेन ॥ **8.15** ॥ 232

सरैर्दिव्यैराम्रेडितसहजसौरभ्यसुभगं
कचं ते कल्याणि भ्रमति परितो भृङ्गनिचयः।
ध्रुवं तत्सारूप्यं स्वयमभिलषन् झङ्कृतिमिषात्
स्तुवन् प्रादक्षिण्यक्रममखिलमातः कलयति ॥ **8.16** ॥ 233

प्रभोर्नाभीपद्मं भ्रमरततिरुत्सृज्य पतति
स्थिरामोदालम्बे चिकुरनिकुरम्बे जननि ते।
मनागब्धेः कन्ये मधुरिपुसमीपे परिचयो
न रोचेत प्रायो ननु मधुपवर्गस्य मनसे ॥ **8.17** ॥ 234

क्षममिदं कलशोदधिकन्यके
तव कचस्थिरसौरभलोभतः।
विकचसूनविशेषपरीमळं
जहदिह व्रजति भ्रमरव्रजः॥ **8.18** ॥ 235

निहितास्तव कुन्तलान्धकारे
निबिडे मारजनि स्थिरप्रकर्षे।
कलयन्ति नवस्रजो विचित्रं
कमले कामपि सौरभानुवृत्तिम्॥ **8.19** ॥ 236

कुन्तळो नियमितोऽपि भवत्याः
चञ्चलो भवति तामसरुच्या।
न्यक्करोति परिशोभितमालो -
त्कर्षमम्ब परिपुष्यति चैनम्॥ **8.20** ॥ 237

कञ्जालये कमपि तावकफालभागं
सञ्जातशोभमलकावलिमेलनेन।
उत्प्रेक्षते भुवि न कस्तरुणेन्दुमब्धेः
उत्थानकालभवशैवलभारयोगम्॥ **8.21** ॥ 238

चिरं ते वक्त्रेण श्रितचिकुरवर्गेण कमले
तुलां चेदारोढुं तुहिनकिरणोऽयं स्पृहयते।
तदा गाढं सख्यं तिमिरनिकरैर्विन्दतु जवात्
अवाप्नोतु प्रावृड्जलमुगविनाभावमपि वा॥ **8.22** ॥ 239

पुरुषनयनयुग्मं पुष्पवन्तात्मकं ते
सह निवसति हर्षात् सन्ततं वक्त्रबिम्बे।
तदिह जलधिकन्ये तन्महादर्शलीलां
भजत इति कवीनां भारती सूनृतैव॥ **8.23** ॥ 240

आदर्शे प्रतिबिम्बमात्रकलनादारोप्य मुग्धा जनाः
　　मातस्त्वन्मुखकान्ति चौर्यमनघे मथ्नन्ति तं पाणिभिः।
हा सङ्क्रामति साधु तन्मलिनिमा हस्तेषु तेषां स्वयं
　　दद्यान्नूनमनेनसां हि कलुषं मिथ्याभिशंसञ्जनः॥ **8.24**॥ 241

विकचस्य कचोज्ज्वलेन पद्मे
　　विकलङ्केन कथं नु पङ्कभाजः।
सरसेनगतस्य नीरसत्त्वं
　　जलजातस्य भवन्मुखेन सख्यम्॥ **8.25**॥ 242

विजिते ननु ते मुखेन राज -
　　न्यपि दुर्गेश्वरमौलिपूज्यपादे।
वनवासितया तपस्स्पृहाणां
　　विजये को विशयः कुशेशयानाम्॥ **8.26**॥ 243

नदवनजमहो महातपश्री -
　　कृतरुचि ते मुखजन्म लिप्समानम्।
अपि यदि तदधःशिरस्तपस्येत्
　　जनवदनं कमले भवेत्तथापि॥ **8.27**॥ 244

तदब्जमब्जश्च तवाननद्विषौ
　　मुरारिपत्नि व्रजतः पराजयम्।
द्विषा सहैकेन मिथो विरोधिनोः
　　न योद्धुमस्ति प्रभुता द्वयोरपि॥ **8.28**॥ 245

त्वदास्यवसुतस्करं ध्रुवमवैमि जैवातृकं
　　पयोजनिलये यतः पिहितमन्दिरायां त्वयि।
असौ निशि विजृम्भते पुनरपावृते धाम्नि ते
　　पराचलवने रवेर्घृणिषु वा दिवा लीयते॥ **8.29**॥ 246

जन्ममन्दिरमशोकसम्पदः
सालकान्तमुरुकान्तिकन्दळम्।
आननं मदनकेळिकाननं
मन्यते जननि माधवस्तव ॥ **8.30** ॥ 247

स्वरूपतस्त्वद्वदनात्मना तथा
द्विधा सुधांशुर्जलधावजायत।
तदेष राजा द्विजराज इत्यदः
पदं दधात्यर्थवदच्युतप्रिये ॥ **8.31** ॥ 248

मातः सरोजसदने वदने त्वदीये
संफुल्लमुत्पलमिवाच्छसरोविशेषे।
चन्द्रे कलङ्क इव भृङ्ग इवारविन्दे
मन्देतरद्युतिरसौ तिलकः समिन्धे ॥ **8.32** ॥ 249

उपाश्रितानवयवमुद्गतश्रियं
प्रियङ्गुणादिकमणुमध्यमा शुभम्।
त्वमेयुषी वरतिलकानना रमे
सुधान्यभूरुचिरसुधाधराऽप्यसि ॥ **8.33** ॥ 250

नलिनशशिनौ सिन्धोः कन्ये सरोगनभोगता -
त्यजनकुतुकादेतौ जातौ त्वदक्षिमुखात्मना।
सह निवसतः सेतूकृत्य भ्रुवोर्युगमन्तरे
सहजरिपुताभाजोर्जन्मान्तरेऽपि न सङ्गतिः ॥ **8.34** ॥ 251

नयनयुगळाक्रान्तं कर्णान्तयुग्ममधोक्षज -
प्रणयिनि तव स्रष्टा दृष्ट्वा भयाकुलमानसः।
अहह मुखमप्याभ्यां मा क्राम्यशेषमिति न्यधात्
किमुपरि तयोर्धीमान् सीमाविभागशिले भ्रुवौ ॥ **8.35** ॥ 252

यत्किङ्कराः सरसिजासनशङ्कराद्याः
देवाः स एष दनुजारिरपि भ्रुवोस्ते।
जागर्ति किङ्करतया जगदम्ब नित्यं
छन्दानुवर्तनकृतः कुटिलस्य सर्वे ॥ **8.36** ॥ 253

श्रुत्यन्तजुष्टममलोत्तमकान्तियोगात्
अत्यन्तसुन्दरमनङ्गजनेर्निदानम्।
उद्भासितामरसभामहितं मदम्ब
को न स्तुवीत नयनं तव कृष्णरूपम् ॥ **8.37** ॥ 254

दुग्धाम्भोधिसुते त्वदक्षिविजितो राजानमेणो गतः
त्यक्त्वासावपि मण्डलं मुखजितो दुर्गेशमेणाश्रयः।
स त्वेकं करतः परं च शिरसा धृत्वा दृगास्यद्विषोः
दुर्गेशः स्वयमीश्वरोऽप्यटति खल्वद्यापि भिक्षामहो ॥ **8.38** ॥ 255

नयनं तव देवि वर्णरीतेः
विपरीतेऽपि विपर्ययं न याति।
कमलं तु समेति कञ्जगेहे
कथमाहुः समतां तयोः कवीन्द्राः ॥ **8.39** ॥ 256

निशायामम्ब त्वन्नयनसुषमामोषकमिति
क्रुधा नूनं राज्ञा कुवलयमिहाकारि विकचम्।
चकोरास्तच्चोराः चकितमनसः प्रेक्ष्य तदिदं
सुतप्तास्तत्पादं ग्रहणमभितन्वन्त्यशरणाः ॥ **8.40** ॥ 257

अमर्षाल्लोकाम्ब स्ववसुहरनीलोत्पलभृतोः
अपि श्रुत्योः सीमां कबलयति ते नेत्रयुगलम्।
कृतः कल्पेष्वार्तिं न परमपराधः फलति तत्
विपक्षाणां पक्षीकृतिरपि विषादाय भवति ॥ **8.41** ॥ 258

चक्षुः प्रमाणेन समुद्रकन्ये
　　सीमा श्रुतेः सङ्कुचिता तवाभूत्।
न तत्र कैमुत्यनयात् कथञ्चित्
　　उन्मेषमृच्छत्युपमानवार्ता॥ **8.42** ॥ 259

त्रैलोक्य सन्त्रायिणि तावकीनो
　　ध्रुवं कटाक्षो धृतराष्ट्रजातः।
कल्याणि कर्णप्रणयी कथं वा
　　पुष्णाति कृष्णार्जुनदीप्तियोगम्॥ **8.43** ॥ 260

आकर्णदेशादुदितप्रकर्षं
　　तवाक्षि मन्येऽतनुबाणरूपम्।
यत्कङ्कटं वेङ्कटनायकस्य
　　धैर्यात्मकं कृन्तति सिन्धुकन्ये॥ **8.44** ॥ 261

गुप्ता वनेषु विहरन्ति सुहृद्यमीनाः
　　कस्यापि नो कुवलयेषु दिवा प्रकाशः।
राज्ञो बिभेति जगदम्ब कुशेशयालिः
　　कर्णेजपे जयति नेत्रयुगे भवत्याः॥ **8.45** ॥ 262

आस्वादने कृतरसावधरामृतस्य
　　मातस्त्वदक्षिमधुपौ बत मार्गमध्ये।
नासाख्यचम्पकमवेक्ष्य निवृत्तयत्नौ
　　दृष्टेप्सिताग्रहणतस्तरलौ सदा स्तः॥ **8.46** ॥ 263

जातोन्मेषौ मुखरुचिसुधा सागरे तावकीनौ
　　नेत्रात्मानौ जननि भुवनोज्जीवनौ दिव्यमीनौ।
न्यूनाकारान् भगवति निजापेक्षया राक्षसारेः
　　चक्षुर्मीनान् कबलयत इत्येष जातिस्वभावः॥ **8.47** ॥ 264

सौवर्णं ते सिन्धुकन्ये निरुन्ध्यात्
आतङ्कं नः कर्णताटङ्कयुग्मम्।
नृत्यन्तीनां यत्र नेत्रद्युतीनां
जालं नीलग्रावभावं बिभर्ति॥ **8.48**॥ 265

पूषा कर्णे स्वर्णताटङ्कभूषा -
वेषादिन्धे पुत्रनामादरेण।
तत्सामीप्यादेव देवि प्रसादं
नित्यं धत्ते नेत्रपङ्केरुहं ते॥ **8.49**॥ 266

त्रैलोक्याम्ब त्वद्वतंसोत्पलान्ते
गुञ्जं गुञ्जं सञ्चरन् चञ्चरीकः।
किं व्याचष्टे कान्तसन्देशहारी
कर्णाभ्यर्णे काममन्त्रार्थतत्त्वम्॥ **8.50**॥ 267

काचिद्भाति वतंसकोत्पलमयी कल्याणताटङ्कसत् -
प्राकाराश्रितकर्णधिष्ण्यनिहिता प्रायः शतघ्नी रमे।
तद्रत्नाग्निरुचाऽरुणः स्मृतिभुवा तस्या मुखात् प्रेर्यते
लोलम्बायसगोळकः प्रणयिनो दुर्मानवर्मार्दनः॥ **8.51**॥ 268

कंसारातेश्चाटुमाध्वीझरैस्ते
कर्णौ पूर्णावर्णवेन्द्रस्य कन्ये।
जानन्तस्तत्सन्निधौ चञ्चरीकाः
चञ्चूर्यन्ते नोत्पलं तत्र हेतुः॥ **8.52**॥ 269

ग्रस्तवतंस कुवलयं
दृग्युगमुपकूजदलिरवमिषात् ते।
मद्वसुचोर इहेति
प्रवदति किल कर्णपत्रमित्राय॥ **8.53**॥ 270

इमामवामां श्रुतिमिन्दिरे तव
स्तुवन्ति सन्तः स्मृतिजन्मकारणम्।
शिरस्यमुष्याः सुमनोभिरञ्चिते
चकास्ति दृष्टिर्जगतामधीशितुः॥ **8.54** ॥ 271

तव द्वितीया श्रुतिरुच्चकैरसा -
वनङ्गभावानुगुणा गुणाम्बुधे।
वशे निधायैनमशेषशेषिणं
करोति मातस्तव कर्मकारकम्॥ **8.55** ॥ 272

दीव्यत्कर्णसुवर्ण कुण्डलमये दीप्ताग्निकुण्डे ज्वलत्
रत्नाङ्गारघने हरेर्धृतिमयीं हुत्वाऽऽहुतिं तावके।
भृङ्गाध्वर्युरनङ्गदीक्षितवृतो झङ्कारमन्त्रान् जपन्
वाराशेर्दुहितः प्रदक्षिणविधिं वारान् विधत्ते बहून्॥ **8.56** ॥ 273

देवानां मधुरं स्वतः स्तुतिवचो देवि स्वतो सुन्दरं
मादृग्बालकजल्पितं च जगतीमातः श्रुती याति ते।
तत्राद्यं तदवस्थमेव चरमं तत्तुल्यतां गाहते
मुक्तं शुक्तिषु मौक्तिकं घनपयो मुक्ता तु नैवान्यथा॥ **8.57** ॥ 274

स्फुरन्मुक्ताकान्तिस्फुरसलिलमग्र्यारुणमणि -
प्रभाकल्हाराढ्यं प्रियनयनमीनैकशरणम्।
हताशेषक्लान्तिं हरिदुपलनीलोत्पलघनं
तटाकं ताटङ्कान्तरमुषसि सेवे तव रमे॥ **8.58** ॥ 275

सुवर्णताटङ्कमुनिः श्रुतौ स्थिरः
प्रपन्नमुक्ताभ्युदयो दयोदधे।
प्रकाशितार्चिः सरणिः प्रिये हरेः
चकास्ति ते चक्रधराभिनन्दितः॥ **8.59** ॥ 276

तिलप्रसूनं तुलयत्यसौ जगत् -
सवित्रि नासा तव सारसालये।
तदञ्चलोदञ्चितुषारविप्रुषा
समानतामेति तदग्रमौक्तिकम् ॥ **8.60** ॥ 277

नासा तवासौ नववंशवल्ली
कासारजावासिनि कात्र शङ्का।
प्रलम्बते तत्र यदम्ब मुक्ता -
फलं बतेदं गलितं हि तस्याः ॥ **8.61** ॥ 278

श्रीरास्यकान्तिजलधौ स विभाति नासा -
सेतुस्तवाद्भुतगतिः कलनेन यस्य।
नाथः समेति न विदेहजयान्वयं हा
लङ्केशपाशकलनादपयात धैर्यः ॥ **8.62** ॥ 279

भ्रूसूत्राभ्यामूर्ध्वमाबध्य मिन्वन्
नासावंशस्तम्भमम्भोधिजे ते।
तत्र स्थित्वा ताण्डवं संविधत्ते
चित्रं क्रीडां चित्त भूनाट्यजीवी ॥ **8.63** ॥ 280

दिव्यं ददाति नवचम्पकमम्ब गन्धं
त्वद्घ्राणजन्मनि तदेव सुधाब्धिकन्ये।
गृह्णाति ते बहुविधं कृतिनो ददाना
जन्मान्तरे समधिकं विभवं लभन्ते ॥ **8.64** ॥ 281

मदनजननि नासामौक्तिकं वेद्मि मल्ली -
मुकुळमिति सुगन्धिश्वासमन्दानिलेन।
तदुपरि यदजस्रं तद्विकासप्रतीक्षं
दृगलियुगलमेतद् दृश्यते सावधानम् ॥ **8.65** ॥ 282

हसितरुचि सितांशुकं वसाना
    श्वसितसमीरनटेन नाट्यमाना।
जनयति जननि त्वदीयनासा -
    मणिगणिका मधुसूदनस्य मोदम्॥ **8.66** ॥ 283

मुखविधुमधुराऽधरोष्ठसन्ध्या -
    परिसरसीम्नि हरिप्रिये भवत्याः।
भजति जननि नासिकाग्रमुक्ता -
    फलमिह तारमुदार तारलीलाम्॥ **8.67** ॥ 284

स्वरिपुरदभिया विविक्षु नासा -
    बिलमिव मौक्तिकमेतदग्रलग्नम्।
सरसिजभवने निजप्रतीप -
    श्वसितनिवारितमम्ब कम्पमेति॥ **8.68** ॥ 285

भवती स्मितचन्द्रिका रमे
    भवतीसुन्दरदन्तरश्मिभिः।
भवतीयमकिञ्चनस्य मे
    भवतीव्रातपखेदशान्तये॥ **8.69** ॥ 286

हसितं भवदीयमाद्यवर्णं
    जहदेतज्जननि स्वरूपगत्या।
विदधे विधुपादजातमैत्री -
    मतिमन्दस्य किलोचिताधराप्तिः॥ **8.70** ॥ 287

मनोजमातस्तव मन्दहासं
    मन्ये मधुध्वंसन कीर्तिभासम्।
विसृत्वरं त्वद् रसनाग्रवृत्तेः
    वाग्देवताया वपुरंशुपूरम्॥ **8.71** ॥ 288

नासोरु मौक्तिक घृणिद्विगुणीकृतेन
　　हासोदयेन हसता सुषमां हिमांशोः।
हा हन्त सुन्दरि तवाधरबन्धुजीवः
　　पद्मे परिस्फुटमटीकत पाटलत्वम्॥ **8.72** ॥ 289

बालेन्दुकान्तिरिव पश्चिमसान्ध्यरागे
　　पद्मालये स्फटिकभा इव पद्मरागे।
प्रत्यग्रपुष्पसुषमेव च पल्लवाग्रे
　　भाति स्मितद्युतिरसावधरे भवत्याः॥ **8.73** ॥ 290

स्वाद्वी सुधा स्मितमिषेण सुधाब्धिकन्ये
　　प्रत्यक्षतस्त्वदधरे परिदृश्यतेऽसौ।
सिक्ता यया तव सदा स्वदते चटूक्तिः
　　मातः शुभाय मनसे मधुवैरिणोऽपि॥ **8.74** ॥ 291

मृद्वीकेयं न खलु भजते मृद्विकाराद्विशेषं
　　मन्ये पूरं मलिनमलिनामाकरं माकरन्दम्।
मातर्नैवाकलयति सिता माधुरी साधुरीतिं
　　हन्ताहन्तां तव सुवचने भाति मोचा मुमोच॥ **8.75** ॥ 292

हृत्वा वाचां रसमसदृशं हन्त पुण्ड्रेक्षवस्ते
　　मूढं मध्ये जठरकुहरं पाटवादूढवन्तः।
तं कृच्छ्रात् ते ददति च पुनर्दारिता दारुयन्त्रैः
　　मातर्देयं स्वयमददतां मर्दनं मार्दवाय॥ **8.76** ॥ 293

अभ्यातञ्च्य क्षीरधिमिन्दोरमृतौघैः
　　आमथ्यैनं देवि मथा चेक्षुमयेन।
तस्माद्देवैर्यद्युपनीतं नवनीतं
　　तिक्तीकुर्यादुक्तिरियं ते तदपि श्रीः॥ **8.77** ॥ 294

मातः समस्तजगतामसि माधवी त्वं
    मन्ये तवाधरदलं मृदुलं प्रवालम्।
दन्तावलिं सुमनसां ततिमुल्लिखामि
    स्वादूनि वेद्मि च मधूनि सुभाषितानि॥ **8.78**॥ 295

मातर्भवन्मुखमयूखसुधाब्धिमध्ये
    बिम्बाधरामृतमभूद्वचनामृतं च।
आद्यं तयोः पिबति सादरमाननेन
    श्रोत्रद्वयेन चरमं परमः पुमान् सः॥ **8.79**॥ 296

परिहृतभवशब्दा भारती तावकीना
    परिहसतु निकामं कालकण्ठाभिलापम्।
श्रुतिपथमधुरेयं सिन्धुकन्ये कथं वा
    शुकमुख फणितीनां दोषमाविष्करोति॥ **8.80**॥ 297

असङ्कोचां मोचा मधुरिममदोन्मोचनविधौ
    अनीचां ते वाचामहरहरहं नौमि लहरीम्।
उदूहे यां श्रोतुं कुतुकमुदधेः पुत्रि दधती
    श्रुतीभावं चक्षुःश्रुतिपतिदृशां विंशतिशती॥ **8.81**॥ 298

पर्यायः शर्करायाः प्रतिकृतिरमृतस्रोतसां तादृशानां
    साक्षी गोक्षीरभूम्नां सुरतरु सुमनो माक्षिकाणां विकारः।
पुण्ड्रेक्षूणां प्रणाली परिणतिरतुला नालिकेरोदकानां
    सोऽयं नालीकगेहे जयति तव वचः संपदां संप्रदायः॥ **8.82**॥ 299

सुता सुधाब्धेः सहजा हिमांशोः
    मातः प्रिया त्वं मधुराधिपस्य।
तथाविधायास्तव के नु वीचीं
    आचान्तमोचां न वदन्ति वाचाम्॥ **8.83**॥ 300

द्राक्षालिरादौ किल रूपयुक्ता
    मध्येऽधिकेक्षुप्रभवा सिता च।
हास्या सुधाप्यग्रजनाभियुक्ता
    स्वादौ रमे जाग्रति वाग्रसे ते ॥ **8.84** ॥ 301

निःसार वंशजठरे न्यविशन्त हन्त
    दन्तद्युति प्रतिभटास्तव मौक्तिकौघाः।
मातर्द्विजव्रज विरोधितया स्थितानां
    मातङ्ग मौलिकलनाऽप्युचितैव तेषाम् ॥ **8.85** ॥ 302

रमे रसज्ञाञ्चलशारदाया
    रदावली ते रमणीय रूपा।
मधुप्रतिक्षेपि मनोऽनुकूले
    मन्दारमालेव शुभा विभाति ॥ **8.86** ॥ 303

प्रकाशते सज्जघनागमे त्वयि
    प्रगल्भशोभोदयिनी रदावलिः।
रमे मुकुन्देन किलामुना धृता
    द्युतिर्यदीया सहसोन्मिषन्मुदा ॥ **8.87** ॥ 304

आप्तीकृतानाममुकेन हार्दान्
    सदा मुकुन्देन सदादृतानाम्।
शुचिद्विजानां ननु तावकानां
    मुक्ताकृतिर्विश्वसवित्रि युक्ता ॥ **8.88** ॥ 305

हन्तारस्तमसां दिशन्तु कमले दन्ता मुदं तावकाः
    येषूद्दामजपासपक्ष रसनाच्छायोपरक्तांशुषु।
उच्चैः पक्त्रिम दाडिम भ्रमवशादुत्पित्सुकेली शुक -
    प्रत्यावर्तन खेद निःसहतया पाणिर्विशेषारुणः ॥ **8.89** ॥ 306

कन्ये सिन्धोः काऽपि मृद्वी सुहृद्यां
    दद्याद्धिद्यां त्वद्रसज्ञा मनोज्ञा।
यत्र व्यक्तो रक्तिमा वक्ति मातः
    वाचां देव्या नित्यनृत्ताभिघातम्॥ **8.90**॥ 307

प्रह्वा जिह्वां तव तु शरणीकुर्महे शर्महेतुं
    रागादागांस्युपचितवतो रक्षितुं या रमे नः।
वारं वारं वृषगिरिपतेः कोपलोपानुरूपाः
    सूक्तीरुक्त्वा नियतमयते शोणिमानं श्रमेण॥ **8.91**॥ 308

कंसद्विषो महिषि कानन चन्द्रिकेति
    दोषं विहाय रसनामवनात्मिकां ते।
प्राप्ताऽपि पद्मजवधूर्वनजौकसस्ते
    सङ्गादिवाधिकवनस्थितिमेति भूयः॥ **8.92**॥ 309

अभ्यर्चतामनघ वाङ्मयसारदाया
    रूपं रुचा तुलित शारदनीरदायाः।
वन्दीभवत्प्रथित तुम्बुरुनारदायाः
    वन्दे तवाम्ब रसनाञ्चलशारदायाः॥ **8.93**॥ 310

मुकुन्दकान्ते मुखपद्मकान्तेः
    तवाधरोऽयं तरुणातपो वा।
आनन्दकल्यावसरे मुरारेः
    आविर्भवत् प्रागरुणोदयो वा॥ **8.94**॥ 311

बिम्बोष्ठयोः पृथगवस्थितयोः कदाचित्
    सन्धौ कृते जननि साधुपदे निविष्टैः।
ओष्ठस्तवैष वितरन्निजमुख्यवर्णं
    बिम्बाय लुम्पति च तस्य जघन्यवर्णम्॥ **8.95**॥ 312

वैकुण्ठकान्ते वचनाधरौ द्वौ
वक्त्रे तवास्ताममृतावतारौ।
आद्ये तु वर्णः शुकलालितोऽभूत्
अन्त्ये पुनः किंशुकलालनीयः॥ **8.96** ॥ 313

रागावनेरपि तवाधर जीवकस्य
राजीववासिनि निराकृतपल्लवस्य।
अच्छैर्द्विजैः परिचयादमृतस्य रीतिं
आरोहतः समुचितोऽरुणबिम्ब भेदः॥ **8.97** ॥ 314

तव रदवसने गुणोत्तरेऽस्मिन्
अधरपदस्य विरोधि लक्षणैव।
अमृतकृदपि माधवो मुनीनाम्
अमृतमुपैतुममुं निषेवते यत्॥ **8.98** ॥ 315

हरिगृहिणि हरिद्रा लिप्तया शम्पया ते
तनुमतनुत वेधास्तप्तकार्तस्वराभाम्।
अधरमथ च तत्राप्यम्ब लिम्पन् सुधौघैः
अनयदनणिमानं शोणिमानं किमेनम्॥ **8.99** ॥ 316

प्रायस्ते जगदम्ब चुम्बनविधौ बिम्बाधरालम्बनं
सङ्क्रान्तं मधु नन्दनन्दनमुखे सङ्गीतकाले पुनः।
तस्माद्वेणुमवाप तद्गतरसास्वादी तदादित्सया
वंशान् कृष्णपुरन्ध्रि रन्ध्रयति किं तद्वंशजातानलिः॥ **8.100** ॥ 317

विद्वज्जनै रुचिरविद्रुम पङ्क्तिरेषा
विज्ञायतां मदधरादधरा किलेति।
प्रत्यक्षतः प्रकटनाय पयोधिकन्ये
कण्ठे बिभर्षि किल विद्रुममालिकां त्वम्॥ **8.101** ॥ 318

कपोलौ ते मातः कनकमयताटङ्क सुषमा -
झराघातारक्तौ जनजननि यत्रैव निहिताः।
अपि प्रौढेन्द्रद्विद्विरिवृढवपुः पाटनखराः
समाख्यामन्वर्थां दधति नरसिंहस्य नखराः ॥ **8.102** ॥ 319

कान्तौ मातः कपोलौ तव यदुपगतां कर्णरत्नांशु पूरं
संप्राप्तं चुम्बनेषु प्रियतमवदनादम्ब ताम्बूलरागम्।
मत्वा हस्ताङ्गुलीभिस्त्वमसनरुचिभिर्मार्जनैर्द्विस्त्रिरुक्तं
तं दृष्ट्वा दर्पणे ह्रीभरनमितमुखी हास्यते प्रातराल्या ॥ **8.103** ॥ 320

पाण्डिम्ना हसतेव कैटभरिपुः पाणिस्थशङ्खेन तं
पद्मावासिनि पर्यजीहसदसौ स्यालं हि जैवातृकम्।
हित्वेशं प्रभुरित्यमुं प्रति परीहासाय वक्त्रात्मना
जातेनैवमधः कृतो हिमरुचा त्वत्कन्धरात्मा दरः ॥ **8.104** ॥ 321

अन्तः स्थोष्मोद्धाराद्
गृहीतमखिलाम्ब कंसदमनेन।
पाञ्चशरजन्यमभितः
प्रतिगर्जति कन्धरा त्वदीयेयम् ॥ **8.105** ॥ 322

चक्राङ्कतामुपगतं स्तनमुन्नतं ते
वीक्ष्यातितिक्षुरयमुच्छ्रयवांस्ततोऽपि।
कण्ठत्वमेत्य शिरसा निजभुक्तमुक्ता -
हारं च वाहयति तेन तवाम्ब शङ्खः ॥ **8.106** ॥ 323

जनस्त्रिलोकीजननि स्तनौ ते
कथं पयोजे कथयत्यशेषः।
चतुर्मुखाद्यर्भक जीवनाय
जातं तयोरेव पयो हि भूयः ॥ **8.107** ॥ 324

अमृतकलशव्यूहेष्वात्मोद्भवेषु पयोधिना
त्वयि कुचमिषाद्द्वौ निक्षिप्तौ विवर्धयितुं जगत्।
अमृतसहजे यद्दुग्धास्वादनोल्बणपाण्डिम -
द्रुहिणरसनावासाद्गौरी बभूव सरस्वती ॥ **8.108** ॥ 325

न जातुचिद्वर्णविपर्ययं गतौ
गुणोत्तरौ कन्दुककञ्चुकौ तयोः।
स्वमित्रमाद्यं कुरुते रमेऽन्तिमं
बिभर्ति मूर्ध्ना त्वदुरोज भूमिभृत् ॥ **8.109** ॥ 326

पुरस्त्वदीयाङ्ग पुरप्रवेशे
पुराणगोपाल भृतावनङ्गः।
उरोरुहक्षीरघटौ च पश्यन्
उच्चैस्तरां नन्दति सिन्धुकन्ये ॥ **8.110** ॥ 327

पुष्पेषु पूजाविधिमाचरिष्यन्
पुण्याहकुम्भाविव पद्मनाभः।
पयोनिधेः पुत्रि महाक्षतैस्ते
पयोधरावम्ब परिष्करोति ॥ **8.111** ॥ 328

परामिमामुन्नतिमश्नुवाते
स्मराम्ब सद्यः स्तनभूभृतौ ते।
चराचराणामधिपोऽपि चक्री
करार्पणं देवि ययोः करोति ॥ **8.112** ॥ 329

हन्त स्तनौ तव विभागकथानभिज्ञौ
कन्दर्पमातरत एव करादिषु त्वम्।
अङ्गान्तरेषु पृथगाभरणं ददाना
हारं द्वयोरपि तयोरपृथग् ददासि ॥ **8.113** ॥ 330

मुष्णाति मेदिनिभृतां श्रियमुन्नतानां
    सूर्याश्रितं परिहसत्यपि साधुचक्रम्।
ऊर्ध्वं च पश्यति रमे त्वदुरोजयुग्मं
    ईदृक् चरित्रमविवेकिनि नैव चित्रम्॥ **8.114** ॥ 331

उच्चैरतन्वाज्यवतीर्णशक्त्योः
    भूयांसि पातुं क्षमयोः पयांसि।
मातर्महाहारसमृद्धिभाजोः
    युक्तं हि पीनत्वमुरोजयोस्ते॥ **8.115** ॥ 332

विवेकवार्ता विरहेऽपि पद्मे
    गुरुत्व भाजोऽस्य कुचद्वयस्य।
गिर्युत्तमा बिभ्रति शिष्यभावं
    क्षमाधराणां क्षममेतदेषाम्॥ **8.116** ॥ 333

रमे कराभ्यां रचितार्दनस्य
    त्रैलोक्यभिक्षोरतनुप्रदानम्।
स्तनावुदारौ तनुतस्तवेमौ
    तृणीकृताष्टापदशैलशृङ्गौ॥ **8.117** ॥ 334

कुचौ हिरण्याचल सम्पदं ते
    प्रह्लादहेतू नियतं भजेते।
तनोति मातस्तत एव नूनं
    नृकेसरी तत्र नखक्षतानि॥ **8.118** ॥ 335

उत्तुङ्गयोस्तुल्यमुरोजयोस्ते
    गदन्ति खर्वं कथमम्ब कुम्भम्।
तत्कार्यभूतः कथयत्यगस्त्यः
    तत्र स्वहेतौ परिमाणमेतत्॥ **8.119** ॥ 336

रतव्रतारम्भ कृते रतीशो
　　हरिद्रया लिप्तमधोक्षजाय।
माता रमे मङ्गलनालिकेर -
　　युगं ददौ किं त्वदुरोजयुग्मम्॥ **8.120** ॥ 337

तवायमम्ब स्तनयोः सखायौ
　　दधाति कुम्भौ शिरसेति नूनम्।
ग्राहग्रहात् त्रातुमहो गजेन्द्रं
　　त्वरा हरेः क्वापि पुराऽविरासीत्॥ **8.121** ॥ 338

उरोजयुग्मं तव युक्तिभूम्ना
　　करीन्द्रकुम्भौ कथयन्ति मातः।
आभाति तस्योपरि मौक्तिकश्री
　　रोमालिशुण्डा च लसत्युपान्ते॥ **8.122** ॥ 339

चन्द्रेण चक्रमिथुनं कृतविप्रयोग -
　　त्रासादपेक्षित तदीयजनावलम्बम्।
वक्षोरुहद्वयमिषेण विधुस्वसस्ते
　　प्राप्याङ्कमृच्छति निरन्तरसङ्गतिं तत्॥ **8.123** ॥ 340

सोढुं कराभिहतिमप्रभवन् वधूनां
　　द्राक् कन्दुकः स्तनतयाऽम्ब तवावतीर्णः।
तत्राप्यहो भजति शौरिकरोपमर्दं
　　क्षिप्तः सुदृग्भिरयते क्व न मर्दनानि॥ **8.124** ॥ 341

नित्योल्लसद्घुसृण धातुनिवेशहृद्यौ
　　मातस्तव स्तनगिरी जयतः कठोरौ।
अध्यापितं कठिनतामरविन्दनाभेः
　　आलिङ्गनेषु किल येन भुजान्तरालम्॥ **8.125** ॥ 342

घटिकाशतकश्रुतोच्छ्रयं
धनसाहित्यमदः स्तनद्वयम्।
कुरुते कविचक्र निर्जयं
कमले कान्तगुरुप्रभोदयम्॥ **8.126**॥ 343

सुरतरुचिरलीला शोभितोऽसाविति श्रीः
पृथुलकुचयुगं त्वं प्रेयसे देवि दत्से।
स तु तदपि गृहीत्वा चापलादम्बरं ते
हरति परहिरण्यं हर्तुरेष स्वभावः॥ **8.127**॥ 344

उन्नमत्सरमनुन्नमत्सरं
कन्दुके कलशसिन्धुकन्यके।
पीनतोषितमपीनतोषितं
भाति ते युगमुरोरुहो रहो॥ **8.128**॥ 345

उदग्रहारं कुचमण्डलं ते
जनार्दनो देवि जगत्यधीशः।
निपीडयत्येष करग्रहेण
कारुण्यवार्ता क्व हिरण्यहर्तुः॥ **8.129**॥ 346

मदम्ब भोग्यायतमाल्यजुष्टे
तव स्तनद्वन्द्व गिरीशमौलौ।
निकाममुद् वृत्ततया निपत्य
लुठत्यसौ हारसुरस्रवन्ती॥ **8.130**॥ 347

पीतस्तनस्ते कमले शिशुत्वे
पितामहः सोऽजनि नित्यतृप्तः।
सदा तदास्वादकरः समुक्ता -
हारोऽम्ब केनाप तथाभिधानम्॥ **8.131**॥ 348

कल्याणि भावत्क कुचाग्रजाग्र -
    त्प्रत्यग्रहार स्फुटमौक्तिकानि।
प्रायः सुमेरुं परितश्चरन्ति
    पट्टून्युडूनीव परिस्फुरन्ति ॥ **8.132** ॥ 349

स्तनयोरनयोस्तवाम्बुराशे -
    स्तनये दीव्यति दिव्यहारयष्टिः।
परितः पृथुलारविन्दकोशं
    प्रचलन्ती कलहंसमालिकेव ॥ **8.133** ॥ 350

मदनोपवने मदम्ब देहे
    तव बाहे कृतवल्लिका विमोहे।
नव पल्लव फुल्लपुष्प भूयं
    यदुपर्यङ्गुलयो नखाश्च यान्ति ॥ **8.134** ॥ 351

अम्भोजबन्धुरयमम्बुरुहान् दवीयान्
    तत्सन्निधिं जिगमिषुस्तनये पयोधेः।
अम्भोजमम्ब तव हस्ततयाऽवतीर्णं
    सौवर्णकङ्कणमिषान्निकषा समिन्धे ॥ **8.135** ॥ 352

आम्रेडित त्वत्कर पद्मरागः
    अत्युज्ज्वलैः कङ्कणपद्मरागैः।
लीलाशुको दाडिमबीजलुब्धो
    विश्वम्भरप्रेयसि विप्रलब्धः ॥ **8.136** ॥ 353

कृताञ्चनौ काञ्चन कङ्कणस्थ -
    सङ्क्रन्दनग्रावमहस्तरङ्गैः।
कल्याणि पाणी कनतस्तरां ते
    शैवालमालाभिरिवारविन्दे ॥ **8.137** ॥ 354

इन्धे तावकपाणिशोणिमभरः कल्याणि नैसर्गिकः
पद्मे कङ्कणपद्मरागकिरण श्रेणीभिराप्यायितः।
तत्संरूढबिडाललोचन सुहृद्वैदूर्यवीक्षाभयाद् -
गच्छद्विभ्रमकीरवारणघनायासेन चाम्रेडितः॥ **8.138**॥ 355

काञ्चीकवीन्द्रकवनादपि कोमलं ते
कल्याणि पाणितलमम्बुजनाभकान्ते।
अश्रान्तमर्थिषु बहुष्वभितन्यमान -
दानश्रमादरुणिमानमुपैति नूनम्॥ **8.139**॥ 356

न केवलं नागनगेशकान्ते
हस्तो ननु स्वर्णगतोऽधिकस्ते।
यं संप्रदानीकुरुते स निःस्वं
सोऽपि क्षितौ स्वर्णगतोऽधिकः स्यात्॥ **8.140**॥ 357

असावनष्टापदमर्थिनं द्राक्
अष्टापदावासमहो विधाय।
आपत्कथादूरगमब्धिकन्ये
करोति कल्याणि करस्त्वदीयः॥ **8.141**॥ 358

दीना दानैस्त्वत्कराब्जादुपात्तैः
देवि स्थाने स्वर्णवत्त्वं प्रपन्नाः।
आसन्नेते सिन्धुकन्ये नदीनाः
चित्रं नित्यं भान्ति लक्ष्मीकुमाराः॥ **8.142**॥ 359

कनत्कनककङ्कणोल्बणमणीघृणि श्रेणिका -
महासरिदुदञ्चितं मकरमत्स्यरेखावृतम्।
प्रसह्य मधुनाशनं कृतवतैव कृष्णेन ते
कराम्बुरुहमिन्दिरे कलितपीडनं राजते॥ **8.143**॥ 360

स्वर्णस्फुरद्बहुविधोर्मिकमब्धिकन्ये
रत्नाकरं तव करं निगदन्ति सन्तः।
आक्रान्तसर्वभुवनो हि जनार्दनोऽसौ
दुर्धर्षतां व्रजति यस्य परिग्रहेण॥ **8.144** ॥ 361

पालकं सुमनसां तव स्थिर -
च्छायमब्धितनये समाश्रये।
पञ्चशाखमिह भव्यकल्पकं
दानवारिपद पोषणक्षमम्॥ **8.145** ॥ 362

जननि मरकतादिः सार्द्धमारक्तरत्नैः
विधुमुखि निहितस्ते व्यर्थमेवोर्मिकासु।
प्रसृमरकरदीधित्यङ्कुरैरङ्गुलीनां
परिभजति यतोऽसौ पद्मरागाविशेषम्॥ **8.146** ॥ 363

रागं रमे तव शुभाङ्गुलिसङ्गलब्धं
वीटी मुरान्तकमुखे प्रकटीकरोति।
मुक्तासवर्णनवचूर्णगनागवल्ली
पर्णात्मना न खलु रागकथान्यथाऽस्याः॥ **8.147** ॥ 364

भवान्धकूपे पतिताय मह्यं
दुर्मोचकर्मोत्कर कर्कशाय।
करावलम्बं कमले ददासि
तदञ्चलं ते तत एव रक्तम्॥ **8.148** ॥ 365

दधति नखास्तवाम्ब तनुहेमलताभभुजा -
रुचिरकरारविन्दचलदङ्गुलिकोटिजुषः।
सरयसरस्वती झरसमापतनोपनत -
ह्रदतनुवीचिकाञ्चल समुज्ज्वलफेनतुलाम्॥ **8.149** ॥ 366

समाननामा स विधुः समानशो
    दशेह भावानिति मातरीर्ष्यया।
प्रशस्तयोस्तावकहस्तयोर्विधुः
    दशावतारान् विदधे नखात्मना ॥ **8.150** ॥ 367

विभाति वाराशिवरेण्यकन्या
    प्रशस्तहस्तोल्लसितो नखात्मा।
विधुर्विचित्रागम एव नूनं
    नाऽसौ तुलामेति यतः कदाऽपि ॥ **8.151** ॥ 368

क्षत्रं तदेव कथयन्ति बुधाः क्षतेभ्यो
    यत्रायते यदुपतेर्दयिते ततोऽहम्।
यत्प्रत्युत क्षतशतं तनुते प्रियाङ्गे
    नक्षत्रमेव तदवैमि नखं त्वदीयम् ॥ **8.152** ॥ 369

पाथोजाक्षभुजान्तरालवसतेः पद्मालयायाश्चिरं
    पाण्योर्दक्षिणवामयोः स्थितिमती पद्मे दिशेतां श्रियम्।
यत्रैकं हरिदृश्ययोर्मुकुलितं खेदाददाक्षिण्यवत्
    योगोत्थाद् ध्रुवमन्यदेति हसितं दाक्षिण्यशाल्याश्रयात् ॥ **8.153** ॥ 370

रोमालिं द्रागुद्गतां नाभिरन्ध्राद्
    व्यालीं विद्मः पद्मगेहे भवत्याः।
गाढोरोजस्मेर हाराग्रजाग्रत्
    रत्नं नूत्नं तच्छिरस्यं प्रतीमः ॥ **8.154** ॥ 371

शौरेः सूरात्मनोऽक्ष्णः समजनि यमुनेत्युद्गतेर्ष्येव गङ्गा
    जाताङ्घ्रौ तस्य गौणी किल तदपि तवापत्यतेऽन्यत्र निन्दाम्।
तस्याः कर्तुं तवासौ किमभवदुदरे भानुजा रोमराजी -
    व्याजाद्धिश्वाम्ब पत्न्या विदुरुदरभवं मुख्यवृत्त्या ह्यपत्यम् ॥ **8.155** ॥ 372

जेतुं कंसारिमाराद्व्यवसितमधिकामाजि सङ्गस्तनक्ष्मा -
    भृद्भ्यामभ्याशदेशे तव जयति तयो रोमरेखा शतघ्नी।
दत्ते नाभी रमे सज्जघनधरणिभृन्मण्डले यन्मुखोद्यत्
    तप्तायः पिण्डपातस्थलनियम कृते क्लृप्तगर्तप्रतीतिम्॥ **8.156**॥ 373

अभ्युद्गताधर रस ग्रहणाय रोम -
    रेखाषडङ्घ्रिततिरम्ब पथि प्ररूढम्।
उत्तुङ्गसङ्गतमुरोजगिरीन्द्रयुग्मम्
    उल्लङ्घितं चिरमुपायमुदीक्षते किम्॥ **8.157**॥ 374

रत्नावली तव रमे वरमेखलायाम्
    अङ्गारपङ्क्तिरविदूरगता तु तस्याः।
रोमावली तदुपजातविशीर्णमूल -
    धूमाकृतिं वहति शक्रमणीव नीला॥ **8.158**॥ 375

निःश्रेणिका नाथदृशोरुरोज -
    दुर्गाधिरोहे तव रोमरेखा।
लावण्यलक्ष्मी वरवेणिका वा
    रतीशभूपाल कृपाणिका वा॥ **8.159**॥ 376

स त्वद्गर्भसमुद्भवोऽप्ययुतशुक्सन्दायकैः सायकैः
    पञ्चेषुः पितरञ्च वञ्चयति तत्पञ्चायुधं माधवम्।
लग्ना नूनमतो जगज्जननि ते रोमावलिच्छद्मना
    तातद्रोहिसुतप्रसूत्युपनता दुष्कीर्तिरेवोदरे॥ **8.160**॥ 377

रज्जुं रोमालिरूपां गुरुकुचकलशालम्बिनीं जीवनार्थी
    प्रातस्त्वन्नाभिवापीपरिसरमनयन्मन्मथो जाततृष्णः।
दृष्ट्वा तामत्यगाधामिह न पुनरलं दैर्घ्यमस्या इति श्रीः
    तामौज्झत्तत्र रज्जुं न तृष उपरतिः शम्बरध्वंसिनः स्यात्॥ **8.161**॥ 378

ऋत्विग्रमे रतिमखे ननु यौवनात्मा
नाभीबिलावटयुतोदरवेदिकायाम्।
यूपं तनोति तव रोमलतास्वरूपं
शङ्केऽस्य सङ्गतमुरोजयुगं चषालम्॥ **8.162**॥ 379

रतीशमातस्तव रोमवल्लिका -
मयी मनोज्ञा यमुना पुनातु माम्।
वलित्रयं यत्र तरङ्गविभ्रमं
बिभर्ति हारांशुचयश्च फेनताम्॥ **8.163**॥ 380

स्तनाद्रिभाजि स्थिरहारशोभा -
सुधाम्बुधौ रोमलता मुरारेः।
वटच्छदः स्यादुदरं तवाम्ब
वलित्रयं चित्रमिहोपधानम्॥ **8.164**॥ 381

नाभीसरोरोधसि नालिकेर -
द्रुमभ्रमं रोमलता ददाति।
तदग्रलग्नौ तनुतस्तव श्रीः
स्तनौ पुनस्तत्फलयुग्मशङ्काम्॥ **8.165**॥ 382

नाभीसरश्चिरमगाधतरं विधाय
नारायणप्रणयिनि श्रमिणा विधात्रा।
रोमावली तव विभाति तटे तदीये
क्षिप्तेव तत्खननहेतुरयः शलाका॥ **8.166**॥ 383

सरितो गिरितोऽवतीर्य निम्नं
प्रविशन्त्यम्ब तवात्र नाभिगर्तात्।
तनुरोमलता कलिन्दजाऽहो
स्तनशैलान्तिकमारुरुक्षतीव॥ **8.167**॥ 384

दायादः पितुरेष नाभिकमले दामोदरस्यैधते
धातेत्येवमसूययेव जननि प्रेप्सुस्ततोऽप्युच्छ्रयम्।
नाभीकूपसमुत्थरोमलतिका नालाग्रजाताद्भुत -
स्फारोरोज सरोज कोशयुगमध्यास्ते सुतस्ते स्मरः॥ **8.168** ॥ 385

जगत्त्रयी चेतन जन्महेतौ
वलित्रयी भाति तवोदरेऽस्मिन्।
नारायणप्रेयसि नाभिकूप -
निपानसोपानपरम्परेव॥ **8.169** ॥ 386

जित्वा जगन्ति विशिखैर्जगदम्ब जैत्र -
स्तम्भं तवाङ्गभुवि रोमलताच्छलेन।
मिन्वन् मनोजनृपतिर्जितलोकसङ्ख्यां
मूले किमस्य तिसृभिर्व्यलिखद्वलीभिः॥ **8.170** ॥ 387

स्नातस्य नाभिसरसि ध्रुवमब्धिकन्ये
सञ्जग्मुषो रतिपतिव्रतिनः समाधिम्।
आषाढमेव कलये तव रोमराजिम्
अस्या वलित्रितयमस्य च दर्भकूर्चम्॥ **8.171** ॥ 388

नाभीवापीसविधभुवि ते यौवनारामवृद्ध्यै
न्यस्तं रोमावलिमय घटीयन्त्रदारु स्मरेण।
मूले तस्य स्फुरति रचितं पादविन्यासहेतोः
सोपानानां त्रितयमुदधेः पुत्रि वल्यात्मना किम्॥ **8.172** ॥ 389

दीर्घं नाभीविवरसरसो देवि गम्भीरिमाणं
स्पष्टं द्रष्टुं वृषगिरिपतेरक्षमावक्षमीनौ।
गाम्भीर्यैकास्पदमपि रसैः पूरितं मानसं यत्
तस्य स्वैरं पतति जलधेः पुत्रि तत्रैव नित्यम्॥ **8.173** ॥ 390

आश्रित्य सज्जघन हस्तिगिरिस्थितायां
पञ्चायुधो भृशमुदञ्चति देवि काञ्च्याम्।
नाभीमनन्तसरसीं कलये खगेन्द्र -
स्तम्भं च रोमलतिकां वलिधिष्ण्यभाजम्॥ **8.174** ॥ 391

जघनपुलिनवत्यां केशशैवालभाजि
त्रियुगनयनमीनैस्तृष्णया सेवितायाम्।
त्वयि रसभरितायां दिव्य सौन्दर्यसिन्धौ
नलिनमुखि विधत्ते नाभिरावर्तशोभाम्॥ **8.175** ॥ 392

त्वन्मध्ययष्टिं परिवेष्ट्य शेते
नाभीबिलान्ते रशनापृदाकुः।
असावपूर्वः कमले यदीया -
न्यङ्गानि सर्वाणि च रत्नवन्ति॥ **8.176** ॥ 393

मध्यात्मना जननि शब्दगुणेन योगात्
जग्राह शब्दमतुलं रशनागुणस्ते।
शौरेश्श्रवो वियति सौति सुखं स शब्दैः
तुष्ट्यै विशिष्य किल शिष्यगिरो गुरोः स्युः॥ **8.177** ॥ 394

रतितन्त्ररहस्यमम्ब शब्दैः
रमणीयैर्विशदं प्रकाशयन्ती।
रसनैव रतिप्रियस्य नूनं
रशनाऽसाविति लेखकप्रमादः॥ **8.178** ॥ 395

उपाश्रिता मध्यममब्धिकन्यके
निजप्रभाभिः शमितोत्तमस्थितिः।
असौ कृतश्रीमदनादरा रमे
न मेखला न प्रतिभाति मे खला॥ **8.179** ॥ 396

यदनन्तपाणिनिहितं सुमध्यमे
    वलते सुवर्णमयसूत्रमम्ब ते।
गुणवृद्धिमान् प्रकृतिशोभनोऽमुना
    नियतं सुशब्दनिचयोऽभिधीयते ॥ **8.180** ॥ 397

श्रुतिमञ्जुनादनिचयैरभिरामा
    सवलग्ननाभिजघनद्युतिहेतुः।
विलसत्यनन्तसरसाक्षियुगाय
    स्वदते मुकुन्ददयिते तव काञ्ची ॥ **8.181** ॥ 398

काञ्चीं मुक्तिक्षेत्रमाहुर्जगत्यां
    इन्धे चित्रा तावकी देवि काञ्ची।
अप्यार्याणां योगिनां मुक्तिहेतोः
    चेतो यस्यां बध्यते तार्क्ष्यकेतोः ॥ **8.182** ॥ 399

लब्धवासमधिकाञ्चि देवि सत्
    रत्नजातमभिजातदीप्तिकृत्।
कंसहिंसनकटाक्षपात्रतां
    विन्दतीति क इवात्र विस्मयः ॥ **8.183** ॥ 400

अल्पादल्पं त्वद्वलग्नं च लग्नं
    वासस्तस्मिन्नर्थतः शब्दतश्च।
अम्ब स्नेहादम्बरं वीक्ष्य काञ्ची -
    दम्भाद् विद्युत् तत्र विद्योतते हि ॥ **8.184** ॥ 401

अक्ष्यपदादणुतस्तव मध्यात्
    अम्ब रमे वरमम्बरमेव।
अस्य हि वैभवमस्तविवादं
    विप्रतिपन्नमनैन्द्रियकत्वम् ॥ **8.185** ॥ 402

अण्वप्यदस्तव वलग्नमिवाम्ब काञ्चीम्
    अप्यम्बरं स्तनभरञ्च बिभर्ति युक्तम्।
आहुर्यतो द्व्यणुककारणमप्यणुं तम्
    आधारमत्र कतिचिज्जगतोऽखिलस्य॥ **8.186** ॥ 403

कार्श्यं दृष्ट्वा कमलनयने नेत्रमेकं भवत्या
    दत्तं मध्यं प्रति तव पतिस्तत्र तु स्पर्धयेव।
नेत्रद्वन्द्वं रुचिरमदिशत् तद्विचित्रं त्रिनेत्रो
    जातोऽप्येष प्रथयति कथं संपदं शम्बरारेः॥ **8.187** ॥ 404

पयोजनाभप्रियपत्नि विष्णु -
    पदारविन्दव्यपदेशमेव।
निरीक्ष्य मध्यं नियमेन तत्र
    नेत्रं मुदा त्वं निदधासि नूनम्॥ **8.188** ॥ 405

नेत्रेण नीरनिधिपुत्रि नितान्तयोगात्
    मध्यं न चाक्षुषमिति क्षममेव मातः।
आसन्नताऽपि सुतरामतिदूरतेव
    प्रत्यक्षतां प्रतिरुणद्धि यथाऽञ्जनादौ॥ **8.189** ॥ 406

अत्यल्पभावात् तव देवि मध्यो
    हरेः कटाक्षाविषयो यतोऽभूत्।
अतुल्यकल्याणगुणाश्रयस्या -
    प्यजस्रबन्धोऽस्य किलानुरूपम्॥ **8.190** ॥ 407

सुराशनश्रीप्रथने निदानम्
    उपेन्द्रसंतोषकृदब्धिकन्ये।
वलग्नमेतद् रुचिरोरुरम्भा -
    विलग्ननेत्रं कलये बलघ्नम्॥ **8.191** ॥ 408

परमाणुषु मातरादिमं
　　यदिदं कोशकृदाह मध्यमम्।
अमरः किल पामरस्ततः
　　स बभूव स्वयमेव मध्यमः॥ **8.192** ॥ 409

अधिकाञ्चि तथाभिवृद्धिमत्या -
　　प्यभिजातः श्रुतिमञ्जुशब्द पङ्क्त्या।
अतिभङ्गुर एव शून्यवादं
　　न जहौ माध्यमिकक्रमस्त्वदीयः॥ **8.193** ॥ 410

जननि स्मृतिजन्ममूलभूतं
　　तनु मध्यं तव सन्ततानुमेयम्।
तदिहोपनतं पुरस्तनाङ्गी -
　　कृतसद्गौरवदर्शनानुरोधात्॥ **8.194** ॥ 411

न परं तव रम्यसीधुमित्रं
　　वचनं पञ्चमभूतमब्धिकन्ये।
अपि तु स्फुटमेखलाकलाप -
　　प्रसरच्छब्दगुणोज्ज्वलं वलग्नम्॥ **8.195** ॥ 412

प्रबुद्धदीप्तौ प्रबलागमं ते
　　हसत्यशेषाम्ब गुरौ नितम्बे।
अन्ते वसंस्तस्य तु मध्यमोऽयं
　　स्थाने समातिष्ठत शून्यवादम्॥ **8.196** ॥ 413

मकरध्वजराजभद्रपीठं
　　पुलिनं भूषणकान्तिरत्नसिन्धोः।
जलजायतने पृथु त्वदीयं
　　जघनं यौवनहस्तिमस्तकं वा॥ **8.197** ॥ 414

कामाङ्कुशेन कलितक्षतमच्युतेन
पाथोधिपुत्रि पृथुलं जघनं भवत्याः।
हस्तीन्द्रमस्तकमपूर्वमिदं यदस्याः
हस्तावुभौ लसत ऊरुमिषादधस्तात्॥ **8.198** ॥ 415

करस्थीकर्तुं यां भगवति तवोरुश्रियमसौ
करी नित्यं काङ्क्षत्यभिलषति तामेव कदली।
अतस्तामीर्ष्यातः प्रसभमभिमश्नाति कलभो
द्वयोरेकत्रेच्छा जनयति मिथो द्वेषमधिकम्॥ **8.199** ॥ 416

प्रकाशयत्पद्मगृहे मदावहा
हरेरनेकाकृति नेत्र सम्पदः।
शुभोरुरम्भाद्वयशोभितं दिवं
जयत्युदारं जघनस्थलं तव॥ **8.200** ॥ 417

प्रकृतिः समदर्शिनी मृदूनां
नितरामुन्नतिभाजि नीचके च।
प्रथते समता यतस्त्वदूर्वोः
करभे देवि करे च कुञ्जराणाम्॥ **8.201** ॥ 418

करभः कलभः प्रशस्तहस्तः
कदली चाप्युरवः स्युरम्ब कान्त्या।
ननु तत्र च मुख्यवर्णदैर्घ्यात्
कथयन्त्यूरुपदं त्वदीयसक्थ्नोः॥ **8.202** ॥ 419

तवोरुलक्ष्मीं द्विरदाः करस्थां
कर्तुं कृताशा मधुपाय मत्ताः।
दिशन्ति दानं तदभीष्टसिद्धिं
नापन्नपात्रार्पणतो हि नार्थः॥ **8.203** ॥ 420

असावसारोऽन्तरतीव कर्कशो
    मलीमसश्चोपरि कौञ्जरः करः।
इति त्वदूरू हसतो हरिप्रिये
    करिण्यपास्ते करभस्तु दूरतः॥ **8.204** ॥ 421

विबुधास्तव वर्णयन्ति जङ्घे
    शरधी दाशरथिप्रिये स्मरस्य।
न वयं बहुमन्महे तदेतत्
    न हि पृष्ठीकुरुते मनोभवस्ते॥ **8.205** ॥ 422

प्रमिलन्तु शतानि काहलानां
    शरधीनां समुदेतु वा सहस्रम्।
कमले तव जङ्घयोस्ततः किं
    शतमन्धाः किमवेक्षितुं क्षमन्ते॥ **8.206** ॥ 423

काहलः कमल मन्दिरे भवत्
    जङ्घयोः श्रियमचूचुरद् यतः।
तन्यते बहुमुखप्रभञ्जन -
    क्षोभितेन निनदस्ततोऽमुना॥ **8.207** ॥ 424

तनोति सिन्धोस्तनये मनोज -
    तूणीरशङ्कां तव देवि जङ्घा।
तद्बाणभूतं कमलं तदग्रे
    पादापदेशेन यदाविरस्ति॥ **8.208** ॥ 425

वृन्देन वृन्दारकसुन्दरीणां
    नन्देष्टसूनोः सखि वन्दनीये।
मन्देतरानन्दथुमूलकन्दे
    वन्दे भवत्याश्चरणारविन्दे॥ **8.209** ॥ 426

यौ यस्य पादौ यदुवर्यभार्ये
तस्यैव दृष्टौ गतिदायिनौ तौ।
चित्रं तदेतच्चरणौ तवेमौ
गजेन्द्रयोग्यां दिशतो गतिं नः॥ **8.210** ॥ 427

नलिनायतने मृदु प्रवालं
पदयोस्तावकयोर्लवं प्रतीमः।
अत एष बिभर्ति पल्लवाख्यां
भजते पादपशब्दमस्य पाता॥ **8.211** ॥ 428

पदयोर्द्वितयं ननु त्वदीयं
भजति स्वामिनि बालमित्ररागम्।
अथ पल्लवरूपमश्नुते तत्
प्रतिषेधन्ति हि बालसख्यमार्याः॥ **8.212** ॥ 429

यद्वस्तु यद्गुणवता कलितानुषङ्गं
तत्तद्गुणीति विदितं तव पादपद्मे।
अत्यन्तरागिणि कृतं हृदयं मुनीनां
वैराग्यमम्ब भजतीति विचित्रमेतत्॥ **8.213** ॥ 430

पादान् सहस्रमपि बालसरोजबन्धोः
पादद्वयी जयति ते जगदम्ब दीप्त्या।
बंहीयसामपि न सद्वसुहारकाणां
प्रायो जयः कुवलयार्तिकृतां कृतः स्यात्॥ **8.214** ॥ 431

नवप्रवालादपि कोमलं ते
न वन्दते कश्चरणारविन्दम्।
शनैरनैषीद् दृषदे यदम्ब
स्पृशन् सशङ्कं भगवान् विवाहे॥ **8.215** ॥ 432

शुभतरलाक्षमब्ज सुषमायतनं जगतां
जननि शुचिद्विजैः श्रितमिदं पदमास्यमपि।
परमियती भिदा प्रथममभ्युदयं दधता
त्वहिमरुचा समं हिमरुचा चरमं च रमे ॥ **8.216** ॥ 433

प्रद्वेष्टि यः पादरुचिं तवाऽग्र्यां
तमिन्दिरे द्रष्टुमयोग्यमाहुः।
दृष्टान्तमत्र प्रतिषिद्धदृष्टिम्
उद्यन्तमादित्यमुदाहरामः ॥ **8.217** ॥ 434

न वर्णतः केवलमीप्सितार्थ -
दानादपि त्वच्चरणौ सुरागौ।
श्रियैव नोदञ्चित पद्मजाता -
विमौ जगत्पूज्यतयाऽपि मातः ॥ **8.218** ॥ 435

अजेन्द्रभर्गादिसुरव्रजेडिते
भजे तव क्षीरधिजे पदाम्बुजे।
व्यनक्ति सक्तं यदलक्तकं हरेः
उरस्तटे तस्य परत्वमुच्चकैः ॥ **8.219** ॥ 436

उदारसन्देहमुषं वितन्वती
मुदा रसं देहभृतां चिदात्मकम्।
सदारविन्देव्युदयन्तमिन्दिरे
पदारविन्दे हसतः श्रिया तव ॥ **8.220** ॥ 437

अपि नीरजस्फुरणहार्यहो रजः
स्फुरणापहारि पदयोर्द्वयं तव।
अपि हंसकप्रणयि धूतहंसकं
गमनेन पद्मभवने विशोभते ॥ **8.221** ॥ 438

कौचिदङ्घ्रिकमले तवाश्रितौ
　　कंसहिंसनपुरन्ध्रि हंसकौ।
मञ्जुलैरखिलरञ्जकौ रुतैः
　　मानसे विहरतो मधुद्विषः॥ **8.222** ॥ 439

राजच्छोभनखाश्रितं शुभकरं राजीवराजीसुहृत्
　　पद्मे गाढतमोहरं तव पदं बालार्कबिम्बं च तत्।
यद्यप्यम्ब समं तथापि विदितो भेदस्त्वियानेतयोः
　　अर्घ्यं संस्कृतमुत्तरस्य कलयन्त्याद्यस्य पाद्यं बुधाः॥ **8.223** ॥ 440

तव भगवति वन्दे दिव्यपादारविन्दे
　　सदसि यदभिषेकं शम्भुजम्भारिमुख्याः।
स्वमुकुट घटितस्वः शाखिनिष्पन्नपुष्प -
　　प्रसृमरमकरन्दैरन्वहं तन्वते ते॥ **8.224** ॥ 441

प्रणतिषु तव पुण्यद्वन्द्वमासीत् पुरारेः
　　प्रणिपतनत एकं लोकमातस्त्वदङ्घ्र्योः।
चिरविरहकृशस्य स्वावतंसामृतांशोः
　　तव नखमयतारायोजनेन द्वितीयम्॥ **8.225** ॥ 442

चरणनलिनयुग्मं संसृतिक्लेशसिन्धोः
　　तव हरिसखि सन्तस्तारकं सङ्गिरन्ते।
इदमुचितमवैमो येन तत्संश्रितानां
　　ततिरपि च नखानां तारकत्वं दधाति॥ **8.226** ॥ 443

अनिशं प्रकाशमधिगन्तुमिच्छया
　　तव भाति सिन्धुतनये पदाम्बुजम्।
अधिगम्य नूनमभवन् यतो नखा -
　　न्यत एव खं च तदभून्नभस्थलम्॥ **8.227** ॥ 444

मरालिकेड्याऽप्यमरालिकेड्या
सुरद्रुमश्रीरपि विद्रुमश्रीः।
खरांशुकान्ता नखरांशुकान्ता -
प्यम्ब द्वयीयं तव चित्रमङ्घ्र्योः॥ **8.228** ॥ 445

चरणाविमौ हि करुणानिधे यतः
तरुणारुणग्रकिरणानुकारिणौ।
अनुविन्दतस्तदरविन्दबन्धुतां
अपि साधुचक्रबहुमान्यतां रमे॥ **8.229** ॥ 446

पदमाश्रितस्तव पयोधिकन्यके
विपदं न जातु भजतीति साम्प्रतम्।
अपि तत्परागमधिमौलि धारयन्
अपरागतां व्रजति जन्तुरद्भुतम्॥ **8.230** ॥ 447

श्रितः परागं जरठः शशाङ्को
दृष्टे नतत्र्यम्बकशीर्षगश्रीः।
स्पृशन्नपि त्वत्पदयोः परागं
न जातु तारुण्यमहो जहाति॥ **8.231** ॥ 448

सुरादिमान्यं विधुतोपसर्गं
शुभावहं ते मृदु चारुवर्णम्।
पदं रमे यः प्रणमेज्जपेद्वा
दूरादपास्यत्परमापदं सः॥ **8.232** ॥ 449

पादं त्रपादं तव पङ्कजानां
वन्दे भवं देवि तरीतुकामः।
मस्ते समस्तेऽपि मञ्जुलाक्षा -
रागं परागं वहते यदीयम्॥ **8.233** ॥ 450

पदद्वयं यस्तव देवि सेवते
    प्रभुः श्रितानां द्विपदो भवत्यसौ।
विधुस्वसस्तद्विमुखस्तु यो नरः
    चतुष्पदं हन्त वदन्ति तं बुधाः॥ **8.234**॥ 451

पदयोस्तवाम्बरागं
    प्राहुः स्वाभाविकं वयं त्वेनम्।
पुष्कलरागप्रियतम
    हृदयवसत्युपनतं विजानीमः॥ **8.235**॥ 452

परमकरावलिरम्या
    बहुरागधराधरोरुविभ्रमभाक्।
असि हंसहारिगतिका
    पद्मे पितृवत्पितृप्रसूवच्च॥ **8.236**॥ 453

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे सौन्दर्यस्तबकः अष्टमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ शृङ्गारस्तबकः नवमः ॥

दुर्ज्ञेयमहिमा सा मां क्षीराब्धि दुहिताऽवतात्।
शृङ्गाररससर्वस्वं शेषशैलेश्वरस्य या ॥ 9.1 ॥ 454

विहितस्मरसौरभेण पद्मे
विविधेनाम्ब विलासचेष्टितेन।
अतिविस्मयमादधाति शौरेः
अनुभूताऽपि चिरादपूर्ववत् त्वम् ॥ 9.2 ॥ 455

कमले तव हन्त वीक्षितानां
कुटिलिम्ना कवलीकृतं सदाऽपि।
फणिशैलपतेर्न जातु चेतः
प्रतिघोपज्ञमुपैति वक्रिमाणम् ॥ 9.3 ॥ 456

विषमायुधास्त्रसुषमावहैरहो
तव लोकमातरवलोकविभ्रमैः।
भगवानहीन्द्र नगवास्युपाश्नुते
तरसा मनोज्ञतरसात्त्विकश्रियम् ॥ 9.4 ॥ 457

कलशाब्धिपुत्रि वलशासनादिभिः
निगमैरनादि विगमैरपि स्तुतः।
छलहेतुकेषु कलहेषु केशवः
स भिया तवैकमभियाचते वचः ॥ 9.5 ॥ 458

स्तम्भतः स्वयमवाप सम्भवं
    यः पुरा नरहरिर्हरिप्रिये।
शम्बराहितविलासडम्बरैः
    स्तम्भमम्ब जनयत्ययं त्वयि॥ **9.6** ॥ 459

अहारि नेत्रं मम पश्यतोऽनया
    प्रसह्य चोरस्स्थलसक्तयेति किम्।
प्रतिक्रियायै हरते रतेषु ते
    हरिर्हठादम्बरमम्ब रंहसा॥ **9.7** ॥ 460

अम्ब त्वमत्यन्तमुदारतोरु -
    चमत्कृतिं दर्शयितुं प्रियाय।
अभ्यर्थयित्रे भृशमात्मनोऽपि
    कुचेलमित्राय ददासि चेलम्॥ **9.8** ॥ 461

बहिस्त्वालीवर्गस्तव नवरतौ देवि हरिणा
    करग्राहोन्मीलद्वलयरव शुश्रूषुरुषितः।
प्रियस्पर्शानन्दोन्मिषित भवतीहासनिभृतैः
    कलध्वानोपेतैः कनकवलयैर्वञ्चित इव॥ **9.9** ॥ 462

हठात् क्रीडायुद्धे हरिसखि भवत्याः कचभरे
    गृहीते कान्तेन ग्रहिलहृदयः काममदयः।
मनोजन्मा मर्माविधमथ गलत्पुष्पकपटात्
    अवर्षद् बाणौघं प्रसभमुपरिष्टान्मधुरिपोः॥ **9.10** ॥ 463

आख्यया च महसा हरेः कर -
    स्पर्शनेन मृदितः पयोधरः।
देवि विक्षिपति ते स्रगुद्गलत्
    पुष्पमौक्तिकमयान् पयः कणान्॥ **9.11** ॥ 464

सरभसपरिरिप्सासम्भ्रमोच्छूनपीन -
    स्तनशिथिलितबन्धा मञ्जुला कञ्चुकी ते।
अतनुसमरकेलावप्रयत्नात्प्रियेण
    द्रुततरमपनीता दुग्धसिन्धोस्तनूजे॥ **9.12** ॥ 465

हरति तदिदमुच्चैर्हन्त चक्रावलेपं
    दिशति जननि खेदं मध्यदेशस्य चेति।
मदनयुधि कराभ्यां मर्दितं युग्ममेतत्
    कुचधरणिभृतोस्ते कुप्यतेवाच्युतेन॥ **9.13** ॥ 466

कठिनमुखनखक्षतानि शौरेः
    करयुगनिर्दयमर्दनानि चास्य।
भगवति सहमानयोः प्रकामं
    तव कुचयोरुचितं क्षमाधरत्वम्॥ **9.14** ॥ 467

भीतं शीतकराद्रथाङ्गमिथुनं नित्यानुषक्त्याशया
    मातर्व्यातत तावकस्तनजनिं मानात् पुनश्चन्द्रमाः।
त्वत्प्राणेशनखात्मना कृतजनिस्तत्र प्रदत्ते क्षतं
    वैरं हन्त विरोधिनोः किल मिथो जन्मान्तरेऽप्यक्षतम्॥ **9.15** ॥ 468

सन्त्यज्य सुन्दरि सुदर्शनपाञ्चजन्या -
    द्येकेन कण्ठमितरेण करद्वयेन।
सङ्गृह्णतस्तव कुचौ च मदम्ब शौरेः
    नो शङ्खचक्रधरता विरता रतेऽपि॥ **9.16** ॥ 469

भावत्कमाचरति देवि हरावपूर्वं
    पाणिग्रहं विजनकेलिगृहं प्रविश्य।
लाजायितं विमृदितस्तन लोलहार -
    व्याकीर्ण मौक्तिकचयैर्ज्वलति स्मराग्नौ॥ **9.17** ॥ 470

पञ्चायुधान्यपि विहाय तवाङ्गकेषु
    सञ्चारयन् स चतुरश्चतुरः स्वहस्तान्।
कञ्चालये कथमहो मधुकैटभारिः
    पञ्चायुधाजिमपि हर्षभरादकार्षीत्॥ **9.18** ॥ 471

क्रीडारणे तव कृतापजयः स्मरेण
    सन्त्याजितेष्वपि च शार्ङ्गमुखायुधेषु।
कल्याणि कंसदमनः कमले विचित्रं
    उत्तुङ्ग चापलतया ननु योजितोऽभूत्॥ **9.19** ॥ 472

उपमर्दितयोरुरोजयोस्ते
    दयिताश्लेषदशासु मौक्तिकानाम्।
नवचन्दनरेणुनिर्विशेषं
    परिणामं प्रतिपेदिरे परागाः॥ **9.20** ॥ 473

मायावादैस्तव तु वशिते देवि मध्वार्तिकारि -
    ण्यङ्गाभ्यां वां विघटितमभूद् द्वैतमालिङ्गनेषु।
आभिर्मुक्तावलिभिरचिरादाश्रितं निर्गुणत्वं
    व्यक्ता चान्तःकरणहरणात् तादृगानन्दपूर्तिः॥ **9.21** ॥ 474

जलजायतने समस्तनाग -
    प्रवरप्रौढनिबन्धनश्रमेण।
प्रियपाणिनियन्त्रणोचिताया -
    स्तव कण्ठादुदितास्तदा सुशब्दाः॥ **9.22** ॥ 475

योगे पयोधितनये युवयोस्तदानीं
    शम्पालताजलदयोरिव संप्रवृत्ते।
उज्जृम्भितातनुशुभाशुगवेगनीता
    युक्तं श्रमाम्बुकणिकामयवृष्टिरासीत्॥ **9.23** ॥ 476

चलद्गुणेष्वत्र पयोधिजाते -
    ष्वत्रासमुक्तावलिषु प्रकम्पः।
रमे सदा राजकराप्तनाना -
    हारेषु युक्तोऽतनुयुद्धकाले ॥ 9.24 ॥ 477

गाढं श्लिष्यति माधवे सकुतुकं क्रीडावनीं त्वां तदा
    युक्तं चम्पकगर्भसौरभशुभैरस्पन्दि मन्दानिलैः।
राजीवोपरि पर्यपाति सहसा लोलैरलीनां कुलैः
    आसीदम्ब कदम्बगोलनिचयो यस्मादतो विस्मयः ॥ 9.25 ॥ 478

प्रसभमरुणबिम्बं ग्रस्तमासीदकस्मात्
    परिपतितमुडूनां पङ्क्तिभिर्मेरुशृङ्गात्।
अपि तिमिरवृताऽभूदिन्दिरे चन्द्ररेखा
    तव च मधुजितश्च द्वन्द्वयुद्धे प्रवृद्धे ॥ 9.26 ॥ 479

वपुषि मृदुतमे ते वेदना मा जनीति
    प्रतिशमयिषताऽपि प्रेयसा माधवेन।
विपुलपुलकपाली विश्वमातः त्वदङ्गे
    तव दृढपरिरम्भात् स्वैरमुन्मेमिषीति ॥ 9.27 ॥ 480

मधुमथनमनः प्रहर्षहेतोः
    मनसिजयज्ञमनेकधा विधाय।
ध्रुवमवभृथमज्जनं भवत्या
    जननि कृतं शुचिभिः श्रमाम्बुपूरैः ॥ 9.28 ॥ 481

सायासायाः सुरतविरतौ कान्त बाहान्तराळे
    विन्यस्यास्यं तव भगवति स्वापसौख्यं भजन्त्याः।
फालोत्पन्न श्रमजलमिषच्चित्रकप्रस्रुतोऽस्मिन्
    श्रीवत्सोऽन्यः स भवतु रमे यस्तु कस्तूरिबिन्दुः ॥ 9.29 ॥ 482

सञ्जातं नयनयुगे निरञ्जनत्वं
    नीरागः स्फुटमभवत् तवाधरोऽपि।
सम्पन्ना जननि कचेऽपि बन्धमुक्तिः
    सानन्दं रहसि हरेरुपासनेन ॥ 9.30 ॥ 483

मलयमुकुटी वाटीपाटीर कोटरनाटिनः
    सरसिज मधुस्यन्दामन्दाऽघमर्षणहर्षिणः।
तव रतिभवं लुम्पन्त्यम्ब श्रमं शयनीभवत् -
    फणिपतिभिया मन्दं मन्दं चरन्त इवानिलाः ॥ 9.31 ॥ 484

वनजनिलये वारिक्रीडादशासु दशानन -
    द्विषि तव शनैरातन्वाने कुचे नखचेष्टितम्।
क्षुभितमनसा दत्ता नाथे त्वया शफरीभिया
    सरभसपरीरम्भारम्भा जयन्ति निरन्तराः ॥ 9.32 ॥ 485

सरसिजवने संलीनायाः सकौतुकमिन्दिरे
    सलिलविहृतौ शौरेर्लोलेक्षणस्य मुखस्य ते।
अलिकवलितालोलश्यामालकस्य सरोरुहात्
    अळिकवलिताच्छैवालाढ्यादभून्न भिदाग्रहः ॥ 9.33 ॥ 486

युगपदहिमहीभृत्युन्मिषन्तं समन्ताद्
    ऋतुगणमपि कृत्स्नं निर्विशन्निर्विशङ्कः।
सह विहरति लीलालाभवत्या भवत्या
    मम जननि मुकुन्दो मञ्जुवल्लीगृहेषु ॥ 9.34 ॥ 487

कुसुमशरधनुर्ज्या तुङ्गटङ्कारशङ्का -
    करमधुकरसङ्घारब्ध झङ्कारहृद्यान्।
फणिगिरिवनदेशान् पद्मनाभः स पद्मे
    सफलयति गभीरैस्त्वत्सहायो विहारैः ॥ 9.35 ॥ 488

सार्कं लोकपतिस्त्वया विहरते काकोदराद्रौ रमे
सूनेषोरवने वने नयनयोरानन्दने चान्दने।
शम्पाश्लिष्टनवाम्बुदभ्रमजुषामङ्के चिरं केकिनां
नृत्ताडम्बरनुन्नपन्नगतया निर्दोषमन्दानिले ॥ **9.36** ॥ 489

कान्तो रन्तुमनास्त्वया सह रमे कामेन मुह्यन् हरिः
श्यामां केळिवनीममंस्त रजनीं दूरीकृतार्कद्युतिम्।
सन्ध्यारागमगेषु पल्लवगणं तत्कोरकांस्तारका -
ण्यन्तः सन्तमसं लसन्मधुकरश्रेणीं च नाणीयसीम् ॥ **9.37** ॥ 490

त्वन्नाथाख्या वहनविशदीभूततद्दास्यदार्ढ्यं
किञ्चित्कृत्या कलयितुमिवाकाङ्क्षता माधवेन।
पत्या साकं प्रणयकलहं तावकं छेत्तुकामे
कामे देवि स्वयमुपवने तन्यते बाणदानम् ॥ **9.38** ॥ 491

सोऽयं गायन् स्मरमनुमलिः शश्वदव्यादभव्यात्
सम्पश्यन्ती यमिह कबरीसौरभादापतन्तम्।
जातोद्वेगा जगदधिभुवे चित्रमप्रार्थितापि
स्वैरं दत्से सरभसपरीरम्भमम्भोधिकन्ये ॥ **9.39** ॥ 492

मन्दं मन्दं वृषगिरितटीं स्वैरमाटीकमानः
खेलं खेलं विमलहरिणाङ्काननने काननेषु।
ग्राहं ग्राहं मृदुसुमनसः कौतुकी कैटभारिः
वारं वारं तव वितनुते देवि मूर्धाभिषेकम् ॥ **9.40** ॥ 493

रागेणोपर्यनिशमुषितं पुष्पवत्या लतायाः
प्रीत्या गृह्णन् कमपि कुतुकी पल्लवं फुल्लवक्त्रः।
सान्द्रामोदं चिकुरसुमनः सन्निधानेन नीत्वा
शार्ङ्गी हन्त श्रुतिशिरसि ते स्थापयत्यब्धिकन्ये ॥ **9.41** ॥ 494

दत्ते मातस्तव किल मुखे पाणिना दुर्निवार -
स्वेदेनासौ कमपि तिलकं कौतुकी श्रीनिवासः।
त्वं तु स्वेदस्रुतिविघटित स्थानविन्यासमेनं
वीक्ष्यादर्शे हससि दयितं मोघ यत्नं विदग्धा ॥ **9.42** ॥ 495

शेषक्ष्माभृत्तटवनचर श्यामजीमूतसङ्घे
संलीय त्वां भ्रमयति हरिः कल्पिताभेदमोहः।
तस्मिन् विद्युत्पटलजटिले तं विचेतुं विशन्त्या
व्यावृत्तिं ते विशदमविदन् स स्वयं वञ्चितोऽभूत् ॥ **9.43** ॥ 496

बाले देहि पयोधरं करयुगे प्रावृट् त्वया याच्यताम्
आश्लेषाभिरुचिं विधेहि न शशी तस्यास्मि किन्तु स्वसा।
आस्तामुत्तरमेतदीदृगधरं याचामि वाचा स्वयं
नास्त्यर्थोऽधरयाञ्चयेति चटुभिः पद्मे धिनोषि प्रियम् ॥ **9.44** ॥ 497

पश्चादुपेत्य परिहासकृते कराभ्यां
दृष्टी तवाम्ब विपुले स्थगयन् सशेषम्।
पाणिद्वयं मम न कृत्स्न पिधानकेलौ
पर्याप्तमित्यहिगिरेः पतिरेति लज्जाम् ॥ **9.45** ॥ 498

तव लोकमातरवलोक वागुरा
मृगजाल दृष्टियुगजाड्यकृद्गुणा।
ननु भाति चित्रमनुभावमाश्रिता
हरिणाऽपि तत्र हरिणायितं ततः ॥ **9.46** ॥ 499

स्मितचन्द्रिकया कयाऽपि देवि
स्मरसंवृद्धिपुषा सदोन्मिषन्त्या।
मधुसूदनमानसेन्दुकान्ते
द्रवतां चन्द्रमसः स्वसस्तनोषि ॥ **9.47** ॥ 500

तव स्तनं शैलघनं विनोदात्
प्रसह्य गृह्णन् प्रभुरब्धिकन्ये।
पुरा मुरारिः स्वकरोद्धृतस्य
गोवर्धनस्य स्मृतवान् महाद्रेः ॥ **9.48** ॥ 501

वल्ली तमालमिव विद्युदिवाम्बुवाहं
माहेन्द्रनीलभवनं मणिदीपिकेव।
इन्दोः कलेव गगणाङ्गणमिन्दिरे त्वम्
आश्लिष्य शौरिमयसे महतीमभिख्याम् ॥ **9.49** ॥ 502

मदनतरुपल्लवानां
मधुसूदनमानसालिकुसुमानाम्।
तत्कृततपः फलानां
तव ललितानां तु जननि कः स्तोता ॥ **9.50** ॥ 503

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे शृङ्गारस्तबकः नवमः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ ऐश्वर्यस्तबकः दशमः ॥

विश्वस्य जननीमेव विश्वस्य शरणं वृणे।
विश्वम्भरसमैश्वर्यां विदुर्यां ब्रह्मवादिनः ॥ **10.1** ॥ 504

अनुपाधिकमम्ब ते मुरारेः
    अपि साधारणमाहुरीशितृत्वम्।
स्फुटमत्र निदर्शनं प्रतीमो
    ननु मित्रावरुणादि देवतात्वम् ॥ **10.2** ॥ 505

अविशेषमशेष शेषिभावं
    युवयोर्यद्यपि वर्णयन्ति सन्तः।
तनये जलधेर्मिथः प्रतीतः
    तदपि स्वामिनि शेषशेषिभावः ॥ **10.3** ॥ 506

तुल्येऽपि ते नाथविशेषणत्वे
    व्यक्तं गुणादस्ति विशेष एषः।
प्रत्यक्त्वमब्धेः तनये भवत्याः
    प्राज्ञा गुणानां च पराक्त्वमाहुः ॥ **10.4** ॥ 507

संसाराब्धौ मज्जतां सज्जनानां
    रक्षायज्ञे दीक्षितो राक्षसारिः।
अम्भोराशेः पुत्रि पत्न्यास्तवासा -
    वन्वारभ्भं नित्यमेत्यम्बुजाक्षः ॥ **10.5** ॥ 508

अस्येशानेत्यागमस्तावदास्ताम्
ऐश्वर्येऽस्मिन्नस्मदम्ब त्वदीये।
जागर्त्येव व्यासतातप्रणीतं
श्लाघ्यं विष्णोस्तत् पुराणं प्रमाणम्॥ **10.6**॥ 509

जल्पाकास्ते जीवकोटि प्रवेशं
स्वल्पप्रज्ञा ये रमे कल्पयन्ति।
विश्वं व्याप्तं विष्णुनाम्ब त्वया चे -
त्युक्तिस्तान् प्रत्युत्तरं शक्तिसूनोः॥ **10.7**॥ 510

वेदोद्याने पारिजातायमानं
श्रीसूक्तं तज्जायतां श्रेयसे नः।
पारेवाचां भासुरे त्वत्प्रभावे
चक्षुष्मन्तो देवि येनैव सन्तः॥ **10.8**॥ 511

दम्पत्योरिह युवयोरधीश्वरत्वं
व्यासज्ज्य स्थितिमिति सङ्गतं मतं नः।
विश्वाम्ब श्रुतिकथितं विहाय पत्नीं
कर्तृत्वं क्रतुषु न केवलस्य पुंसः॥ **10.9**॥ 512

दत्ताशयासु भवतीमहिमोपदेशे
तत्तादृशीषु निगमान्त सरस्वतीषु।
नारायणप्रियतमे निखिलाभ्युपेतं
रामायणं ननु जयत्युपबृंहणं नः॥ **10.10**॥ 513

एकग्रीवैर्निगमशिखरैरिन्दिरे निर्विशेषं
विश्वव्याप्तिर्जननि युवयोर्व्यक्तमुद्घुष्यमाणा।
ज्ञानद्वारा तव मधुरिपोरात्मनैवेत्यलीका
वैषम्योक्तिः कुत उपनता हन्त केषाञ्चिदेषा॥ **10.11**॥ 514

वैभवं तव मुकुन्दपत्नि यो
 वेद वेदशिखरानुवर्णितम्।
वैभवं भुवि स विन्दति स्थिरं
 दुस्त्यजं त्यजति वै भवं ततः॥ **10.12**॥ 515

ऐश्वर्यमत्र मधुहन्तुरपह्नुते यो
 यो वा तवापि जगदम्ब तयोरुदीच्यः।
प्राच्यात् प्रदुष्यति विशिष्य पितृद्विषोऽपि
 मातृद्विषस्त्रिभुवने महती हि गर्हा॥ **10.13**॥ 516

श्रीमद् रामावरजसरणिं श्रेयसीमाश्रितानाम्
 आचार्याणामपि च कुहचिद् यस्तवाणुत्ववादः।
तस्याकूतं परमपुरुषापेक्षया तेऽब्धिकन्ये
 शेषत्वेन स्वत उपनत न्यूनतायां प्रतीमः॥ **10.14**॥ 517

राजन्वन्ति जगौ जगन्ति निगमो द्वाभ्यां युवाभ्यामपि
 द्वैराज्यं न हि तावता प्रसजति क्षीराम्बुधेरात्मजे।
आग्नावैष्णव शब्दभाजि यजनेऽधिष्ठानयुग्माश्रिताम्
 एकामेव हि देवतां सुमनसः शंसन्ति मीमांसकाः॥ **10.15**॥ 518

रामाकारे जनकतनया रुक्मिणी कृष्णरूपे
 भर्तुः कृष्णाजिनमुपगता ब्रह्मचर्येऽपि पद्मे।
अन्तर्यन्तुः सकलजगतामच्युतादच्युतां त्वं
 धत्से मूर्तिं तदिह युवयोः प्रस्फुटो नित्ययोगः॥ **10.16**॥ 519

पदव्यां भव्यायां कृतरुचिरमार्गं परिहरन्
 अकम्पं विस्रम्भं विदधदभिरक्षेदयमिति।
व्यवस्यन् गोप्तृत्वं व्यपसरदुपायान्तरकथः
 भवत्या संश्लिष्टे भगवति निदध्यान्निजभरम्॥ **10.17**॥ 520

न्यासक्रिया करणमन्त्र पदानुरोधात्
    उद्देश्यमात्महविषि स्वयमर्प्यमाणे।
वाराशिपुत्रि भवती विशिनष्टि नाथं
    यागे महेन्द्रमखिलाम्ब यथा महत्त्वम्॥ **10.18** ॥ 521

इच्छार्जित बहुदेहामिन्द्रादि पदप्रदावलोकलवाम्।
ईशानां भुवनानामीडीमहि नियतमिन्दिरे भवतीम्॥ **10.19** ॥ 522

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे ऐश्वर्यस्तबकः दशमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ क्षान्तिस्तबकः एकादशः ॥

त्रायतामायताक्षं तद्धाम तामरसालयम्।
मदागसां प्रतीकारे महतामपि यत्क्षमा ॥ **11.1** ॥ 523

अपराधपरम्परामपाराम्
अहमेवं यदि नाम नारचेयम्।
कमलायतने क्षमागुणस्ते
कथमात्मानमसौ लभेत मातः ॥ **11.2** ॥ 524

महतां मम घोरकिल्बिषाणां
इह निःशेषगवेषणाऽपि दूरे।
पततामवलम्बनाय मातः
भवपङ्के बत नस्तव क्षमातः ॥ **11.3** ॥ 525

फणिशेखरशैलनाथकान्ते
भवती मूर्तिमती क्षमैव नूनम्।
अभवत् कथमन्यथा न पाप -
स्तव कोपप्रभवाय वायसोऽपि ॥ **11.4** ॥ 526

भवतीं प्रति विश्वमातरं
भवसिन्धोस्तरणार्थमातरम्।
स्वमहं प्रदिशामि रक्ष माम्
अपराधेषु समाचर क्षमाम् ॥ **11.5** ॥ 527

नित्यं त्वकृत्यमवशादपि न त्यजामि
    कृत्यं घुणाक्षरनयादपि नाचरामि।
अत्यन्तमित्थमपराधमहोदधेर्मे
    सत्यं शपे शरणमम्ब तव क्षमैव ॥ **11.6** ॥ 528

मातः क्षमा तव सखी मधुवैरिकान्ते
    ख्यातः क्षमाधरतया निलयस्स शेषः।
त्वं तु क्षमानिधिरतः शतमागसां मे
    क्षन्तुं तवोचितमशेषत एव तावत् ॥ **11.7** ॥ 529

अस्मत्कृतामतितरामपराधपङ्क्तिं
    यन्मृष्यसे जननि तत्र न विस्मयो नः।
एवंविधोऽपि विलिलङ्घयिषे भवं यत्
    तत्र क्षमा हि तव कस्य न विस्मयाय ॥ **11.8** ॥ 530

तत्तद्विचित्रदुरितानुगुणानि तीक्ष्णे
    दातुं फलानि दयिते तव बद्धदीक्षे।
कस्येह जीवितकथा कलशाब्धिकन्ये
    क्षान्तिं न चेन्नयसि तं विविधैरुपायैः ॥ **11.9** ॥ 531

अक्षान्तकारिणि दशास्यवधोक्तिदृप्ते
    भक्षाय राक्षसवधूरभियाचमाने।
हन्त क्षमोदयजुषोऽप्यनुकम्पयैव
    नक्षत्रनाथसहजे तव न क्षमाऽभूत् ॥ **11.10** ॥ 532

धनपतिपुरुहूतस्थाणुवेधो मुखानाम्
    अपि च दधति शापं सम्पदः सम्परायम्।
इति गतिमवबुध्याप्यर्थकामाभिलाषात्
    अजहदघशतं मां रक्ष मातः क्षमातः ॥ **11.11** ॥ 533

अनिशमुपचितानामागसां भूयसां मे
    निगमविततिरीष्टे निष्कृतिं नाभिधातुम्।
प्रभवति फलमेषां पद्मनाभो न दातुं
    कलशजलधिकन्ये क्षान्तिरेवेह युक्ता ॥ **11.12** ॥ 534

अमितदुरितकृद्भ्यो नित्यमस्मादृशेभ्यो
    हतहितचरितेभ्यो हन्त कुप्यन्तमुच्चैः।
नियतमनुगुणेन न्याययुक्तेन पद्मे
    कलयसि वचनेन क्षान्तिमन्तं प्रभुं तम् ॥ **11.13** ॥ 535

कलयति मनसा वा कर्मणा वा गिरा वा
    मधुरिपुमहिले यन्मादृशो नित्यमागः।
तदिदमगणयन्ती त्रायसे संसृतेर्नः
    शरणमिति गिरैव स्वामिनं क्षामयन्ती ॥ **11.14** ॥ 536

नवनवमपराधं साधयित्वा खलत्वात्
    जननि कृतवतो मे माधवं क्रोधवन्तम्।
वरुणनिलयकन्ये क्षान्तिमत्या भवत्याः
    शरणवरणतोऽन्यत् केवलं नावलम्बः ॥ **11.15** ॥ 537

प्रथिततमसि सर्गैरागसां रागसान्द्रे
    मयि यदि तु विधत्से नानुकम्पामकम्पाम्।
उपचितिमतिचित्रामेनसो मे न सोढुं
    प्रभवति स भवत्या नायकोऽजेयकोपः ॥ **11.16** ॥ 538

रचयति यदयं ते नेतरागः सरागः
    तदखिलमपि मृष्यन् त्राहि दीनं त्वमेनम्।
ननु क इह विमर्शो नापराधीति शौरेः
    कलशजलधिकन्ये कर्णयोर्वर्णयोच्चैः ॥ **11.17** ॥ 539

जलजटिलतडित्वद्दीप्तिकृष्णोपलाल्या
　　कृतिरुरुकटकश्रीरुज्ज्वलन्मेखलाभा।
वरतमवनमालालङ्कृतस्थानजुष्टा
　　वहसि हरिपुरन्ध्रि त्वं क्षमाभृत्त्वमर्हम्॥ **11.18**॥ 540

पापारण्य हिरण्यदानववपुर्व्यापाटन प्रज्वलत् -
　　कोपाटोपकृपीडसम्भवनवज्वालाकराळाननम्।
देवाद्यैरपि दुष्करप्रसदनं देवं नृसिंहं रमे
　　क्षान्तिं नीतवती क्षणेन भवती किं ते परं दुष्करम्॥ **11.19**॥ 541

नियन्ता यः पद्मे निरवधिदुरागः शतकृताम्
　　अपर्याप्तं जानात्यखिलनिरयव्रातमपि नः।
स एष त्वद्वाचा निखिलमपि सोढ्वाऽपचरितं
　　फलं वेत्ति स्वल्पं तदपि शरणोक्तेर्निजपदम्॥ **11.20**॥ 542

क्षमां मूर्तामुद्यत्करचरणयोगां च करुणां
　　हतावद्यां विद्यामवयववतीमम्ब भवतीम्।
समाश्रित्यापत्याभ्युदय धनधान्यादिनिबिडः
　　बिडौजः सम्पत्तिं परिहसति भूमावपि जनः॥ **11.21**॥ 543

क्षान्ते मन्तौ जननि सकले क्षम्यतां शब्दमात्रात्
　　भूयो भूयः कमपि निचयं पाप्मनां निर्मिमाणः।
वक्तुं लज्जे पुनरपि सहस्वेति वाराशिकन्ये
　　क्षान्तिं सा त्वां तदपि नयते काप्यकम्पानुकम्पा॥ **11.22**॥ 544

कादाचित्कप्रपदनजुषां काङ्क्षतान् पूरुषार्थान्
　　अत्रामुत्राप्यखिलजननि प्राणिनामर्पयन्तीम्।
संत्यज्य त्वामपकृतिशतैरप्यशुष्यत्कटाक्षां
　　भिक्षाकीं तु प्रसभमपरां देवतां सेवतां कः॥ **11.23**॥ 545

कृत्याकृत्य त्यजनकरणोत्साहिनां मादृशानां
को वा दोषः कमलनिलये त्वत्क्षमायाः स दोषः।
येनैतस्याः क्वचिदविषयो नापराधः समस्ती -
त्युद्यद्भैर्या वयमिह बहूनाचरामोऽपचारान् ॥ **11.24** ॥ 546

अशेषैर्निर्वेशैरखिलनरकावल्यनुभवैः
अघौघानास्माकानपि भृशमशक्यापनयनान्।
क्षमस्वेत्युक्त्यैव क्षपयसि मधुध्वंसिदयिते
क एषः क्षान्त्यात्मा कथय निरुपाख्यस्तव गुणः ॥ **11.25** ॥ 547

निर्मातुं प्रभवेम कर्म न वयं नित्यं किमप्यन्ततो
यत्खल्वाचमनं तदप्यकुशलाः कर्तुं यथाचोदनम्।
दूरे ज्ञानकथा तथापि तु तवाक्षामक्षमावेदिनः
जानीमो मनसैव देवि सुगमौ स्वर्गापवर्गावपि ॥ **11.26** ॥ 548

कथयामि सारमिह किं कथया
परमन्ययार्थितभवोपरमम्।
क्षमया त्वमेतमभिरक्ष मया
विहितानि मा गणय देवि हिता ॥ **11.27** ॥ 549

निगमविहितं प्रायश्चित्तं मदीयमहांहसां
निरसनकृते नालं मातस्तव क्षमया विना।
गुरुतरमयःपिण्डं गर्वान्निगीर्णमहो रमे
किमु जरयितुं शक्तं शुण्ठीकषायनिषेवणम् ॥ **11.28** ॥ 550

भगवति वपुश्चेतोवाग्भिः प्रतिक्षणमर्जितं
नवनवमिमं पापस्तोमं क्षमस्व मम स्वयम्।
कटकटरवक्रीडद् दंष्ट्रायुगी विकृताननं
पुनरपि यथा नो पश्येयं भयङ्करमन्तकम् ॥ **11.29** ॥ 551

सहमानाऽहरहर्मे सहस्रमागांसि सागरेन्द्रसुते।
स्थापयसि मां दयालो शरणव्रज्याधिराज्यपीठे त्वम्॥ **11.30**॥ 552

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे क्षान्तिस्तबकः एकादशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ उत्सवस्तबकः द्वादशः ॥

विख्यात विभवा सा मां विष्णुपत्नी विलोकताम्।
विपुलानुत्सवान् यस्या विरिञ्च्याद्या वितन्वते ॥ **12.1** ॥ 553

विधिशिवप्रमुखा विबुधेश्वराः
विविधमच्युतपत्नि तवोत्सवम्।
अकलयन् सकलस्य शरीरिणो
निरवधीरवधीरयितुं व्यधाः ॥ **12.2** ॥ 554

निरुपमं युवयोः शुभमुत्सवं
जननि लोकयितुं धृतकौतुकाः।
उपगता किल काऽपि परा त्वरा
पुरवधूरवधूतगृहक्रिया ॥ **12.3** ॥ 555

जननि सत्वरचङ्क्रमसम्भ्रमे
चरणतः पतितौ मणिनूपुरौ।
तव महोत्सव भूभजनोन्मिषत् -
कुतुकया तु कयाचिदनादृतौ ॥ **12.4** ॥ 556

तव महे गतिमान्द्यकृतौ कुचा -
विति रुषा चलिताशु रमेऽपरा।
अनुगृहीततदञ्चलनिर्गलन् -
नवसरावसरात्ययभीरुकाः ॥ **12.5** ॥ 557

श्रुतभवन्महवाद्यरवा जवात्
पथि रमे चलिताभरणस्वनैः।
श्रुतरुतेऽन्तरितेऽस्मि सुवञ्चिते -
त्यपरया परया हसिता वधूः ॥ **12.6** ॥ 558

महमहीभजनोत्कलिकाकृत -
द्रुतगतिः श्लथपुष्पसराऽपरा।
कृतवतीव मुदा कुसुमाञ्जलिं
तव रमे वरमेखल मध्यमा ॥ **12.7** ॥ 559

महजुषस्तव देवि सिसेविषा
दिशति मन्दगतेरपि सद्गतिम्।
तदिह दिव्यगतिं वितरिष्यसि
त्वममले मम लेखदुरासदाम् ॥ **12.8** ॥ 560

अभिचकाङ्क्ष मनःप्रभवं जवं
चरणयोरपि काचन सादरा।
कलयितुं भवतीं कलशाम्बुधेः
दुहितरं हितरम्यमहोत्सवाम् ॥ **12.9** ॥ 561

जननि तामरसोदरसोदर -
श्रियमवेक्ष्य सविस्मयमुत्सवे।
न ततृपुर्नरदैवतयोषितः
शुभवतीं भवतीं सह शौरिणा ॥ **12.10** ॥ 562

प्रियतमार्पितयावकपादया
तव महोत्सव भूर्न यया स्त्रिया।
द्रुतमगामि पदोर्न परं धृतः
कुपितयाऽपि तयारुणिमा दृशोः ॥ **12.11** ॥ 563

अभिवृषाचलमापततां द्रुतं
    तव रमे परमोत्सवलिप्सया।
अजनि नो पथिभिः समयात्ययो
    दिविषदां विषदान्तरितैरपि॥ **12.12**॥ 564

प्रसृमरागरुधूपपरम्परा -
    सुरभिताः शुभदीपशतादृताः।
त्रियुगपत्नि महोत्सवभूमयः
    सुरचयं रचयन्ति सविस्मयम्॥ **12.13**॥ 565

तव मह प्रतिनन्दनकम्पितैः
    सुरतरोः शिखरैः स्वयमीरिताः।
जननि वेङ्कटशैलमभूषयन्
    सुमनसो मनसो हरणक्षमाः॥ **12.14**॥ 566

शुभतराभरणाभरणात्मना
    रुचितरङ्गपिशङ्गित सद्मना।
जननि सार्थयसे मरुतां महोत् -
    सवपुषा वपुषाऽनिमिषा दृशः॥ **12.15**॥ 567

मधुजिता सममुत्सवमण्टपे
    स्थितवतीं भवतीमवलोकितुम्।
अभिरुचिः पुनरात्तकुतूहलैः
    निजगृहे जगृहे न वधूजनैः॥ **12.16**॥ 568

अधिमहोत्सवमर्णवकन्यके
    परमभक्तिजुषां प्रणतिस्तव।
तनुधनुर्लतया सुदृशां गुरु -
    स्तनतया नतया सुकराऽभवत्॥ **12.17**॥ 569

भजनहर्षज नाट्यजवोच्चलन् -
मुकुटलोलमरुत्सरिदुत्थितैः।
जलकणैर्भवदुत्सवमेदिनीः
शशिशिराः शिशिराः कुरुते रमे ॥ **12.18** ॥ 570

त्रिणयनेन विनम्रशिरः क्षरत् -
त्रिदशसिन्धुमहोर्मिभिरुत्सवे।
किमपि पाद्यमदायि पदाब्जयोः
नतवता तव तामरसालये ॥ **12.19** ॥ 571

तव महे मिलितात् त्रिदशीगणात्
न बिभिदे नरलोक वधूजनः।
त्वदवलोकनविस्मयतो यतो
जननि मे न निमेषमवाप सः ॥ **12.20** ॥ 572

प्रणयिना सममुत्सवमण्टपे
स्थितिमतीं भवतीं प्रणिनंसवः।
हरिगिरिं हरिपत्नि समाश्रिताः
त्रिदिविनो दिवि नोपययुः स्पृहाम् ॥ **12.21** ॥ 573

अधिमहं भवतीं कमले स्तुवन्
अभिमुखः स्तिमितेक्षणमग्रतः।
अपि सुरेष्वसुरेषु नरेषु वा
शिरसि को रसिको न दधेऽञ्जलिम् ॥ **12.22** ॥ 574

अधिमहोत्सवमप्सरसां गणैः
सह रमे परभक्तिजुषस्त्वयि।
पुलकिनः कलगद्गदगीतयो
मुनिजना निजनाट्यमदर्शयन् ॥ **12.23** ॥ 575

उपगतोत्सवदिव्यगृहाङ्गणः
    कमलवासिनि संयमिनां गणः।
निगमसौरभशोभनया स्तुतिं
    स हि गिराऽहिगिरावकरोत् तव ॥ **12.24** ॥ 576

मधुविरोधिपुरन्ध्रि महोत्सवे
    शुभगुणग्रथिता किल मालिका।
स्तवमयी स्तबकैस्तव कैर्गिरां
    न कलिता कलिताडन काङ्क्षिभिः ॥ **12.25** ॥ 577

तव महे स्तवकोटिचिकीर्षया
    दृगधिका रसनाश्वकमे रमे।
रचयितुं स्तवमेकरसज्ञया
    कृशतमं शतमन्युरितत्रपः ॥ **12.26** ॥ 578

तव हरेर्दयिते दृढभक्तितः
    चतसृभिः श्रुतिभिश्चतुराननः।
अभिनुतिं तनुते स्म महोत्सवे -
    ष्वहरहर्हरहर्यभिनन्दिताम् ॥ **12.27** ॥ 579

जननि गन्धवहैर्भवदुत्सवे
    खगपतिः श्रुतिसौरभशोभनैः।
श्रमहरैर्जनितैर्निजपक्षति -
    व्यजनतो जनतोषणमातनोत् ॥ **12.28** ॥ 580

तनुभृतां तव देवि महोत्सवे
    नटनगाननतिस्तवनादयः।
परमभक्तिभरादिह नाभवन्
    श्रमकरा मकरालयकन्यके ॥ **12.29** ॥ 581

पदयुगं तव भक्तिभरादहं
प्रथमिकामुपगम्य सुरस्त्रिया।
हरिपुरन्ध्रि महेऽङ्गजितस्फुरत्
कनकया न कया परिचर्यते॥ **12.30** ॥ 582

दिनकरं तमसामिव राजयः
कमलवासिनि कल्मषपङ्क्तयः।
अपि विलोकयितुं प्रभवन्ति ते
जनमहो न महोत्सवदर्शिनम्॥ **12.31** ॥ 583

तव महे सुरदानवमानव
प्रभृतिपादहतिप्रभवै रमे।
क्षितिरजोनिचयैः स्थगितातपो
दिनकरो न करोति जनव्यथाम्॥ **12.32** ॥ 584

अथ तवास्यविधोरवलोकनात्
सुरकराम्बुरुहाणि महोत्सवे।
मुकुलितान्युडुपङ्क्तिपरिस्फुरन्
नवरदे वरदे कमलालये॥ **12.33** ॥ 585

मुकुलितं नियमेन कराम्बुजैः
मुदितमक्षिचकोरकुलैः सताम्।
तव महेऽम्ब हरौ नयनीभवत्
रविविधौ विविधौजसि भात्यपि॥ **12.34** ॥ 586

तव सिषेविषया विषयान्तर -
त्यजननिश्चलचेतस उत्सवे।
प्रजहुरम्ब तपोऽपि पराशर -
प्रभृतयो भृतयोगकलाः स्वयम्॥ **12.35** ॥ 587

सुमनसो मुनयश्च तवोत्सवे
    त्रिदिवधेनुपयोरसधारया।
विरचयन्त्यभिषेकविधानमृक् -
    चय जुषां यजुषां प्रकरै रमे ॥ **12.36** ॥ 588

विधिशिवादिसुरेषु तवोत्सवे
    विरचयत्स्वभिषेचनमिन्दिरे।
मनुशतं मुनिमाणवकाः स्फुट -
    ध्वनि जगुर्निजगुर्वभिचोदिताः ॥ **12.37** ॥ 589

तव महेष्वभिषेकविधौ कृते
    जगदशेषमगादपतापताम्।
तदिदमद्भुतमम्ब फलिस्थलात्
    फलगतिर्लगति स्म परत्र यत् ॥ **12.38** ॥ 590

अथ तवोत्सवधाम्नि बुधाः सुधा -
    करसहोदरि सादरमर्चयन्।
सुरभिळैर्भवतीं श्रुतषट् पदा -
    रवकुलैर्वकुलैरपि चम्पकैः ॥ **12.39** ॥ 591

मधुलिहां भवदङ्घ्रिसमर्पित -
    प्रसववासवतां कमले तदा।
सुरकिरीटगताज्जगृहे भिदा
    रवलवैर्बलवैरिशिलाकुलात् ॥ **12.40** ॥ 592

सुमनसो भवदङ्घ्रिजुषां रमे
    सुमनसामनुषङ्गत उत्सवे।
तव पदान्तिकभाजमपूजयन्
    सुमलिनामलिनामपि मण्डलीम् ॥ **12.41** ॥ 593

स्वशिरसा दधतः कुसुमं मुदा
सुमहिता इति नाद्भुतमुत्सवे।
चरणयोः सुरपङ्क्तिभिरर्पितं
तव नरा वनराशितनूभवे॥ **12.42** ॥ 594

पनसचूतफलादिभिरुज्ज्वलं
सरससूपमपूपशतावृतम्।
अथ निवेदनमम्ब सुरैः क्षरद् -
घृतवरं तव रम्यमकल्प्यत॥ **12.43** ॥ 595

जननि शेषतया भृशमुत्सुकैः
तव निवेदितशेषमभुज्यत।
सुमधुरं सुमनोभिरथोत्सवा -
पवरके वरकेतनभूषिते॥ **12.44** ॥ 596

अथ सुधान्यभवं जनमोदनं
जननि मानसरञ्जनमोदनम्।
भवदवेक्षणसंस्कृतमत्ति यो
रसनया स न याचति तां सुधाम्॥ **12.45** ॥ 597

अधिभवद्भवनाग्रवितर्दिकं
जननि जाग्रत एव जयादयः।
अगणयन्नमरानपि तावके
घनमहे न महेन्द्रपुरःसरान्॥ **12.46** ॥ 598

जनविमर्दशमोद्यतनिर्दयोद् -
भटचमूपतिवेत्रहतिस्पृशाम्।
प्रहृतिरस्ति मदम्ब महे तवा -
र्चनकृतां न कृतान्तकृतान्ततः॥ **12.47** ॥ 599

तव महोत्सववैभवदर्शिनां
    तनुभृतां विविधैः स्तवनादिभिः।
प्रमुदिता कमले भवती सतीः
    अपरिपूः परिपूरयति श्रियः॥ **12.48** ॥ 600

जननि तस्य जनस्य वृथा सुधा -
    सहभवे विदधे विधिरीक्षणे।
य इह नानुभवेदलसस्तवो -
    त्सवरसं वरसंमदकारणम्॥ **12.49** ॥ 601

भवदीयोत्सवविभवं
    फणिपतिवाचस्पतिप्रभृतिवर्ण्यम्।
कथमल्पधियः कवयः
    कथयन्तु क्षीरधेः कन्ये॥ **12.50** ॥ 602

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे उत्सवस्तबकः द्वादशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ वदान्यस्तबकः त्रयोदशः ॥

वाराशि दुहितुस्तस्या वरिवस्यां विदध्महे।
अनन्यजनसामान्याम् आहुर्यस्या वदान्यताम् ॥ **13.1** ॥ 603

द्वित्वं चेदधिरसनं विलोचनेषु
त्रित्वं वा यदि वदनेषु वा चतुष्ट्वम्।
यद्वा स्यादधिभुजमेतदम्ब वक्तुं
दातृत्वं तव कवयस्तदा क्षमेरन् ॥ **13.2** ॥ 604

यः पिबेज्जलधिमम्ब यस्तरेद्
यश्च तत्र नियतं शयीत वा।
तेन वर्णयितुमर्णवात्मजे
शक्यते तव वदान्यता न वा ॥ **13.3** ॥ 605

अम्ब त्वमेवाश्रितमृत्युहन्त्री
सनातनी सर्वफलप्रदाऽसि।
स्वयं च पञ्चत्वमुपाश्रितेभ्यो
देवद्रुमेभ्यो लभतां फलं कः ॥ **13.4** ॥ 606

तामत्युदारां कमले भजे त्वां
यया सुधाब्धौ सहजन्ममात्रात्।
एकस्तरुर्लब्धवतंसकोऽन्यः
पशुश्च कश्चित्प्रथितो वदान्यः ॥ **13.5** ॥ 607

त्वमम्ब दात्रीति किमत्र चित्रं
　　त्वद्वासदेशेऽपि न लोभवार्ता।
निदर्शनं तत्र भवन्निवासः
　　सर्वार्थदायी स वृषाद्रिनाथः॥ **13.6**॥ 608

औदार्यमास्तां नृहरेर्य एष
　　हिरण्यदानावसरे सरोषः।
सानन्दमिष्टं सकलं ददत्याः
　　स्तुत्यं वदान्यत्वमिदं भवत्याः॥ **13.7**॥ 609

देहि देवि दयया निरामयाम्
　　अत्र च श्रियममुत्र च स्वयम्।
सञ्चरेम न यथा मुहुर्वयं
　　याचका इह पिशाचका इव॥ **13.8**॥ 610

त्वमेव सर्वकाङ्क्षितप्रदा पदाब्जसेविनां
　　वदान्यतागुणस्तु ते वदान्यतः क्व दृश्यते।
सुधापयोधिकन्यके मुधा समुन्नतिस्पृशा
　　न दानवारिदारुणोत्तमेन विद्यते फलम्॥ **13.9**॥ 611

श्रीवत्सजुष्टं स्थलमाश्रिता त्वं
　　मनोहरा क्षीरचिताश्रितश्रीः।
प्रवालदीधित्यवलम्बिताङ्घ्रिः
　　सत्यं रमे कामधुगस्युदारा॥ **13.10**॥ 612

ख्यातः कलामात्रद एष चन्द्रो
　　मातः शिबिश्चेत् पलमात्रदायी।
विषप्रदो वारिधरः श्रितानां
　　कल्याणि काङ्क्षाधिकदा त्वमेव॥ **13.11**॥ 613

कल्पद्रुमः सुमित एव घनोऽप्रदाता
कर्णोऽप्यपार्थकरुणः स बलिः कुदाता।
नाथस्तवापि कमले स हिरण्यहारी
नातोऽस्ति ते वितरणे प्रतिवस्तु किञ्चित्॥ **13.12**॥ 614

आमोदजुष्टं मधुकालयोगात्
फलं ददानं भजतामभीष्टम्।
शाखाशतोदारसुपर्णवाहं
देहं रमे कल्पतरुं तवाहुः॥ **13.13**॥ 615

मुदा वदान्याश्रितमब्धिकन्ये
यं किन्नरेशादधिकं करोषि।
न किं नरेशादधिकः स एष
इतीममाहुर्भुवि हन्त सन्तः॥ **13.14**॥ 616

विविधविभवदात्रीमिन्दिरे विश्वधात्रीं
भगवति पदवीं यः सेवते देवतेड्याम्।
अधिकृतिलवमात्रादन्तरिक्षोन्मुखाक्षान्
अयमगणितसत्त्वानल्पकान्नोपसर्पेत्॥ **13.15**॥ 617

त्वयि भगवति सत्यां सर्वमिष्टं ददत्यां
किमपि नृपपिशाचं याचते यः कुचेताः।
फलवति सहकारे भासुरे सत्यदूरे
श्रयति दुरधिरोहं देवि शाकोटकं सः॥ **13.16**॥ 618

प्रपदनजुषां दृष्टादृष्टार्पणैकवदान्ययोः
तव चरणयोः सेवामेवाचराणि हरेः प्रिये।
सकृदपि पुनस्त्रासी नासीय हन्त विवित्सया
परुषवचसां राज्ञां प्राज्ञावमानकृतां पुरः॥ **13.17**॥ 619

दृष्टादृष्टदयार्द्रया शिशिरया दत्ताखिलार्थास्त्वया
मातर्वातविधूतवारिदचलश्रीलेशलब्धोन्नतेः।
दर्पोद्रेकविनर्तितभ्रु परुषं दन्दह्यमानेक्षणं
दस्योरास्यमुपास्य कस्यचिदमी न स्याम हास्या वयम्॥ **13.18** ॥ 620

कातर्येण कदर्यवर्यनृपतिप्रीतिप्रतीक्षोदितः
कष्टं कष्टमपास्तवास्तवचमत्कारो न मे रोचते।
रामे वेङ्कटनेतुरद्भुतगुणग्रामे दयामेदुरां
त्वामेव श्रितकामधेनुमसकृत् सा मे स्तुतां भारती॥ **13.19** ॥ 621

भीमानहं न भीमान्
राज्ञां निचयान् श्रयेय घोराज्ञान्।
कल्पानोकहकल्पान्
शौरेः दारान् भजे महोदारान्॥ **13.20** ॥ 622

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे वदान्यस्तबकः त्रयोदशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ यमकस्तबकः चतुर्दशः ॥

यशस्विनीमुपासीय यदुनाथसधर्मिणीम्।
यमकं कथयन्त्यार्या यत्पदं कल्पशाखिनः॥ **14.1** ॥ 623

दयासंपूर्णहृदया मया कृतमनामया।
रमा गुणेन परमा स्तवं गृह्णातु वास्तवम्॥ **14.2** ॥ 624

मातस्त्वदङ्घ्रौ मम देहि भक्तिं
माऽतः परस्मिन् हृदयं प्रसाङ्क्षीत्।
सा कंसशत्रोर्दयिते शुभेन
साकं चरीकर्त्यशुभप्रशान्तिम्॥ **14.3** ॥ 625

रमाऽरमापत्तिमपास्यतां मे
दयोदयोपेक्षितभक्तमन्तुः।
मुदामुदारां च दिशेत् समृद्धिं
नतानतापान् कुरुते यदीक्षा॥ **14.4** ॥ 626

रमे पदाब्जे तव ते मनोरमे
नमेयमुच्चैरितरा गतिर्न मे।
सुरेश्वरो यद्भजनेन भासुरे
पदे पुना राजति दैत्यलोपदे॥ **14.5** ॥ 627

उदारविभवा भवामयहरा
हरादिमहिता हिताय कमला।

सुधौघसदृशा दृशा शुभदया
    दयालुरधुना धुनातु दुरितम् ॥ **14.6** ॥ 628

घनाघनाभस्य घनाघनाशिनः
    सदा सदाशारसदा सदार्द्ध्यधीः।
हिताहिताक्ष्यां रहिताहिता मनो -
    रमेऽरमेवाचर मे रमे मुदम् ॥ **14.7** ॥ 629

सरोरुहारामगृहां सुमल्लिका -
    सरोरुहारां कमलां मधुद्विषः।
भुजान्तरामोदकरीं नुमः क्षमा
    भुजां तरामोऽनुसृतिं व्यथाम्बुधिम् ॥ **14.8** ॥ 630

नृपो निरास्थः सुमनोजने यो
    मनोजनेयो न हि तेन मेऽर्थः।
स्थितां प्रणम्यासमुरस्यहं तु
    मुरस्य हन्तुः स्वयमिन्दिरे त्वाम् ॥ **14.9** ॥ 631

दृष्टिर्दयैकावनि ते रमे नः
    छिनत्तु विष्णोर्वनितेऽरमेनः।
भवं तवास्येयमपीडनेन
    कुतः क्षतिर्मे यमपीडनेन ॥ **14.10** ॥ 632

कुभूभुजां सम्प्रति माननेन
    फलं सुधांशुप्रतिमानने न।
शुभं प्रयच्छाविकलं कलेश -
    स्वसस्त्वहं स्यां विकलङ्कलेशः ॥ **14.11** ॥ 633

करोतु मोदं कमला समुन्मिषत् -
    कलाविलासा रसिनी विभावसौ।

कृपानिधौ वेङ्कटशैलनायके
    कलाविला सारसिनी विभावसौ ॥ **14.12** ॥ 634

योगाय यो गायति भावुकेन
    रामे वरामेव हरेस्तवाख्याम्।
नालीक नालीक सवित्रि धाम
    तेनाक्षतेनाक्षयमाप्यते तत् ॥ **14.13** ॥ 635

नृणां दृशः सार्थयितुं तवाभूत्
    रमे यदेहा नरमेयदेहा।
प्राप्ता तदा त्वं फणिराजशैल -
    वनालिकेलां नवनालिकेराम् ॥ **14.14** ॥ 636

त्वयाश्रितस्यात्र परत्र चोच्चै -
    रकारि रामे नरकारिरामे।
गोपालकं त्वं नयसे रसं या
    गवा समेतं नगवासमेतम् ॥ **14.15** ॥ 637

शुद्धया त्वदभिधासहस्रकं
    यो गिरा जपति ना समन्ततः।
त्वं विदुर्हरिसखि त्रयीविदो
    योगिराजपतिना समं ततः ॥ **14.16** ॥ 638

दानश्रिया विहसितामरसालये तां
    तापापहां जननि तामरसालये ताम्।
पादद्वयीं स हि भजेद्रुचिरागमां ते
    यस्यास्ति निर्मलधियो रुचिरागमान्ते ॥ **14.17** ॥ 639

वशितसर्वजगत्पतिरक्षया
    दृगशुभं तव लुम्पति रक्षया।

हृदयमुज्झतु देवि न मामकं
    त्वदिनमन्यमितो विनमाम कम् ॥ **14.18** ॥ 640

त्यजति यच्छुभलाभवती न तान्
    जननि मत्प्रभृतीन् भवती नतान्।
मिलति मे न यथा मतिरंहसा
    मम तथा दयतामतिरंहसा ॥ **14.19** ॥ 641

पद्मेऽस्तु तुभ्यं प्रथमा नमस्या
    स्थिरं फलं हि प्रथमानमस्याः।
विधाय मान्यामहतामहं तां
    हराम्यरीणां महतामहन्ताम् ॥ **14.20** ॥ 642

भवत्यजेयं तनुतेऽजसेव्या
    जनाय लोकं दययैव तं श्रीः।
भवत्यजे यं तनुतेजसे व्या -
    ध्यघोज्झितं मे कुहृदेऽपि दत्ते ॥ **14.21** ॥ 643

निधाय भवती दृशं नवसरोजपत्त्रायतां
    श्रितं हरिपुरन्ध्रि मां हृतनमद्विपत् त्रायताम्।
न मां किल विना त्वयाऽवति तमः कदम्बादयः
    कठोरहृदयो हरिःखलजनेऽस्मदम्बादयः ॥ **14.22** ॥ 644

न स माधवस्तव गुणानसमा -
    यतनेत्र एव कमलायतने।
क्षमतेऽभिधातु मतिदक्षमतेः
    स्तवनाय कः पटुमतिस्तव ना ॥ **14.23** ॥ 645

भवती जगदम्ब कृतार्तभवो -
    परमा परमा परमा परमा।

कुहृदोऽद्रितटीमवनाय कृपा -
    महिता महिता महिता महिता ॥ **14.24** ॥ 646

रमा रमा रमा रमाध्युपासितं यमर्णवात्।
धियो हरिं वृषाचलोत्तमेतमेतमेत मे ॥ **14.25** ॥ 647

त्रातुमप्रच्युता वारिजातेक्षणा
    त्वं नतात् ध्वस्तदेवारिजातेक्षणात्।
पातकादिन्दिरे पाहि मां शोभित -
    श्रीरघ ध्वान्तलोपा हिमांशोऽभितः ॥ **14.26** ॥ 648

मन्दारा मन्दारा मन्दारा मन्दारात्
    व्याधिघ्ना दैत्यारेः शेषाद्रिं तं प्राप्ताः।
सारावा सारावा सारावा सारावा -
    गालीढा शृङ्गालीः यस्यार्तान् सन्त्रातुम् ॥ **14.27** ॥ 649

शमदमौ मदमौढ्यहरौ वहन्
    मधुरिपुं धुरि पुण्यकृतां स्थितः।
विनमतीनमतीव तवार्चको
    निजगदं जगदम्ब जहाति च ॥ **14.28** ॥ 650

जननि त्वया परिचरत्
    सुरकिन्नरकान्तया नयजुषा स्तुतया।
हृदि मे विना किमपि कृत्तनमन्
    नरकान्तया न यजुषा स्तुतया ॥ **14.29** ॥ 651

त्वमेव सेव्याऽसि दृशैव ते स्थिरं
    रमे यतो यादवनायके बलम्।
उरो हि शौरेरुदधेस्त्वमग्रही
    रमेय तोयादवनाय केवलम् ॥ **14.30** ॥ 652

सारसं श्रितवतीं ससारसं -
    माननां हिमकरोपमाननाम्।
देवतां प्रणमतो मुदेव तां
    वेदनादमहितां न वेदना ॥ **14.31** ॥ 653

सा मयि देयादीक्षां
    रमार्त रक्षार्थमाददे या दीक्षाम्।
यत्पदजलजनतानाम्
    अपि सुगमं दिव्यधाम जलजनतानाम् ॥ **14.32** ॥ 654

कमले राजीवानां
    कुले स्थिता त्वं गतिः परा जीवानाम्।
जगदाराध्या यन्ति
    श्रेयस्त्वां ये कृतादरा ध्यायन्ति ॥ **14.33** ॥ 655

किमपि महोदारेषु
    प्रथमं मधुवैरिणो महो दारेषु।
जयति सपर्या यस्य
    स्थिरफलदात्री सुरद्रुपर्यायस्य ॥ **14.34** ॥ 656

विधृतां हरिणाङ्केन
    त्वां प्रतिवददाननां हि हरिणाङ्केन।
प्रणमन् जननि बिडौजाः
    जनो भुवि स्यात् स्वबन्धुजननिबिडौजाः ॥ **14.35** ॥ 657

कलशोदधिकन्या यं
    पश्यति विद्यात् स तावदधिकन्यायम्।
जितकथकवितानेन
    त्रयीविदा लभ्यते च कविताऽनेन ॥ **14.36** ॥ 658

श्रीः सेवानरकेषु
    त्वयाऽर्थ्यतां हरिरिताढ्यवानरकेषु।
मां विनिपात्य न घोराः
    शुचो यथा नयति किन्तु पात्यन घोराः॥ 14.37॥ 659

सततविकाराकल्पं
    प्राप्तोऽहं देहमम्ब काराकल्पम्।
कुभवादाशु भवत्या
    स्वयमुद्धार्यो रमे सदा शुभवत्या॥ 14.38॥ 660

सारासाराज्ञान -
    स्थानेन किमस्ततेजसा राज्ञा नः।
श्रीस्त्वयि मानसमेतत्
    न्यस्येम विमुक्तयेऽभिमानसमेतम्॥ 14.39॥ 661

व्यक्तिं विन्देमहि ताम्
    इन्द्रादिसुरैर्नवारविन्दे महिताम्।
मध्यमतारकवर्णे -
    ऽभिहिता या नखजितोरुतारकवर्णा॥ 14.40॥ 662

हृतसदरिद्रव्याधिः
    श्रितजनमुच्छिन्नदुर्दरिद्रव्याधिः।
अतुलकृपा या देव -
    प्रणुता सा मां रमाऽत्र पायादेव॥ 14.41॥ 663

शोषितभवनदयाग -
    स्तन्येशः कचजितोत्प्रभवनदयागः।
सोऽनभिभवनदयागः
    सोढ्वाऽवति पद्मयाऽऽत्मभवनदयागः॥ 14.42॥ 664

त्वां हि सुधी राजयति
    स्तुतां स्तवैर्यः प्रमानिधी राजयतिः।
भवति स धी राजयति
    श्रीः स्तंभभुवोऽत्र सोदधीरा जयति ॥ **14.43** ॥ 665

भक्ततमानायतया
    दृक् तव कमले सुरोत्तमानायत या।
विश्रुतमानायतया
    शमय भवं श्रेयसेऽसमानाय तया ॥ **14.44** ॥ 666

श्रीः परभागवतीयम्
    अभिष्टुता सा मुकुन्दभागवती यम्।
फणिवृषभागवतीयं
    पश्यति भजते पदं स भागवतीयम् ॥ **14.45** ॥ 667

तृड्या तनयाचार्याः
    अहितेनान्तस्त्वयाऽब्धितनया चार्या।
त्वं चित्त न याचार्या
    प्रभृतीरितरा नमच्छ्रुतनयाचार्याः ॥ **14.46** ॥ 668

मां हरिरामाऽऽयतया
    दृशा पुनात्वेनसां विरामाय तया।
प्रथिततरामायतया
    काकेऽप्यसुरे कृपां परामायतया ॥ **14.47** ॥ 669

राशेर्वारामस्य
    श्रीस्त्वं दुहिताऽथ चोत्सवारामस्य।
अवनिभवा रामस्य
    प्रिया धियं नः सदोषवारामस्य ॥ **14.48** ॥ 670

हरिसुरदारुण्ये नः
स्थितिमुषि वल्लिवदभूद्यदारुण्येन।
भृतवन्दारुण्येन
त्वीडे दैवतमसङ्गि दारुण्येन॥ **14.49** ॥ 671

श्रीर्हितकरवाणी यान्
पश्यति तेभ्यो नमांसि करवाणीयान्।
हृतशोकरवाणीयान्
हातुमनर्थान् सुमप्रकरवाणीयान्॥ **14.50** ॥ 672

महोदयाऽऽसारभुजात्वयातया
महोदया सारभुजा त्वया तया।
विलोपकारातिशयास्तदे विभा -
विलोपकारातिशयास्त देवि भा॥ **14.51** ॥ 673

सुरक्षया देवहिता दृशावमा -
सुरक्षयादेव हि तादृशाऽव मा।
मुदा रमे धेहि गिरा विहानता -
मुदारमेधेऽहिगिराविहानता॥ **14.52** ॥ 674

केवलं तुच्छविमता हरिणा क्षितवामताः।
के वलन्तु च्छविमता हरिणाक्षि तवामताः॥ **14.53** ॥ 675

वैरस्य हानिदानेन मान्यासाध्येन साऽद्य तु।
वैरस्यहानिदानेन मान्या साध्येन सा द्यतु॥ **14.54** ॥ 676

वृषाचलेऽशङ्करतोद्यमान -
वृषाचले शङ्करतोद्यमा न।
वृषाचलेशं करतोद्यमान
याम्बात्यजो वष्टि दृशो गिरस्ते॥ **14.55** ॥ 677

राजीवायतना परत्र महतीं कुर्यान्मुदे नः कृपा
राजीवायतनागबाहुरघ हृत् कृष्णो न देवोऽपरः।
रा जीवाय तनाविहापि सुखदा शुद्धा तयैवार्प्यते
राजीवायत नायकं फणिगिरेर्याऽसौ दयास्रोतसाम्॥ **14.56**॥ 678

कौमारमारचयतः सफलं तपोऽस्य
सा मारमारकनुतस्य वृषाचलेन्दोः।
रामा रमा रहितकोपतया कृतास्मत् -
क्षेमारमारविसुधांशु जयत्यवन्याम्॥ **14.57**॥ 679

कलितमसारमनाशा -
ध्यायामहितं न रामरामान्यम्।
कलितमसारमनाशा
ध्यायाम हि तन्नरामरामान्यम्॥ **14.58**॥ 680

सारसेन महितापहारिका -
सारसेनमहितापहारिका।
सारसेन महिताप हारिका -
ऽनन्तगा जयति याऽनघा रमा॥ **14.59**॥ 681

त्वं गतिं जननि यच्छ वैभवी
मा नयाऽमितरसा महो दया।
मानयामि तरसामहोदया
मानयामितरसामहोदया॥ **14.60**॥ 682

मारमातरणिमानमस्यतां मा रमातरणिमानमस्यताम्।
मारमातरणिमानमस्यतां मारमातरणि मानमस्य ताम्॥ **14.61**॥ 683

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे यमकस्तबकः चतुर्दशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ नक्षत्रमालास्तबकः पञ्चदशः ॥

आनन्दमैन्दिराः कुर्युरपाङ्गा यत्प्रसङ्गतः।
अश्विनीहस्तिसंपन्ना सम्पदुज्जृम्भते नृणाम्॥ **15.1** ॥ 684

भगवति सुधाब्धिकन्ये
भवतीं भूष्णुः प्रपद्येऽहम्।
परमाभरणीभूतां
भुजान्तरे भोगिशैलेन्दोः॥ **15.2** ॥ 685

निजशिरसि निदधदुच्चैः
सम्पन्मय्यास्तवाम्ब सोदर्यम्।
अपि सकलविभवदायी हा
वस्त्रीभूतकृत्तिको भिक्षुः॥ **15.3** ॥ 686

तामसह्यभवतापशान्तये
स्तौमि तामरसवासिनीमहम्।
वर्णयन्ति यदपाङ्गमालिकां
वासुदेवनिलयाधिरोहिणीम्॥ **15.4** ॥ 687

तव सुधांशुजयाभिमुखं मुखं
मृगशिरोमणिदर्पमुषौ दृशौ।
विघटकं च वपुस्तटिदुन्नतेः
भुवनमातरतो न तवोपमा॥ **15.5** ॥ 688

वरुणालयेन्द्रतनये करुणार्द्राः
    तव लोकमातुरवलोकविशेषाः।
परितन्यमानदुरितं सततं माम्
    अधुना पुनन्तु मधुनाशनकान्ते ॥ **15.6** ॥ 689

शापेन रोषणमुनेः शमितप्रभावः
    देवोत्तमो मधुजितो दयिते विषण्णः।
तन्वंस्तव स्तववचः स्तबकैः सपर्यां
    स्थाने विराजति पुनर्वसुरुद्रसेव्ये ॥ **15.7** ॥ 690

निगमकथितमायुर्निस्तुलारोग्यभाग्यं
    निरवधिकविभूतिं नित्यहृद्यां च विद्याम्।
भगवति गुणपूर्तिं भासमानां च कीर्तिं
    बलिरिपुपदभक्तिं भेजुषां पुष्यसि त्वम् ॥ **15.8** ॥ 691

शेषाचलाधीशाङ्काश्लेषाचला मोदोन्नतिः
    सैषा भवोन्मेषाब्धि संशोषावहा विश्वप्रसूः।
तोषाय नः कल्पेत दुर्दोषापहा यस्याः पदं
    भाषाशचीमुख्यद्युसद्योषा शिरोभूषायते ॥ **15.9** ॥ 692

इहोपास्ते यस्ते चरणकमलद्वन्द्वममलं
    स पूज्यः स्वाराज्यं जननि कलयिष्यन्नविकलम्।
मघोनः साम्राज्यं मदनमथनस्यापि विभवं
    तृणप्रायं प्रायो गणयति पदं द्रौहिणमपि ॥ **15.10** ॥ 693

आर्यसेवितमक्षयं फलमिष्टमार्यमतारकं
    यत्क्षणेन निजेक्षणेन मुदा ददाति सनातनम्।
तत् तटित्समधाम मङ्गलनाम तामरसालयं
    पालयत्विममानमत्सुरयौवतं परदैवतम् ॥ **15.11** ॥ 694

एकेनाञ्जलिनैव कञ्जनिलये सर्वार्थमुर्वीतले
सन्दायाथ मुकुन्दमन्दिरगतिं संतन्वतीं त्वां विना।
मा रंस्तातिचले खले नृपकुले वागुत्तरा फल्गुनी -
त्याशासेऽहमहर्निशं तदितरद्याचामि नो जातुचित्॥ **15.12**॥ 695

क्षिपतु क्षिप्रमनल्पमप्रतिहतस्तापत्रयं मामकं
भवदावाग्निभयावहस्तव कृपावीक्षासुधानिर्झरः।
व्यधयन् साधुकदम्बमम्ब विहितप्रौढागमव्याहतिः
शशिनः सोदरि हानिदाघविभवः शान्तिं यतो विन्दति॥ **15.13**॥ 696

लोके पाकारिमेके विरचितयजनश्रेणयः प्रीणयन्ते
केचित् त्रासापनुत्त्यै विदधति नृहरेर्योगिवर्याः सपर्याम्।
अन्ये पाथोधिकन्ये हरपरिचरणं कुर्वते सर्वदेह
त्वामेवामेयरूपां मनसि वयममी सर्वदा भावयामः॥ **15.14**॥ 697

मयि सर्वापकृतिक्षमेऽपि कलयस्वातीव शीतां दयां
हरिकान्ते भुवनोपकारनिरतेष्वन्येषु धन्येष्विव।
पनसाम्रादिमहीरुहेषु ददती भूरीणि वारीणि सा
विषवृक्षेऽपि मुहुः प्रवर्षति न किं विश्वाम्ब कादम्बिनी॥ **15.15**॥ 698

पूर्णं वर्णयितुं तवाम्ब निगमा न प्राभवन् प्राभवं
यस्याः स्वर्गणिका मुदं विदधते दास्येन लास्येन च।
वाणी सा च विशाखदन्तिमुखयोर्माताऽपि जातादरे
धन्ये चामरवीजनं रचयते धत्ते कलाचीं शची॥ **15.16**॥ 699

बहुतरमनूराधारयता मुखैरखिलश्रुतीः
नळिनजनुषा निर्मातुमहो यदम्ब न शक्यते।
कथमिह तव स्तोत्रे कवयः स्वयं वयमिन्दिरे
जगति शिशवोऽशक्यार्थकृतोऽथ वा जननीमुदे॥ **15.17**॥ 700

त्रस्यत्ताताभिहितवचनत्राणधर्माय सीते
ज्येष्ठैकार्हं रघुपरिबृढे राज्यमुत्सृज्य याते।
विश्वं त्रातुं त्वमनुचलिता वीरमेनं हि नो चेत्
कस्माद्भस्मीभवतु जगतां कण्टकः पङ्क्तिकण्ठः॥ **15.18** ॥ 701

द्विषच्चमूलयेच्छया तवाङ्घ्रिपद्ममिन्दिरे
स्फुरत्सरोजमन्दिरे सुराः पुरा ववन्दिरे।
तदेव संपदे वयं निरापदे तमोभिदे
भजामहे भुजायुगीयुजा नतेन मौलिना॥ **15.19** ॥ 702

कलितनियमपूर्वाषाढकाषायचेला
यतसकलहृषीका यद्यतीन्द्रा विशन्ति।
तदपि भजति धाम न्यस्य भारं त्वदङ्घ्रौ
मम जननि नृपाशो मादृशो बालिशोऽपि॥ **15.20** ॥ 703

सारापदानशतमोदितविश्वदेव -
तारापतिस्थमपि भानुसुतेन राज्यम्।
त्वत्प्राप्तिकार्यसहकारिगिरैव लब्धं
कार्योद्यमोऽपि महतां कमले शिवाय॥ **15.21** ॥ 704

दुरितं विषह्य निखिलं दयानिधे
परिपात्वकिञ्चनजनं भवानिति।
जगदुद्भवादिनिरतस्य शार्ङ्गिणः
श्रवणेऽभिधेहि रहसि स्वयं रमे॥ **15.22** ॥ 705

अशक्तोऽस्मि दुःसाधनिष्ठासहस्रे -
ष्वहं कर्मबोधाद्युपायान्तरेषु।
अतस्तावकीने सुरद्रोरनूने
पदे लोकमातः प्रपद्येऽतिभीतः॥ **15.23** ॥ 706

त्वत्परिग्रहजुषं द्विषन् रमे
क्षीयते बहुसहायवानपि।
तन्निदर्शनमपास्तवारिजः
चन्द्रमाः शतभिषङ्निषेवितः॥ **15.24** ॥ 707

भगवति यस्य भवद्गुण -
कीर्तनकं प्रोष्ठपदमास्यम्।
भवति हि जगति गतिस्त -
च्चरणाम्बुजरेणुरस्माकम्॥ **15.25** ॥ 708

त्वत्पदमरविन्दगृहे
वन्दन्ते हन्त जन्तवो भुवि ये।
भुवनोत्तरभाद्रपद
क्षुण्णममीषां गृहद्वारम्॥ **15.26** ॥ 709

शिशिरेऽवतीर्य सिन्धौ
साकं शीतांशुना पद्मे।
करुणार्द्रे कान्तहृदि
स्थास्नुर्मुष्णासि तापं मे॥ **15.27** ॥ 710

संग्रथ्य चित्रैः पदरत्नखण्डैः
समर्पिता दास्यजुषा मयैषा।
नक्षत्रमाला नदराजकन्ये
हृद्या त्वदीये हृदये चकास्तु॥ **15.28** ॥ 711

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे
नक्षत्रमालास्तबकः पञ्चदशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ चित्रचरित्रस्तबकः षोडशः ॥

पवित्रं पद्मनाभस्य कलत्रं तत्पुनातु नः।
विचित्रं त्रिषु लोकेषु चरित्रं यस्य गीयते ॥ **16.1** ॥ 712

अप्राकृतेऽपि भगवानवताररूपे
प्रायः प्रजानुगुणमेव करोति जन्म।
मातस्त्वया हि मथिते प्रथमे हि भूते
चित्रं पुरा जनिरकारि तथा द्वितीये ॥ **16.2** ॥ 713

ख्यातो भुवि ज्वलनशीतलिमानुमानं
बाधानुविद्धमिति तार्किकसम्प्रदायः।
वालानले कमलवासिनि वायुसूनोः
चित्रं चकर्थ कृपया शिशिरं त्वमेव ॥ **16.3** ॥ 714

निमग्नमग्नौ किल वस्तु भूयो -
ऽप्युन्मज्जतीति क्व नु देवि दृष्टम्।
वपुर्विचित्रं तव वह्निमग्नम्
उन्मज्जनं मज्जननि प्रपेदे ॥ **16.4** ॥ 715

स्वबाधकान् साधुजनोऽपि शक्तौ
बाधेत पाथोधिसुते जगत्याम्।
बाधाविधात्रीर्भवती ररक्ष
रक्षःस्त्रियः प्रत्युत वायुपुत्रात् ॥ **16.5** ॥ 716

शोकादपेतः स तवावलोकात्
पाकारिपाकः किल काक एकः।
लोकाननेकान् लभते स्म चित्रं
नाकाधिपार्थ्यानपि वृद्धगृध्रः॥ **16.6**॥ 717

प्रायः स्त्रियः पत्युरतिप्रियाश्चेत्
पद्मे सदा पार्श्वमुपाश्रयन्ते।
निरन्तरं त्वं तु निधीयसेऽहो
भुजान्तरे भोगिनगेश्वरेण॥ **16.7**॥ 718

कान्तः प्रियां वहति कामवशाद् दृशीति
वाङ्मात्रमेव भुवि शुश्रुम वार्धिकन्ये।
आश्चर्य मब्जनयनो हरिरब्जगा त्वं
युक्तं ततो दृशि बिभर्ति तव प्रियस्त्वाम्॥ **16.8**॥ 719

सर्वे किञ्चित्कुर्वतः स्वानुकूलान्
संरक्षन्तः प्रेक्षिताः सिन्धुकन्ये।
अञ्जल्यज्ञानार्जितागः प्रपञ्चान्
अस्मादृक्षानप्यहो रक्षसि त्वम्॥ **16.9**॥ 720

दृष्टा वेणुं जडमपि जना देवि वाचालयन्तः
कृष्णोऽप्येनं मुखरयति चेत्किं पुनस्तत्र चित्रम्।
श्लोकान् मूकानपि च भवती वादयत्यप्रयत्नात्
चित्रं शौरेः सखि वयममी तत्र दृष्टान्तभूताः॥ **16.10**॥ 721

मादृक्षरक्षणकृते मकराङ्कमातः
बाहान्तरे करुणया भवती निविष्टा।
अर्चात्मना ध्रुवमवस्थितमञ्जनाद्रौ
विश्वम्भरं विविधकार्यकरं करोति॥ **16.11**॥ 722

विश्वप्रसूरपि त्वं विचित्रमुरगेन्द्रशैलपतिकान्ते।
मन्मात्रासाधारणमातेव विशिष्य पुष्यसि रमे माम्॥ 16.12 ॥ 723

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे चित्रचरित्रस्तबकः षोडशः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ नामवैभवस्तबकः सप्तदशः ॥

धाम्ना दृश्येय राजीवधाम्ना तेन दयालुना।
आम्नानं जातुचिद्यस्य नाम्नां ज्ञानैर्युनक्ति नः ॥ **17.1** ॥ 724

अर्णवेन्द्रतनयेऽतिदुःसहैः
दुर्नरेशगुणवर्णनातपैः।
आर्तया रसनयाऽद्य शीतलं
कीर्तयामि तव नाम केवलम् ॥ **17.2** ॥ 725

राजीवगेहे तव मर्त्यराजी -
राजीवयन्ति व्यसनाग्निमग्नाः।
नामानि यः कीर्तयते स धन्यो
वैमानिकानामपि माननीयः ॥ **17.3** ॥ 726

पञ्चेषुचापल पलायनसिद्धमन्त्रं
घण्टाविशेषनिनदं कुहनापिशाच्याः।
कोपानलप्रशमसान्त्ववचो मुरारेः
के नाम नाम न जपन्ति तवाब्धिकन्ये ॥ **17.4** ॥ 727

आम्नायदुग्धजलधेरमृतं मदम्ब
नित्यद्विषां प्रहरणे द्रुहिणास्त्रमन्त्रः।
नारायणस्य किल नित्यजपस्त्वदीयं
नाम प्रगल्भतममभ्युदयं तनोतु ॥ **17.5** ॥ 728

नामरक्षणपरस्तवोचितं
नामरक्षणमपेक्षते रमे।
यस्तनोति तव नामयोजनं
सोऽयमद्भुतमनामयो जनः॥ **17.6** ॥ 729

साम्नां जन्मान्तरमखिलऋग्वर्गसर्गान्तरं वा
पर्यायो वा सकलयजुषां प्रक्रियाथर्वणानाम्।
वेदान्तानां किमु विनिमयो विश्रुतं विश्वमातः
दिव्यं भव्यं दिशति जपतां देवि नाम त्वदीयम्॥ **17.7** ॥ 730

त्रय्यन्तैकप्रणयिमनसस्तापसाः पापसार्थ -
प्रत्यादेशप्रमुदितमहाचेतसः स्फीतसत्त्वाः।
नाम श्रीमत्तव किल वलत्कीर्तयः कीर्तयन्तः
मातर्मुक्तौ विहितकुतुका मोदयन्ते प्रियं ते॥ **17.8** ॥ 731

भास्वद्वर्णं वृषगिरिपतेर्भावुकं तन्वता ते
धाम्ना धाम स्फुरति जलधेः पुत्रि नाम्ना च नाम।
रम्यं हर्म्यस्थलमपि महीरक्षिणः शैलतुङ्गं
दीपारोपं रजनिषु विना देवि देदीप्यते किम्॥ **17.9** ॥ 732

अप्यस्माकं वचनमचमत्कारि कंसारिकान्ते
प्राज्ञास्वाद्यं भवति भवतीनामधेयानुषङ्गात्।
कर्पूरादिस्थिरपरिमल द्रव्यसाचिव्यभूम्ना
निर्गन्धे स्यादपि सुरभिता निम्बकाष्ठस्य चूर्णे॥ **17.10** ॥ 733

अम्बा लक्ष्मीरमृतसहभूरब्धिराजन्यकन्या
पद्मा विश्वम्भरसहचरी पद्मसद्मा रमेति।
यो नामैवं पिबति भवती नामनामामृतौघं
तस्यैवाहुर्जननि सुलभां संसृतिश्रान्ति शान्तिम्॥ **17.11** ॥ 734

न मुहुर्बहु मन्महे मनून्
    न च वाचो जरतीरधीमहे।
प्रयताः प्रयतामहे वयं
    तव नाम्नां हरिपत्नि कीर्तने ॥ **17.12** ॥ 735

अनिरास्यमधोक्षजप्रिये
    भवरोगं बहुलङ्घनैरपि।
तरितुं प्रभवन्ति लीलया
    तव नामौषधसेविनो जनाः ॥ **17.13** ॥ 736

न हि नन्तुमनन्तमीश्महे
    न च निर्माणकथाऽपि कर्मणाम्।
कमले कलिभीनिवर्तनं
    कलयामस्तव नामकीर्तनम् ॥ **17.14** ॥ 737

विविधानि तवाधुना तु नाम
    व्यसनान्यब्धिसुते धुनातु नाम।
अपि यज्जपतः कलावहानि
    स्युरमून्युज्ज्वलधी कलावहानि ॥ **17.15** ॥ 738

राष्ट्रप्रसङ्ग कुजनस्तुतिराजकार्य -
    दुस्तर्कवाद परदूषणदोषशान्त्यै।
नारायणप्रियतमे ननु पावनानि
    नामानि कीर्तयतु ते रसना मदीया ॥ **17.16** ॥ 739

प्रादेशसंमितनिजोदरपूरणार्थैः
    अत्यर्थमेभिरनृतैरभिदह्यमाना।
निर्वातु नीरधिसुते रसना त्वदीयैः
    आख्याशतैरभिमतैरमृतैरिवासौ ॥ **17.17** ॥ 740

अगतिकदेहिदेहि वचनश्रुतिदुःखदशा -
कुपितमितम्पचस्तवनदुष्कृति निष्कृतयः।
भवदभिधासुधा भवदवानलतापमुषः
जननि पुनः पुनः परिपुनन्ति जगन्ति रमे ॥ **17.18** ॥ 741

श्रुतिफणितिस्थिति स्मृतिपुराणततिश्रवणे
भगवति मादृशां जगति न प्रतिभाति गतिः।
तदपि तव त्वदीयदयितस्य च नामजपः
जयति कलौ युगे जडधियामपि कामदुघः ॥ **17.19** ॥ 742

मनसिजतातपादमनसः परितुष्टिकरं
जननि समानमेव ननु साम च नाम च ते।
अतिशयमादिमादपरमेव तथाऽप्ययते
निधनमुपद्रवं च न कदाऽपि यतः सहते ॥ **17.20** ॥ 743

पापाटोपनिदाघवर्जनकृते पर्जन्यगर्जायते
व्याधिव्यालकुले पतत्पतिगरुद्वातूलनादायते।
दारिद्र्यद्विरदेन्द्रवारणविधौ सिंहाट्टहासायते
पद्मे तावकनाम संसृतिनिशि प्रत्यूषकालायते ॥ **17.21** ॥ 744

राजीवायतनेति दैत्यजिदुरोरक्षेति लक्ष्मीरिति
क्षीराब्धेर्दुहितेति कैटभरिपोर्दारा इति श्रीरिति।
श्रेयः साधनदेवतेति जगतां मातेति सीतेति च
प्रातर्मातरुपास्महे कृतशुभस्थेमानि नामानि ते ॥ **17.22** ॥ 745

अञ्चत्पञ्चषवर्णमर्णवसुते त्वन्नामकर्णामृतं
मत्पापानि महत्तराण्यपि मुहुर्मुष्णाति कृष्णाङ्गने।
अक्षीणि प्रतिरुन्धदन्धतमसं गेहेषु भूयिष्ठम -
प्यङ्गुष्ठप्रमितैव दीपकलिका हा हन्त नो हन्ति किम् ॥ **17.23** ॥ 746

अवितुमुदधिकन्यकेऽचिकित्स्यान्
मरणजरादिमयान्महामयान्माम्।
परमविषममान्तरं कषायं
पचति शुचिर्भवदीयनामवर्गः॥ **17.24** ॥ 747

कृतशुभतति धारितं कृतार्थैः
भगवति भोग्यमतीव पावनं च।
अभिदधति सुवर्णमात्मवन्तः
प्रशमितदुर्गति नाम तावकीनम्॥ **17.25** ॥ 748

हरिसखि तव धूतक्लेशभूमानि नामा -
न्यहरहरहमुद्यद्भक्तिराकर्ण्य धन्यः।
जहि दलय बधान च्छिन्धि भिन्धीति घोरं
यमभटरटितं तद्भूरि दूरीक्रियासम्॥ **17.26** ॥ 749

स्वपदन्यसनेन चारुवर्णा
सुरवागोष्ठविशुद्धिहेतुभूता।
कमले मम काङ्क्षितानि दुग्धे
स्तवनार्हा तव नामकामधेनुः॥ **17.27** ॥ 750

तव दिव्यनाम्नि मधुरे निराकृत -
व्यसने स्थितेऽपि रसनेन्द्रियं मम।
रमते रमे कथमहो रसान्तरे -
ष्वथ वा तदस्य घटते जडात्मनः॥ **17.28** ॥ 751

त्वन्नामदिव्यकुसुमानि दृढैर्गुणैस्ते
संग्रथ्य सौरभ विशेष परिष्कृतानि।
आमुञ्चतादिह मदीयसरस्वतीयं
मातर्महापुरुष मानस रञ्जनाय॥ **17.29** ॥ 752

मन्वन्तराण्यम्ब फलं तनीयः
    तन्वन्ति मन्वन्तरमात्रवर्ति।
आमुष्मिकं शाश्वतमैहिकं वा
    त्वन्नाम किं नाम फलं न दत्ते ॥ 17.30 ॥ 753

वर्णत्रयात्मा प्रणवः स्वनिष्ठां
    वर्णत्रयीमेव पुनाति नित्यम्।
एकद्विवर्णाऽपि रमे तवाख्या
    चित्रं पुनीते चतुरोऽपि वर्णान् ॥ 17.31 ॥ 754

व्याजादुपात्तमपि वारिधिराजकन्ये
    त्वन्नाम कामपि ददाति मुदां समृद्धिम्।
आपीतमुल्बणतपातप तापशान्त्यै
    दूरीकरोति दुरितान्यपि वारि गाङ्गम् ॥ 17.32 ॥ 755

यो वक्ति देवि पदमेकमपि त्वदीयं
    सर्वाणि तस्य हृदि भान्ति सदा पदानि।
नित्योन्नतो नृपतिरेव वशीकृतश्चेत्
    किङ्कुर्वते पुरजना इति कः प्रयत्नः ॥ 17.33 ॥ 756

कृपानिधे यम्यधिपाभिधेयं
    वाचो विधेयं तव नामधेयम्।
पद्मालये यस्य गुणोदधेऽयं
    पचेलिमं विन्दति भागधेयम् ॥ 17.34 ॥ 757

त्वन्नाथनाम्नः स्वयमुत्तरं सत्
    तवाभिधानं गुणमादधाति।
पद्मेक्षणप्रेयसि निर्विगानं
    प्रमाणमत्र प्रणवं फणामः ॥ 17.35 ॥ 758

पद्मे नाम्नां पामरास्तावकानां
प्रौढिं विद्युर्नैव नामान्तरेभ्यः।
चक्रीवन्तश्चारुकर्पूरचूर्णे
भस्मभ्यः किं विस्मयं प्राप्नुवन्ति ॥ **17.36** ॥ 759

जहदिह जननि त्वन्नामधेयं विधेयं
जडमतिरतिरिक्तं शर्मणे कर्म कुर्यात्।
निधिमनवधिमुच्चैर्निष्कुटस्थं विहाय
प्रतिभवनमशङ्कः पर्यटेद्भिक्षितुं कः ॥ **17.37** ॥ 760

दयोदधे यं तव नामधेया -
भिधा सुधेयं यदि तां धयेयम्।
न वाजपेयं कमले यजेयं
न वा जपेयं महतोऽपि मन्त्रान् ॥ **17.38** ॥ 761

शरण वरणमन्त्रे शार्ङ्गिणः प्राणकान्ते
परमपुरुषनाम्नः प्रागुपादीयमानम्।
विशदमहिम नाम क्षिप्रमेकाक्षरं ते
वितरति जपतामप्येकमेवाक्षरं तत् ॥ **17.39** ॥ 762

कण्ठे कुण्ठितनिस्वने कफचयैरक्षेषु विक्षेपिषु
सुप्ते चेतसि यातनाभिरसुषु क्षिप्रं प्रतिष्ठास्नुषु।
सायासाऽपि समुद्रपुत्रि समयाभिज्ञा रसज्ञा मम
त्वन्नामोपहितं हितं जपतु तद्देवस्य नाम स्वयम् ॥ **17.40** ॥ 763

अभ्यासैः पवमानमन्त्रविततेरब्लिङ्गभङ्ग्यन्तरैः
आदेशैरघमर्षणस्य यमकैरष्टाक्षरस्येन्दिरे।
गायत्र्याः पुनरुक्तिभिः परिपणैरोङ्कारपुंसूक्तयोः
शुद्धिं व्याहृतिसोदरैर्न भजते को नाम ते नामभिः ॥ **17.41** ॥ 764

प्रायश्चित्तविशुद्ध्यै
प्रायश्चित्तं समस्तपापानाम्।
गायतु तव नामैषा
कमले कलितान्यनिरसना रसना॥ 17.42 ॥ 765

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे नामवैभवस्तबकः सप्तदशः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ धामवैभवस्तबकः अष्टादशः ॥

अरविन्दवनं वन्दे तदहं यदहर्निशम्।
प्रीतिपूर्वकमध्यास्ते पीताम्बर कुटुम्बिनी ॥ **18.1** ॥ 766

सारसात्मनि तवाम्ब मन्दिरे
द्वारपालकजना इवेन्दिरे।
चारुकेसर सुवर्णयष्टिका -
धारिणः प्रतिवसन्ति षट्पदाः ॥ **18.2** ॥ 767

तावकं पदमभिख्यया रमे
वारिजं प्रणिगदन्ति सूरयः।
प्रौढशोभनखरांशु वैभव -
प्राप्तमङ्घ्रिम सदालिसेवितम् ॥ **18.3** ॥ 768

प्रबिभ्रति भवत्पदप्रणय तद्विपर्यासयोः
जना विभवदुर्गती जननि तत्र चोदाहृतिः।
सहस्रवसुरेधते सरसिजानुकूले रविः
स भिक्षुकशिरोमणिः श्रयति तत्प्रतीपः क्षयम् ॥ **18.4** ॥ 769

कपटकिटिदशायां कैटभारिः क्षमाभाक्
प्रभुरकृत यतोऽसौ पङ्कजाते निवासम्।
तदिह भजसि भर्तुर्धर्ममेवानुसर्तुं
परमपुरुषकान्ते पङ्कजातस्थितिं किम् ॥ **18.5** ॥ 770

स्थानं समस्तवसुवृद्धिपुषस्तवापि
पद्मं रमे नवसुमत्वमुपैति चित्रम्।
अप्यन्यदद्भुतममुष्य तु योऽनुकूलः
शश्वद्बिभर्ति वसुमत्त्वमसौ पतङ्गः॥ **18.6** ॥ 771

सन्मानसोल्लसनदः सदसद्विवेके
शक्तः सरोजनिलये सदनं त्वदीयम्।
शब्दैः शुभैः श्रुतिपथं सुखयन् गभीरैः
संसेवते जननि हंसगणोऽवदातः॥ **18.7** ॥ 772

कमले कमलेषु सन्निधत्से
सकलेषु स्ववशेषु विष्टपेषु।
सहजं जननीजनस्य लोके
जलजातेषु विशेषवत्सलत्वम्॥ **18.8** ॥ 773

कल्हारोत्पलकैरवादिषु तथा कल्याणि माल्यादिषु
प्रायः सत्सु सुमेषु वस्तुषु परं पद्मानि सद्मानि ते।
भाग्यं कुत्रचिदेव नृत्यतितरां भूयस्सु तुल्येष्वपि
त्वत्कान्ताय सुगन्धिवस्तुषु तुलस्यैकैव सा रोचते॥ **18.9** ॥ 774

त्वद्गेहं कमलं यतस्त्वदविनाभूतस्य विष्णोः पदं
सूर्यालोकविकासमञ्चति ततः पद्मे मधुस्वादु तत्।
अन्नादोऽहमितीव गीतिनिनदैः श्रुत्यन्तसञ्चारिभिः
कृष्णाकारजुषोऽत्र केचिदनिशं नन्दन्ति लब्ध्वा रसम्॥ **18.10** ॥ 775

सूर्यालोकदशासु हर्षमयते दोषाकरालोकने
सङ्कोचं भजति श्रितालिषु रमे दत्ते परं जीवनम्।
स्थानं पङ्कमधः करोति वहते नालीकशब्दं च ते
कां वा तावकसन्निधानमहिमा कुर्यान्न चर्यां शुभाम्॥ **18.11** ॥ 776

धत्ते सदैव शिरसा तव पादरेणून्
पद्मे बिभर्ति तव नाम च पद्ममेतत्।
वर्वर्ति धारकतया तव हस्तमेव
तद्युक्तमृच्छति तवोज्ज्वलदास्यलक्ष्मीम्॥ **18.12** ॥ 777

प्रातः कृताप्लवविधिः पयसां निधाने
ब्रध्नोऽर्चकः शुचिकरो भृततप्तचक्रः।
उद्घाटयत्युदित विष्णुपदैकसक्तिः
विश्वाम्ब पद्ममयसद्म दलाररं ते॥ **18.13** ॥ 778

ब्रह्मा यस्मादजनि वहते चारु पीतांशुकं यत्
सान्द्रामोदं सततममृतस्थानमेवाश्रितं च।
अर्हत्यब्जं तव पदमिदं श्रीनिवासाभिधानं
मातर्दोषो न भवति मधुस्निग्धता धर्मभूम्नि॥ **18.14** ॥ 779

अहो मुकुन्दसुन्दरि त्वदीयमन्दिराहितः
स्वयं क्षयं व्रजन्नयं स्वरक्षिणं क्षिणोत्यपि।
सरोरुहद्रुहः शिवः शिरोऽधिरोहदुष्कृतात्
विदिक्षु दिक्षु भिक्षुकः स्फुटं नटन्नटाट्यते॥ **18.15** ॥ 780

त्वद्धाम्नः सरसीरुहस्य च मिथस्त्वत्कान्त धामात्मनो
मार्ताण्डस्य च पुण्डरीकनिलये मैत्री निसर्गोदिता।
कल्याणीं युवयोरियं विवृणुते कैमुत्यनीत्या मिथः
प्रीतिं कामपि भूयसीमविदिताक्षेपामनौपाधिकीम्॥ **18.16** ॥ 781

कति न कुसुमंमन्यान्यन्यानि देवि वने वने
न हि समुदितेष्वप्येतेषु क्षमा कमलोपमा।
भगवति भवत्सान्निध्येन प्रभोः कमलानि यत्
करचरणदृक्कल्पानीति स्थिरं दधते यशः॥ **18.17** ॥ 782

हरेः करस्पर्शनतः प्रहृष्टा
 पयस्युदीता रुचिरालिकान्ता।
वाराशिकन्ये वसतिस्त्वदीया
 बिभर्ति युक्तं कमलाभिधानम्॥ **18.18**॥ 783

भृङ्गीसङ्गीत्युदयसुभगं मञ्जुकिञ्जल्कपुञ्ज -
 स्फारस्तम्भं किमपि विकसत्पत्रसच्चित्रभित्ति।
पर्याश्लिष्टं विमलसरसा कर्णिकास्वर्णपीठं
 पद्मं विद्मः परमनुगुणं सद्म पद्मे भवत्याः॥ **18.19**॥ 784

दुग्धाम्बुराशिदुहितुस्तव सन्निधानात्
 स्वर्णस्थितिर्भवति हन्त कुशेशयस्य।
तत्सम्भवोऽप्यभवदम्ब हिरण्यगर्भः
 धन्याः खलु त्वदनुबन्ध्यनुबन्धिनोऽपि॥ **18.20**॥ 785

नवसारसवासमाचरन्त्याः
 तव साधर्म्यमिवाम्ब लब्धुकामः।
पुरुषः परमः सदा विधत्ते
 पुरमध्यस्थितपुण्डरीकवासम्॥ **18.21**॥ 786

अस्ति ते हरिपुरन्ध्रि नीरज -
 स्थानमित्युदितमास्पदद्वयम्।
एकमाहुरिह तु त्रिपात्पदं
 देवि षड्वदपदं परं पुनः॥ **18.22**॥ 787

सुरादिजीवैरमृतैकनिष्ठैः
 चिराय यैरम्ब विभाव्यसेऽन्तः।
आलोकमग्र्यं हरिरेषु तन्वन्
 आमोदमन्यादृशमादधाति॥ **18.23**॥ 788

अदो दधानं कमलाभिधानम्
अम्भश्च तज्जं च समं तवास्ताम्।
आद्यस्य पुंसः पदमाहुराद्यं
त्वदीयवासं जननि द्वितीयम्॥ **18.24**॥ 789

क्षमास्वर्णस्फूर्तिं सततमधिगम्यापि कमले
गुणादाढ्र्याच्छन्दं कमपि भजते नालमिति यत्।
तदेवालङ्कारं नयति नलिनं स्पर्शनवशात्
तनोति ह्यौदार्यं तव जननि सान्निध्यमहिमा॥ **18.25**॥ 790

भगवति परब्रह्माद्वैत प्रसङ्गजुषस्तव
प्रथयति लसद्धर्मालीकत्वमत्र हि दर्शनम्।
त्वमुचितमधिष्ठानं नालीकमाश्रयसे ततः
तव किल सदालोकः सर्वोऽपि कल्पनगो रमे॥ **18.26**॥ 791

यत्रोत्तमस्फुरणयन्त्रितचित्तवृत्तौ
नित्योल्लसद्रजसि राजति सारसत्वम्।
स्थानं प्रधानमिदमब्धिसुते यतस्ते
स्थाने तदत्र रमते महदादितत्त्वम्॥ **18.27**॥ 792

सिंहासनस्थिति जुषस्तव वासयोग्यं
नित्यं भवेयमिति निश्चयमेत्य नूनम्।
केसर्यभूत् सरसिजं नरसिंहकान्ते
तद्द्वेषमेष तनुते तत एव पद्मे॥ **18.28**॥ 793

अब्जं विधौ द्विषति देव्यमृतैकवृत्ति
कामेन हन्त यदनीयत मार्गणत्वम्।
तस्य स्वतोऽम्बरमणिस्फुटवस्ववाप्तिः
उल्लासहेतुरभवत् तव सन्निधानात्॥ **18.29**॥ 794

उत्फुल्लवारिरुहतल्लज केलिगेहे
सर्वेश्वरस्य दयितां शयितां ननु त्वाम्।
वैतालिका इव गृहीतसुजातगीताः
प्रातः शनैर्मधुकराः प्रतिबोधयन्ति ॥ **18.30** ॥ 795

सहंसकासारबहूर्मिकोज्ज्वला
पयोजराजिः प्रतिपन्नकर्णिका।
सहस्रवस्वाप्तित एधते रमे
श्रियः श्रयन्ते ह्यखिलास्त्वदाश्रयम् ॥ **18.31** ॥ 796

स ते निवासः शयनीकृतो वा
नाथेन नित्यं नयनीकृतो वा।
फणैः सहस्रेण वृतो दलैर्वा
शेते बिले वा कमले कुशे वा ॥ **18.32** ॥ 797

श्रीसूक्तं ते जननि नलिनं स्थानमाख्याति मुख्यं
दृष्टान्तं त्वत्प्रियतमदृशोरन्तरादित्यविद्या।
जन्मस्थानं तव तनुभुवो धातुराथर्वणादिः
त्वत्सान्निध्यात् क्व च न भवति श्रीरनिम्ना महिम्नाम् ॥ **18.33** ॥ 798

शैवालकान्तरगतं तव सद्म विद्मः
सारङ्गलाञ्छितवपुर्मिलितामृतौघम्।
पूष्णा च दत्तरुचि पुंसि नपुंसके च
ख्यातस्य मातरिदमब्जपदस्य वाच्यम् ॥ **18.34** ॥ 799

कान्तः पदत्रयमितस्थलयाचकस्ते
त्वं त्वम्ब षद्वदमिते निलये निविष्टा।
स्थानान्यथापि विपुलानि समाश्रितानां
चित्रं युवां कलयतश्चिरमुच्छ्रितानि ॥ **18.35** ॥ 800

त्वत्पादपङ्कजरजः कणधन्यधन्ये -
    ष्वम्भोरुहेषु वसतामलिपोतकानाम्।
वर्गेषु हन्त जननं वलशासनाद्याः
    वाञ्छन्ति किं पुनरमी वयमब्धिकन्ये ॥ **18.36** ॥ 801

सरोगमुपसेवितेऽप्यहह पूर्णचन्द्रोदये
    ज्वरोपहतमम्बुजं तव परिग्रहादिन्दिरे।
विकासयति विज्वरं विरचयन्नसौ भास्करः
    रवेररुजमाप्नुयादिति न पूर्वभाषा मृषा ॥ **18.37** ॥ 802

कल्याणधर्मा कमलासनाया
    मूर्तिं हि यस्ते मतिमानुपास्ते।
कन्ये सुधाब्धेः कमलासनत्वं
    तस्योचितं तत्क्रतुनीतिभूम्ना ॥ **18.38** ॥ 803

विच्छिन्नमब्दशतक व्यवधानतो यत्
    सन्दर्शनं सहभुवः शशिनः कदाचित्।
तत्पद्मवासिनि तदीक्षणवर्जनाय
    तस्योदयेषु निजसद्म किमावृणोषि ॥ **18.39** ॥ 804

वारिजवनस्य भाग्यं वर्णयितुं नैव वयममी शक्ताः।
कमले तव स्थितौ यद्विकल्पितं वक्षसा समं विष्णोः ॥ **18.40** ॥ 805

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे धामवैभवस्तबकः अष्टादशः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ अभयप्रदानस्तबकः एकोनविंशः ॥

अभयं भयमित्येतदुभयं सर्वदेहिनाम्।
यत्सेवातदभावाभ्यां तामहं श्रियमाश्रये ॥ **19.1** ॥ 806

भजामि तां त्वां भवरोगभीतिं
    पयोधिकन्ये परिहर्तुकामः।
वह्नेर्भयं वायुभुवो ययैव
    न्यवारि तस्माच्च निशाचरीणाम् ॥ **19.2** ॥ 807

प्रह्लादस्य भयं विनेतुमचिरादेकस्य शोकस्पृशो
    लोकस्यैव भयङ्करं तव पतिर्जग्राह सैंहं वपुः।
त्रैलोक्याम्ब तदीयकोपदहन ज्वालास्तु वेलातिगाः
    चाटूक्तैरमृतैर्निवार्य भवती चक्रे जगन्निर्भयम् ॥ **19.3** ॥ 808

अशरण जनक्लेशालोक क्षणोपनतोद्गतेः
    स तव हृदयग्लानेर्भीतो जगत्पतिरिन्दिरे।
अहह विहिते क्षाम्यन्नागः सहस्रमजस्रम -
    प्युभयमुभयोरार्तेभ्यः नः प्रयच्छति लोकयोः ॥ **19.4** ॥ 809

मुक्तस्त्वया मुह्यति साध्वसं गतः
    सर्वाम्ब युक्तं खलु साध्वसङ्गतः।
यस्त्वामुपासीत भयातिचञ्चलां
    चित्रं स धन्यो न भयाति चञ्चलः ॥ **19.5** ॥ 810

वन्देत मन्देतरनित्यबोधा
नन्दे मुकुन्देष्टपुरन्ध्रि यस्त्वाम्।
अत्रासमत्रासनमेति सैंहं
चित्राममुत्रापि स याति ऋद्धिम्॥ 19.6॥ 811

कारागारादपि किल भृशं तापदे पापदेहे
हन्ताहन्तामतिमति विपन्मिश्रितामाश्रितानाम्।
पारावाराधिपतितनये मादृशामीदृशानां
हित्वा हि त्वा त्रिजगति गतिर्नेतरा कातराणाम्॥ 19.7॥ 812

भावी यस्मिन् भगवति भवद्दृष्टिलेशः कृतार्थे
त्रासो न्यासोपहत विपदस्तस्य न स्यात् कुतोऽपि।
अस्मिन्नर्थे जननि सुरसासिंहिकादेरभीतो
लङ्कायामप्यविहतगती रामदासः प्रमाणम्॥ 19.8॥ 813

जनिमृतिजराभीष्माद्ग्रीष्मातपोग्रतराद्भवात्
जननि न वयं वित्रस्यामस्त्वदङ्घ्रिमुपाश्रिताः।
सति बलवदालम्बे स्याद्दुर्बलोऽप्यकुतोभयः
त्रसति मृगयोः किं वा पद्मे मृगो विधुमाश्रितः॥ 19.9॥ 814

अनाघ्राताः श्रौताः स्मृतिभिरुपदिष्टाश्च कमले
समीचामाचारैरपि च विदिता धर्मनिचयाः।
कथङ्कारं घोरं निरयमतियायामिति भयं
जहामि स्मृत्वा ते जगदवनि वात्सल्यजलधेः॥ 19.10॥ 815

विवित्सामात्सर्यस्फुरण दुरहङ्कार कुहना -
पिशाचीभ्यो बिभ्यज्जगदभयदानैकनिरताम्।
नुतां भूतेशाद्यैरपगमित रक्षोगणमदां
प्रपद्ये दासस्त्वां परमपुरुषप्राणदयिते॥ 19.11॥ 816

जन्तोर्हन्त त्रिलोकीजननि तव समाराधने साधनेषु
व्यापारेष्वाभिमुख्यत्यजन भजनयोर्भीत्यभीती भवेताम्।
सुग्रीवं वालिभङ्गे तदहितदमनानुन्मुखं रामकोपात्
भीतं पश्चात्तदास्थावहनगतभयं तत्र दृष्टान्तयामः॥ **19.12** ॥ 817

रक्षःस्तोमोऽप्यखिलभयकृद् राघवप्राणकान्ते
त्रासोत्पत्त्यै न खलु भवति त्वत्पदाब्जानुकूले।
कष्टं मातस्तृणमपि भिये कल्पते त्वत्प्रतीपे
प्राच्ये साक्षी पवनतनयः पश्चिमे काक एकः॥ **19.13** ॥ 818

कान्तारे महतीव संसृतिपथे हन्त भ्रमन्तश्चिरं
विष्णोः प्रेयसि वानरा इव नरा वेलातिगग्लानयः।
सम्पातेरिव सन्मतेरथ गुरोर्बुद्ध्वा स्थितिं तावकीम्
आज्ञालङ्घन भीतिमम्ब जहति प्राज्ञा हरेः स्वामिनः॥ **19.14** ॥ 819

पादाब्जं भजनादिकर्मणि सुरैर्यस्यैव कर्मीकृतं
यो धत्तेऽर्कयमेन्द्रवह्निमरुतां भीतावपादानताम्।
तस्याप्यम्ब सकृत्कृत प्रपदनस्तेऽस्मीति याचन् जनो -
ऽप्यत्रासार्पणसंप्रदानमभवद्देवि प्रसादेन ते॥ **19.15** ॥ 820

आरोढुं किल यत्सनीडममरा बिभ्यत्यहिद्विण्मुखाः
तद् ब्रह्मापि तवाश्रयेण सुलभीकर्तुं न भीतोऽस्म्यहम्।
लेढुं दाडिमकल्परत्नखचितं राज्ञः किरीटं रमे
किं वा सर्वदुरासदस्य दयिताकेलीशुकस्त्रस्यति॥ **19.16** ॥ 821

दातव्या स्वयमेव दाशरथये देवीति यो वीतभीः
अग्रे साग्रहमग्रजस्य कथयन्नार्तो दशास्यानुजः।
तस्मै त्वद्दयितेन दत्तमभयं प्राज्यं च राज्यं रमे
यत्स्वल्पं व्यसनं भवेत्तव कृते तद्भूयसे श्रेयसे॥ **19.17** ॥ 822

तव साधु वर्ष्म नवसारसालये
भवसागरान्तरवसादमेयुषाम्।
अभयाय भात्यशुभयातुदीप्तिहृत्
प्रभया सुवर्णनिभया मनोरमम्॥ **19.18**॥ 823

प्रत्यासीदति मृत्युरन्वहमहो गत्यागतिभ्यां रवेः
पापीयानहमस्मि पापिनि जने कोपी च वैवस्वतः।
किं किं वा भवितेति वेङ्कटपतेः क्रीडासखि त्रस्यते
मह्यं गर्ह्यतमाय मातरभयं देया दयालो स्वयम्॥ **19.19**॥ 824

परब्रह्मप्राणप्रणयिनि हरब्रह्ममघवन् -
मुखानां लेखानामपि भयमभीतिश्च भवतः।
निमेषोन्मेषाभ्यां तव जननि दृष्ट्योरिति महान्
अयं घण्टाघोषः क इह विमृशेन्मानमपरम्॥ **19.20**॥ 825

घनार्तौ कार्तान्तः कदननिपुणः किङ्करगणः
भ्रमद्भिर्लोकाम्ब क्रुधमिव वमद्भिश्च नयनैः।
प्रगल्भां दुर्भीतिं प्रथयति यथा मे न बहुधा
तथा शीतापाङ्गैः प्रसभमनुगृह्णातु भवती॥ **19.21**॥ 826

तत्तत्पापव्रजफलतया दारुणैस्तन्यमाना
याम्याः श्रुत्वा मुनिवचनतो यातनाश्चेतनानाम्।
कामं भीतः कमलनिलये कम्पमानाखिलाङ्गः
विश्वस्य त्वामहमशरणो विश्वधात्रीं प्रपद्ये॥ **19.22**॥ 827

देशे काले सततविकृतेः देवि देहस्य वृत्ते
दृष्टे शौरेरघजुषि जने तीक्ष्णकोपे च चित्ते।
भीतिः प्रादुर्भवति महती शक्तिमत्या भवत्याः
कारुण्यार्द्रे मृदुनि हृदये चिन्तिते हन्त धैर्यम्॥ **19.23**॥ 828

बाधन्ते विषया बहिः सततमप्यन्तस्तु कामादयः
त्रातुं हन्त विपन्नमर्णवसुते धात्रादयोऽप्यक्षमाः।
शक्तो यद्यपि केशवः स तु दुराराध्यः स्वयं मद्विधैः
इत्युद्वेगवतो मम क्लमहरालोका त्वमेका गतिः॥ **19.24**॥ 829

वाल्मीकौ तमसान्वयो बलरिपौ भूयस्तरा मन्यवः
योगस्थे यमसङ्गतिर्दृढगदावाप्तिस्तु नारायणे।
रुद्रे क्षुद्रहितक्रमो भवकृतं दुःखं रतिप्रेयसि
त्रासः कुत्सितमौक्तिकेषु न पुनस्त्वत्संश्रितेष्विन्दिरे॥ **19.25**॥ 830

हन्त प्राकृतचक्षुराद्यविषये व्यापिन्यनिर्वाच्यतां
प्राप्ते विश्वजनिस्थितिक्षयपुषि ब्रह्मण्यनन्याश्रये।
मातस्त्वामभयं विधातुमुषितां मन्ये प्रतिष्ठामहं
तस्मिंस्ते दरमन्तरं भवति चेत्कस्यात्र न स्याद्भयम्॥ **19.26**॥ 831

दशमुखसहजं तं देवि नाम्नाऽर्थतो वा -
प्युदितमुखविकारं भीतमप्यूष्मणाप्तम्।
अकुरुत रघुवीरस्त्वत्प्रसादप्रभावात्
अभयवितरणेन क्षिप्रमानन्दसान्द्रम्॥ **19.27**॥ 832

अल्पश्रुतेभ्य इव राशिमनादिवाचाम्
अंहस्ततिभ्य इव बिभ्यतमर्भकं ते।
पुण्यैः पुराणवचनैरिव वीक्षणैस्त्वम्
उच्चैर्नृसिंहसखि मामुपबृंहयेथाः॥ **19.28**॥ 833

दुष्कालानुगुणक्रमैः श्रुतिपथाविष्कारनिष्कासकैः
निष्कारुण्यतमैस्तुरुष्कयवनैर्निष्कारणद्वेषिभिः।
कञ्जावासिनि तत्समैरपि जनैः सञ्जायमानं भयं
त्वं जालेन दृशां हि तारयसि नः खञ्जानिवाम्भोनिधिम्॥ **19.29**॥ 834

का काभयप्रदेति
　　प्रश्नो यद्वाचकः समस्तपदः।
स्वयमुत्तरतां धत्ते
　　रमा समस्तोत्तरा विराजति सा॥ **19.30**॥ 835

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे अभयप्रदानस्तबकः एकोनविंशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ देवतान्तरपरिसङ्ख्यास्तबकः विंशः ॥

वन्दारुरक्षणे दक्षां वन्दे गोविन्दसुन्दरीम्।
यत्प्रसादादृते देवाः सर्वे रक्षितुमक्षमाः ॥ **20.1** ॥ 836

अम्ब त्वया हन्त शरीरभाजाम्
अरक्षितानामपि रक्षितानाम्।
देवा मुदे वा पुनरापदे वा
भवन्ति किं ते बकवैरिकान्ते ॥ **20.2** ॥ 837

शीतस्वभावां भवतीं श्रितेभ्यो
दिव्यां समृद्धिं ददतीमतीत्य।
उपाश्रितध्वंसकमुष्णमग्निम्
उपासते के जगदम्ब लोके ॥ **20.3** ॥ 838

अज्ञातदृप्तिममिते विभवेऽपि दीन -
बन्धुं विहाय भवतीं भवतोऽप्यवन्तीम्।
सख्युः शुचेरपि समाप्तिदमम्ब काश्र्ये
कस्तं प्रभञ्जनमिहार्चतु गन्धवाहम् ॥ **20.4** ॥ 839

यमविषयगतिः स्याद्यद्गृहीतस्य जन्तोः
अमतिरमुमुपास्तामप्रभुं पाशहस्तम्।
जननि परिगृहीतत्राणजातादरां त्वाम्
अहमखिलनियन्त्रीमब्जहस्ताम् प्रपद्ये ॥ **20.5** ॥ 840

कुर्वाणं परुषैः करैः कुवलयक्लेशं भृशं सद्गुण -
श्रीहार्यभ्युदयं तमम्ब तपनं केचिन्नमस्कुर्वताम्।
विश्वानन्दकरीं वयं तु विदुषां विश्वाधिकां संपदं
तन्वानां प्रणमेम तत्रभवतीं तापत्रयध्वंसिनीम्॥ **20.6** ॥ 841

हरिसखि शतमन्युं वायसस्य स्वसूनोः
अपि विपदपनीतावक्षमं नो यजेयम्।
अहमविदितमन्युं हन्त तस्य स्वशत्रोः
अपि परिहृतभीतिं त्वां शुभामाश्रयेयम्॥ **20.7** ॥ 842

प्रौढैश्वर्यजुषोऽपि यस्य सुहृदा भिक्षाकता नोज्झिता
यत्र श्रीदपदं वदन्ति विबुधा रूढ्याऽश्वकर्णादिवत्।
यक्षं तं यजतामधीर्वयममी त्वामिष्टदात्रीं स्तुमो
मातर्लक्ष्मि महाविभूतिकमठो यस्याः सखा ते हरिः॥ **20.8** ॥ 843

प्रौढिर्यस्य हि पूर्वपक्षविदिता यो लुब्धचूडामणिः
यश्चाहीनमुखेन दूषितकलस्तं कः कलङ्काश्रयम्।
अर्चेत्सोममपामरः श्रुतिशिरः सिद्धान्तसिद्धोन्नतिं
पद्मे काङ्क्षितदां बुधस्तुतकलां त्वां निष्कलङ्कां विना॥ **20.9** ॥ 844

पद्मे येषामुच्चभावो न नित्यो
ये सर्वेऽपि स्थानभेदेन तीक्ष्णाः।
यष्टुस्तुष्टिर्न ग्रहांस्तानतस्त्वां
नित्यौन्नत्यां नौमि सर्वत्र मृद्वीम्॥ **20.10** ॥ 845

शाखावृन्दप्रथितविभवां सत्सुपर्णाधिरोहां
त्वामस्तुत्वा जलनिधिभुवं कल्पवल्लीमतल्लीम्।
आकाङ्क्षन्तः फलमविकलं देव्यपर्णोद्भवं के
संसेवेरन् शरवणभवं स्थाणुजातं विशाखम्॥ **20.11** ॥ 846

त्वां कृतश्रुतिपथप्रवर्तनां
सज्जनादरकृताननां विना।
निर्मितश्रुतिविकम्पनं रमे
साधुवारणमुखं श्रयेत कः॥ **20.12** ॥ 847

दुर्गां परे गाढभवानुषङ्गां
शिलोच्चयादभ्युदितां श्रयन्ताम्।
भक्त्यैकलभ्यां भवसिन्धुनावं
सुधाब्धिजे त्वां तु वयं श्रयामः॥ **20.13** ॥ 848

स्थानं यस्य श्मशानं सततमनुचरो भूतवेतालवर्गः
चेलं चर्म स्रगस्थ्नां ततिरहह तमप्युग्रमेके भजन्ताम्।
पद्मे पद्मे स्थितां त्वामसकृदनुसृतां देवतायौवतेन
ध्यायेम क्षौमभाजं वयमनुदिनमामुक्त मुक्ताकलापाम्॥ **20.14** ॥ 849

नाभिजातमधरीकृतहंसं
जन्तवः कतिपये कलयन्ताम्।
सेवते जगति हंसगतिं त्वां
सिन्धुनन्दिनि सुधीरभिजाताम्॥ **20.15** ॥ 850

चित्तवृत्तिरिह कञ्जमन्दिरे
धुन्वतीं दुरितपुञ्जमिन्दिरे।
सिद्धये जननि सेवतान्तरां
त्वामनाकलित देवतान्तराम्॥ **20.16** ॥ 851

यद्यादधासि करुणां यदि वा न पद्मे
किं दैवतैस्त्वदितरैरपवर्गलिप्सोः।
तुष्टो यदि क्षितिपतिर्यदि वा न तुष्टः
किं नाम शौरिसखि पारिषदैर्विवित्सोः॥ **20.17** ॥ 852

दृष्टादृष्टेप्सितपुषि भवत्पादपद्मावलम्बे
दिष्ट्या लब्धे क इह भजतां देवतां भूष्णुरन्याम्।
दृष्टे स्पष्टं ननु दिनकरे दृश्यसन्दर्शनार्थं
दीपारोपव्यसनमजडो देवि कः स्वीकरोति॥ **20.18**॥ 853

तव जननि जयन्त्याः शाश्वतैश्वर्यदात्र्याः
परिमितफलदात्रीर्देवताः सेवते कः।
फलभरनतसस्यां प्राप्य चोलक्षितिं किं
प्रकटमटति विन्ध्यप्रान्तभूमीरमूढः॥ **20.19**॥ 854

तव जलनिधिकन्ये दैवतैः पामरोऽन्यैः
कलयतु समतामप्यन्ततः किं ततस्ते।
दरमपि गरिमाणं दर्दुरोऽकर्दमाया
विबुधपुरतटिन्या वेत्ति किं पल्वलेभ्यः॥ **20.20**॥ 855

विष्णोः पत्नि भवत्प्रसादविरह व्यावर्तमानश्रियां
संपत्तिष्ठति सा न दीर्घमुदिता या क्षुद्रदेवार्चनैः।
अन्नालाभत एव शुष्कवपुषां कुक्षौ पुनः पीनता
कष्टं श्वासनिरोधनैरुपनता कालं कियन्तं क्षिपेत्॥ **20.21**॥ 856

कल्याणं भवती करोति भजतामेकापि लोकाम्ब यत्
संभूयापि च देवतान्तरशतं नैतद्विधातुं क्षमम्।
राकाचन्द्रिकयैकयाऽपि सुकरं विश्वप्रजाह्लादनं
नैकाभिर्ननु तारकाभिरपि वा नो शक्यनिष्पादनम्॥ **20.22**॥ 857

ननु तव पदाम्भोजद्वन्द्वे निविष्टमना मनाक्
अपि न तनुते देवेष्वन्येष्वमेदुरमादरम्।
ललितमृदुले लब्धाश्वासो रसालकपल्लवे
कलयति पिकः कञ्जावासे करीरदलानि किम्॥ **20.23**॥ 858

मातः पद्मे मृत्युमत्येतुकामो
मुक्त्वा कस्त्वां मानयेत् क्षुद्रदेवान्।
प्रौढां नावं प्राप्य सिन्धुं तरिष्यन्
काशस्तम्बालम्बनं कश्चिकीर्षेत्॥ **20.24** ॥ 859

संदत्ते सकृदर्चितापि भवती साम्राज्यमत्यूर्जितं
त्वद्भिन्नैस्तु किमस्ति देवि बहुधाऽप्यासेवितैर्दैवतैः।
संशुद्धिं सकृदीक्षितोऽपि दिशति श्रीरामसेतुर्नृणाम्
अर्थः कोऽस्ति तटाकसेतुशतकैरश्रान्तदृष्टैरपि॥ **20.25** ॥ 860

देवि त्वत्पदपद्मवन्दनधना दुर्देवतोपासना -
लब्धं मुग्धवधूकटाक्षतरलं नैवाद्रियन्ते धनम्।
वेधा विष्टपचित्रसृष्टिपटुधीरर्थक्रियादूरगं
व्यामोहावहमैन्द्रजालिकजगत्सृष्टिं किमु श्लाघते॥ **20.26** ॥ 861

सत्यप्यागसि संश्रितान् करुणया संरक्षसि त्वं रमे
क्षोदिष्ठादपराधतोऽपि भजके कुप्यन्ति देवाः परे।
छेत्तॄणामपि तापमम्ब हरते शाखी निजच्छायया
गाढस्पर्शत एव पोषकमपि घ्नन्ति क्रुधा पन्नगाः॥ **20.27** ॥ 862

सुभूयानायासः फलमगुरु दुर्दैवतजुषां
प्रयासः क्षोदीयान् फलमतिमहत् त्वां तु भजताम्।
लघिष्ठो लाभः स्याल्लवणवणिजां श्रान्तिरधिका
भवत्यल्पो यत्नः फलमलघु कर्पूरवणिजाम्॥ **20.28** ॥ 863

स्थास्नुः श्रेयः स भजति रमे यत्पदं त्वत्कृपायाः
बाधोदर्कं विभवमुपयात्यन्यदेवोपसेवी।
दृष्टान्तोऽन्त्ये गिरिशभजनप्राप्त भूतिर्दशास्यः
तद्भ्राताऽऽद्ये तव करुणया लब्धनिष्कम्पसम्पत्॥ **20.29** ॥ 864

त्वां मातरुपासीना
    न देवतान्तरमुपासते सन्तः।
लब्धे निधौ निरवधौ
    कदर्यजनसेवनं सहन्ते के॥ **20.30**॥ 865

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे देवतान्तरपरिसङ्ख्यास्तबकः विंशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ दशावतारस्तबकः एकविंशः ॥

दशस्वप्यवतारेषु देवो यद्रूप संप्लवात्।
साधयामास कार्याणि सतां तस्यै श्रियै नमः॥ **21.1** ॥ 866

देवि त्वदालब्धदयारसेन
देवेन मात्स्यं वपुराश्रितेन।
आश्चर्यमष्टश्रुतिरप्यनष्ट -
श्रुतित्वमापद्यत पद्मजन्मा॥ **21.2** ॥ 867

भूयिष्ठां तव दृष्टिरेव कमले भूतिं चिरात् प्रोषितां
भूयोऽप्यानयति क्षणादिति नृणां व्यक्तं घृणावारिधिः।
देवस्तावकदृष्टिरूपमनघं मीनावतारे वहन्
धात्रेऽदत्त सतां श्रियं श्रुतिमयीं दैत्यापनीतां पुनः॥ **21.3** ॥ 868

सा हि श्रीरमृता सतामिति ननु त्वन्नामधेयाश्रयात्
त्वद्दास्यं भजति श्रुतिः स्वयमिति प्राप्तादरः श्रीधरः।
तां मग्नां पुनरुद्धरन् जलनिधौ तापार्णवादुद्धरेत्
त्वद्दास्यैकधनान् जनानिति रमे धैर्यं चरीकर्ति नः॥ **21.4** ॥ 869

देवो देवि त्वय्यसौ दानवानां
हन्ता हन्तामन्दरागं दधौ यः।
धर्मं कौर्मं धारयंस्त्वत्सहायो
मातः सोऽयं मन्दरागं दधाति॥ **21.5** ॥ 870

उरसि सरसिजालये वहंस्त्वां
शिरसि दिधीर्षुरिलां त्वदंशभूताम्।
स्वयमयमचिरात् पराहतारिः
स हरिरुवाह वराहदिव्यदेहम्॥ **21.6** ॥ 871

दैतेयेन बलात् पयोधिजठरं देवी मही प्रापिता
मातस्ते स्वसृभावमेव यदगादेकोदरस्थानतः।
तस्मादेव कृतादरेण तरसा दामोदरेण स्वयं
दध्रेऽसौ कुहनावराहवपुषा देवेन दंष्ट्राञ्चले॥ **21.7** ॥ 872

पद्मे चक्रभृतो नृसिंहवपुषः प्रह्लादसंक्लेशन -
क्रूरापुण्य हिरण्यदेहदलना वेलातिवेलोदयः।
रोषाग्निः शमितस्त्वया बत पयोराश्येकशोष्योऽपि तत्
पुत्र्या शक्तिरुदेति कारणगता प्रायेण कार्येष्वपि॥ **21.8** ॥ 873

शरण्यभूतां श्रुतिरिन्दिरे यां
हिरण्यवर्णां हरिणीमभाणीत्।
सा दिव्यसिंहस्य हिरण्यभेत्तुः
निःशङ्कमङ्के रमसे कथं त्वम्॥ **21.9** ॥ 874

अवनमेव सदा कलयन् गज -
व्यसन भङ्गकृदद्भुतकेसरी।
हरिणलक्षणदृष्टिरयं त्वया -
ऽप्यबलयाम्ब गुणेन वशीकृतः॥ **21.10** ॥ 875

हर्यक्षोऽयं हरिरिति वचस्त्वय्य नाभूतपूर्वं
न प्रह्लादोपचयकरता नो हिरण्याङ्गदत्वम्।
तस्मादस्मज्जननि परमं विस्मयं ते विधातुं
नाथोऽपूर्वं किमिह जगृहे नारसिंहं शरीरम्॥ **21.11** ॥ 876

तत्तादृक्षहिरण्यदाननिरतौ भक्ताभिरक्षाकृते
सत्कीर्तिं हरितां मुखे खलजनत्रासावहामाश्रितौ।
किञ्चोदञ्चदनेकपापहरण क्रीडोचितालोकनौ
देवि स्तौमि मिथः समानचरितौ दिव्यौ युवां दम्पती ॥ **21.12** ॥ 877

वक्षःस्थामपि वर्णितानुसृतये कृष्णाजिनेनावृणोत्
देवस्त्वामिति वर्णयन्ति कतिचिद् ब्रूमो वयं त्विन्दिरे।
भव्यं वामनरूपमेत्य भगवान् भाग्यं हरिष्यन् बलेः
एनं कर्तुमगोचरं शुभपुषां त्वद्वीक्षितानामिति ॥ **21.13** ॥ 878

वर्णित्वमर्णवसुते वहतापि गूढं
वक्षःस्तटे हि न धृता वनमालिना चेत्।
कस्त्रीणि दास्यति पदान्यपि याचतेऽस्मै
कस्माज्जगत्त्रयतया च विवृद्धिरेषाम् ॥ **21.14** ॥ 879

दैत्यादेत्य हि कुप्रतिग्रहमहो वृद्ध्या च पुष्णंस्तनुं
गोत्रघ्नावरजो मृषावटुरधः पातं च दातुर्दिशन्।
पात्राकारमगादघावलिहतो ह्यम्ब ते धारणात्
धात्रा सञ्जगृहे तदस्य शिवता सम्पादकं पादकम् ॥ **21.15** ॥ 880

वासस्ते क्व वटो गुहास्वशनमप्याकाङ्क्षितं ते घनं
मां जानीह्यघनाशनादरमये किं ते विवाहे स्पृहा।
मा स्त्री मे दिश गां पदत्रयमितां लोकत्रयी सा ममे -
त्युक्तिर्दिव्यवटोर्निशम्य तदुरस्यम्ब त्वया सिष्मिये ॥ **21.16** ॥ 881

श्रीमान्निःस्व इवैष वामनतनुः प्रत्यग्रहीद्गां क्रतौ
इत्थं दुग्धपयोधिजे तव परीहासोक्तिभिर्व्रीलितः।
अंशेनार्पितसन्निधिर्भृगुपतौ पूर्वावतारार्जितां
तामेनां पुनरध्वरे स भगवान्नूनं ददावृत्विजे ॥ **21.17** ॥ 882

बाहाकल्पे भृगुकुलपतेर्वज्रकल्पे कुठारे
सङ्ग्रामेषु त्रियुगसखि ते सन्निधानं भजन्त्याः।
क्रोधोन्मेष क्षपितविमत क्षोणिपश्रेणिलक्षं
ग्रीवोत्थासृग्घुसृणमसृणं गात्रमत्यर्थशोणम्॥ **21.18**॥ 883

बिभ्राणे स्वधितिं समिद्धरणतो मन्युप्रपोषक्षमं
लोकेशास्त्रविचक्षणे नृपकुले ज्याकर्मसंस्थाकरे।
भेजाते ननु दुर्घटार्थघटिनि त्वद्वीक्षणाद्भार्गवे
सामानाधिकरण्यमर्णवसुते ब्राह्मण्यराजन्यते॥ **21.19**॥ 884

पञ्चास्यत्वजुषा पुरा भगवता योऽसौ हिरण्यासुरः
पञ्चत्वं गमितः स एव जननि स्पर्धाभिवृद्धाग्रहः।
भूत्वा तद्द्विगुणाननो जितजगद्भूयस्त्वदागोऽग्निना
दग्धो हन्त चतुर्मुखास्त्रनिहतोऽप्येकाननस्य प्रभोः॥ **21.20**॥ 885

सप्ताश्वान्वयशालिना दशरथप्राप्तोदयेनापि ते
नेत्रापत्तिविवर्जितेन कमले मुक्तद्विपेन्द्रेण च।
निस्सङ्ख्याश्वकुलो रथायुतयुतो निःसीमपत्तिच्छटः
त्वद्द्रोहादगणेय कुञ्जरगणोऽप्यस्तो रणे रावणः॥ **21.21**॥ 886

रघुवरकृतशङ्काभङ्गदम्भेन लङ्का -
ऽऽमिषभुगशुचिसद्मास्वादनैः कृष्णवर्मा।
अशुचिरिह भवत्या पावितो देवि सत्या
स वहति शुचिसंज्ञां तद्वदन्त्यन्यथाऽज्ञाः॥ **21.22**॥ 887

अखण्डं कोदण्डं प्रभुरदलयत् खण्डपरशोः
अगृह्णाद्रामस्य प्रसभमपि चाखण्डपरशोः।
अबध्नादप्यम्भो निधिमथ दशग्रीवमवधीत्
महाश्चर्याश्चर्यास्त्वयि कृतधियोऽस्याम्ब सुकराः॥ **21.23**॥ 888

सङ्कल्पतस्तव समीरसुते हि सीते
    शीतो बभूव दहनश्चिरमेधमानः।
मातर्जगद् भ्रमनिवृत्तिकृते विशन्त्यां
    शीतः कुतः स न भवेत्त्वयि देवि साक्षात्॥ **21.24** ॥ 889

नीलाम्बरो हलधरो ननुहन्त भास्वत् -
    भूभेदनैकरसिकः शुभशालिवृत्तिः।
श्यामाकलाभरत एष विवृद्धमोहो
    भोगी बभूव भुवनाम्ब तव प्रसादात्॥ **21.25** ॥ 890

श्यामा त्वमम्ब दयितश्च तवैव कृष्णः
    गाङ्गेययोगमुदितः स च रुक्मिणी त्वम्।
त्वं स्वादुवाक् स च युवा मधुरोदितश्रीः
    दाम्पत्यमेतदनुरूपमतो मिथो वाम्॥ **21.26** ॥ 891

रामानुषङ्गविहृतौ रचिताभिलाषं
    मातस्त्रिलोचनजितं भवती मनोज्ञम्।
पित्रा समानगुणमात्मभुवं प्रसूय
    पुष्पायुधं कमपि रुक्मिणि लब्धहर्षा॥ **21.27** ॥ 892

गम्भीर भावाहिकृतार्थक्लृप्त -
    सम्पन्नटीका श्रुतिमञ्जुसूक्तिः।
गीतेव कृष्णाननसौरभज्ञा
    ध्येयाऽसि मातः शुभयोगभाजाम्॥ **21.28** ॥ 893

घनमहा नवनीतहृदाश्रित -
    व्रजविपत्तिहरा हरिवल्लभे।
प्रबलभद्रविकास विधायिनी
    त्वमयसे निजवल्लभतुल्यताम्॥ **21.29** ॥ 894

प्रायोध्यानगरीयसां सुमनसां मायातमश्छेदिनी
त्वं काञ्चीमधुरावलग्नसरणिः क्षोभादवन्ती जगत्।
सम्भोगैः स्वदसे स्म देवि जलधेरुद्वीचिकाशीकरे
स्वैरं द्वारवतीपुरे विहरते कृष्णाय तृष्णायतैः॥ **21.30** ॥ 895

म्लेच्छान् भयानकरवानपि मूर्च्छयित्वा
निर्वापयिष्यति कलिं हरिरध्वरं च।
कल्की तमांसि परिपास्यति भूसुरांश्च
पद्मे भवद्वचनपल्लवितानुकम्पः॥ **21.31** ॥ 896

मलिनकलिकालेशैः शाखापरिक्षयदूषितैः
अपगतसदामोदैरत्रासुहृद्यवनैर्वृते।
शमयितुमनाः शाखिग्लानिं भविष्यति माधवः
जलनिधिभुवा वृद्धिं लब्ध्वा त्वया च महावनी॥ **21.32** ॥ 897

वातव्रात इवावधूतकलिको मातर्महारण्यवत्
खड्गी तापसवत्कृतार्थ जननः कल्की मुधे देवि ते।
अम्लेच्छां स्वयमाचरिष्यति महीमान्ध्रीयजिह्वामिव
स्वामी स श्रुतिमार्गगानिह जनान् कर्ताथ शब्दानिव॥ **21.33** ॥ 898

मात्स्यज्योतिषि मन्दरक्षणपरेऽनन्तोच्चहर्षावहे
हर्यास्यस्पृशि चारुवर्णिनि कृताशेषाधिकोपक्रिये।
एणश्रीमुषि कामपालविभवे कृष्णे कलिध्वंसने
देवि त्वद्दयितावतारदशकं ध्यायाम्यपाङ्गे तव॥ **21.34** ॥ 899

कृष्णः केशो दृगेषा झषतनुरधरो मन्दरागं हि धत्ते
सौकर्यं दोष्ण्युरेजे किल मुखहरिता मध्यमात्ता वलिश्रीः।
रामाग्र्यत्वं नितम्बः प्रथयति यमुनादर्पहृद्रोमवल्ली
धत्ते जङ्घाभिरामश्रियमिह कलिहृत्पादपद्मं तव श्रीः॥ **21.35** ॥ 900

विदितगुणालङ्करणं
    विचित्र रचना विचक्षण प्रेक्षम्।
कविमिव कृतदशरूपकम्
    अरविन्दगृहेऽभिनन्दसि मुकुन्दम्॥ **21.36**॥ 901

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे दशावतारस्तबकः एकविंशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ चित्रस्तबकः द्वाविंशः ॥

कमलायतनां चित्ते कलये यत्पदाम्बुजम्।
चिरं विबुधसन्मौळि चित्रस्तबक भूषितम्॥ **22.1** ॥ 902

वेदानि सर्वशास्त्राणि विभाव्य भवतीं रमे।
दास्यं यस्यास्तवोपैति देवि साऽपि सरस्वती॥ **22.2** ॥ 903

कमले देवदेवस्य महिषि त्वं स्तुतक्रमे।
विमले देवि देह्यस्य महितत्वं नतस्य मे॥ **22.3** ॥ 904

पाहि देवि कलशोदधेस्सुते
    देहि पापविलयं दयानिधे।
शेषशायिदयिते तमोमुषं
    शेमुषीं कलय नः सुशोभनाम्॥ **22.4** ॥ 905

संश्रितानवितुमास्थया दया
    सारिणीह दिगधीशसेविता।
स्वप्रियस्य कलयन्त्युरः पदं
    सम्पदं दिशतु सा हरिप्रिया॥ **22.5** ॥ 906

श्रीरशेषजगदार्तिहारिणी
    शेषशैलतटशेखरायिता।
राजसे जननि रक्षणाय नः
    सागरेन्द्रतनये सदातनी॥ **22.6** ॥ 907

हरेः प्रिये भगवती हृतसंश्रितसाध्वसा।
अन्वहं क्रियमाणानामंहसां संहतीरयात्॥ **22.7** ॥ 908

पायान्मामुरसावितश्रियमुमाराध्यां प्रपद्येतमां
    का वा न स्थिरमश्नुते शमधनोऽप्यालोकितो जातुचित्।
वेदान्तैर्विनुताङ्घ्रये न किमुत श्रेयोनतिं तन्वतां
    सेवामो रचयामि मानस सदा भक्त्यावहावादरम्॥ **22.8** ॥ 909

कालीनानन नालीका राधिता हि हिताधिरा।
मायासाममसायामा कापि दीप्रप्रदीपिका॥ **22.9** ॥ 910

सा रयादरिहाख्याऽसौ सौख्याहारि दयारसा।
मेय काय धरा माता तामाराधय काय मे॥ **22.10** ॥ 911

कारिताभिमता चित्ता वासे हारितमा रमा।
मारमातरिहासेवात्ता चित्तामभितारिका॥ **22.11** ॥ 912

कापिमा सरसा सा त्राभिलापाकरनामका।
कायिनारिहरासेव्याग्र्य नावास्तुतिवाचया॥ **22.12** ॥ 913

याच वाति स्तुवानाग्र्य व्यासेराहरिनायिका।
कामनारकपालाभि त्रासासार समापिका॥ **22.13** ॥ 914

अच्छभावा फणिशये जगन्नाथे झषाङ्कदा।
आरूढाघखलापीडो च्चाटऋद्धिं हि सौति सा॥ **22.14** ॥ 915

दार्ढ्यदा मम हेदेहे सात्रासाललमेऽन्ति मे।
खेदिखेऽहहयानेया तार्क्ष्येताद्यद्यतामिता॥ **22.15** ॥ 916

मयि ते पदभक्तेऽस्मिन् प्रसीद कमले हिते।
तेजसा दह शक्तेऽद्य क्षिप्रमुद्यदघं मम॥ **22.16** ॥ 917

भजेमहि हरेः कान्तां कारुण्यरसपूरिताम्।
भवामयहरां कामं कार्पण्य त्रासहारिणीम्॥ 22.17 ॥ 918

मावतादत्र परमा मारपस्वाक्षिकालिमा।
मालिकाभिस्समेतामा माता मे विधुतावमा॥ 22.18 ॥ 919

क्षमासमागमाऽभीमा रामाणामादिमाऽसमा।
क्षमा क्षेमा रमारामा प्रमासीमासुमातिमा॥ 22.19 ॥ 920

दयासारासाहितासा याशु भामतिपालिता।
साभाकारा भाव पाहि रामरामा विभाति सा॥ 22.20 ॥ 921

समुद्रजोन्नतान् कुर्यात् सा नः संसारतारिका।
समुद्रजोन्वितान् क्रौर्यात् पुनस्त्रासान्वितारिका॥ 22.21 ॥ 922

इन्दिरा भासुरा पद्म मन्दिराप धरापहा।
हापराधहरा दृष्ट्या सापराभासुरादृता॥ 22.22 ॥ 923

काकाननदे देवि विपापाहह भूभू -
रारादद्दरारा ममनानाममहेहे।
यायाममखेखेदद नानाघघनाना
त्वं त्वं गगदादाववनीनीततमामा॥ 22.23 ॥ 924

मारमाता हि भात्युग्र रविमाहित भाग्रमा।
मानिता विधिभीतानां हृतदुर्गत्युरुश्रमा॥ 22.24 ॥ 925

पामराज्ञानतरिका च्छायायासंमतातुला।
तापनोदनहासैका रमानतसुराऽवतात्॥ 22.25 ॥ 926

पापसंहारिका रातु मनोज्ञाननसंमता।
ज्ञानपामादयाज्ञाता च्छामायापापरादरा॥ 22.26 ॥ 927

रमासदादासमार मानदाननदानमा।
सदाशयायाशदास दानयागगयानदा ॥ 22.27 ॥ 928

समर्थयस्व सकल क्षितिस्थितिविनिर्मितिम्।
मुमुक्षुद्युद्रुरुरुमुत्समुद्रदुहितः स्वयम् ॥ 22.28 ॥ 929

पारावाराज्जाता माता
पायात्पायात्त्रासाद्दासान्।
साराकाराजास्याख्याता
साराकारा नागाद्व्याप्ता ॥ 22.29 ॥ 930

रमे रामे मुरारातेः मारमातरतीतरे।
ततं तिमिरमेतत्तु मतितोऽतितरामि ते ॥ 22.30 ॥ 931

काले किलालौकिकैक कोलकालालके लल।
कलिका काल कल्लोला कुललोकालिलालिका ॥ 22.31 ॥ 932

ररोररेररुरो रुरूरुरुरुरोररे।
रेरेरारेरारररे ररेरारिरिरारिरा ॥ 22.32 ॥ 933

मामा ममा ममे मामा मामू मामे ममा ममे।
मामा मेमि मिमे माम ममो मामा ममा मिमाम् ॥ 22.33 ॥ 934

मामान मामान मामा मान मान नमा नमा।
नमा नमा मान मान मान मान नमा नमा ॥ 22.34 ॥ 935

माया माया माया माया माया माया माया माया।
माया माया माया माया माया माया माया माया ॥ 22.35 ॥ 936

मासारक्षापरस्या वनगगगनवत्याघुणस्वाशहेमा
माहेशस्वास्थ्य नाकादि पदददपदित्ये धयन्तीहतामा।

माताहन्तीति सूतेरचित ततचिरस्थानुकूल्यावनामा
मानावल्या प्रकृष्टं परमममरपप्रीतिरक्षारसा मा ॥ **22.36** ॥ 937

वक्त्रावेक्षित कर्मकुक्षितिभुजां नोसर्वदायद्दृशां
पत्यङ्कस्थितिमत्र विन्दति भयं साहर्तुमृज्वर्थिनाम्।
भिक्षाटस्वमलात्मदुर्गतिहराजस्रं मता नः परा
राजीवावसथा पराधिभिदुरा शान्तात्मनां भासुरा ॥ **22.37** ॥ 938

आर्तं वेदयमीड्यसारमहिम श्रीवत्सगौकः स्पृश
त्रेताङ्कस्थिरमान्तनु त्वममलाप्तातङ्गिरिं वीन्द्रपा।
यत्राटानलसप्रताप मचलद्भासे हरीन्दुस्स्थले
वन्द्यार्यव्रजकल्पक क्रमतया ज्ञानप्रदानाऽसि नः ॥ **22.38** ॥ 939

वेषङ्कलिविकटाशुभहरमार्यत्राणदं वृषाद्रौ त्वम्।
श्रीरयसे करुणारस पालितलोका हरस्यजस्रमकम् ॥ **22.39** ॥ 940

जयति सा जलधीश्वरकन्यका
भवभयातुरमादृशपालिनी।
विकसिता रमणस्य कृपावतो
मनसि पालयतो व्यसनान्नतम् ॥ **22.40** ॥ 941

कायभासा चलद्विश्वमुत्कल्पिका
देवता या स्फुरत्यादृता पावनी।
लोकमाता मम त्रस्यतः पापतो
ज्ञानमापादयत्वव्यया नाथितम् ॥ **22.41** ॥ 942

विदिता निगमे विषमेषुतनौ
रसिके निरता वृषभाद्रिविभौ।
मम दास्यवतो विमलाऽवसथे
कृपया दुरितं सहसे कमले ॥ **22.42** ॥ 943

समस्तसेव्या सदरिक्षयादिकृत्
　　लसद्विलासा विभवप्रदा मम।
रविप्रभा त्वं वृषरक्षिके स्फुर -
　　स्तुतक्रमे देवि जगद्धिता भुवि॥ **22.43** ॥ 944

नाशिता पत्तिना नाकसद्मादिना
　　नादिनेत्राऽधुना नाधिनीं विष्णुना।
नापचारादिना नामयात् सज्जनान्
　　आवितुं मां विना नाश्रयान्याघना॥ **22.44** ॥ 945

भक्तजिह्वासुधा नित्यमिष्टक्रिया
　　कारिका कारिका कारिका कारिका।
साशुभा यासि मे त्वं समृद्धिं रमे
　　नामया नामया नामया नामया॥ **22.45** ॥ 946

गृहाणि नस्त्वं परमे रमे रमे
　　ह्यपाकृतापावधिकाधिकाधिका।
जडा अपि त्वन्नयनायनायनात्
　　अहो नृकर्णोत्सवदावदावदाः॥ **22.46** ॥ 947

सा मा मा पातु दयया शयदा भास्वरालका।
दासावनी वरमहा भाविता नारदादिना॥ **22.47** ॥ 948

क्षेमातापाप्तिदहा या कमला भासुरालोका।
सासावानीतरसा हा भुवि लूनापदाताना॥ **22.48** ॥ 949

आदित्यैरर्च्येताग्र्याभा धीमज्जीवस्तावह्लादा।
सा लक्ष्मीः स्वश्रीदा क्लेशग्लायद्यातुस्तोमावासा॥ **22.49** ॥ 950

मास वासरसारावविरा सारसवासमा।
मासवासरसाराव वरासारस वाऽसमा ॥ **22.50** ॥ 951

पद्मे वासोऽप्यहह सुमनः कोमलं क्लान्तिकृत्ते
पद्मेवासोऽप्यतिमृदुतनोः साहसेनेति सिद्धे।
आयासि त्वं न कथमधुना चित्रकूटाश्मचारात्
आयासित्वं तदिह कृपया सह्यतां साहसं मे ॥ **22.51** ॥ 952

नियतं नमांसि विदधीमहि ते
निगम प्रतीप मनसा महिते।
जगदम्ब जम्भरिपुणा महिते
मुनयो जपन्ति तव नाम हि ते ॥ **22.52** ॥ 953

भयानकमलालयन्नतिभयेन जिह्वामिमां
स्तवैर्न कमलालयं हुतभुगुष्णया तृष्णया।
भजेय कमलालयं त्वहमितः परं तन्महः
धुताधि कमलालयं नहि भजन्ति यत्संश्रिताः ॥ **22.53** ॥ 954

हयरूपधरो य आसमस्ते
श्रितलोकः कलयाऽमुना समस्ते।
जुषते धिषणाविकासमस्ते
दुरिते देवि भवद् दृशा समस्ते ॥ **22.54** ॥ 955

जननि तडित्प्रभवपुषे
प्रभवपुषे संपदां नमस्तुभ्यम्।
वशित वृषाचलविभवे
चलविभवे मा स्म मां प्रवर्तयथाः ॥ **22.55** ॥ 956

हृतसुखवारिजनिलयं
वारिजनिलयं रमाभिधं ज्योतिः।

हृदय सदा नम महितं
    नममहितं तदितरेषु पतनं ते ॥ **22.56** ॥ 957

प्रपदन भारत्यागो भारत्यागोन्मुखस्य मे सोढ्वा।
कमले रक्षसि कलितो रक्षसि कलितोग्र दुष्कृतेऽभयदा ॥ **22.57** ॥ 958

कृतहिंसारं भान्तं सारम्भान्तं रमे तवापाङ्गम्।
अर्थित रक्षोपाये रक्षोपाये पटो निधेहि मयि ॥ **22.58** ॥ 959

जनमनुकम्पारम्या कं पारम्याद्रमे न मोदयसि।
कृतहितयाचित्राणा या चित्राणां निधिस्त्वमखिलानाम् ॥ **22.59** ॥ 960

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे चित्रस्तबकः द्वाविंशः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ सङ्कीर्णस्तबकः त्रयोविंशः ॥

समस्तगुणविस्तार समावेशनिवेशनम्।
वन्देऽरविन्दनिलयं वरदं परदैवतम्॥ 23.1 ॥ 961

औदार्यशेवधिरनिन्दित कान्तिसिन्धुः
ओजः प्रसादनिधिरुज्ज्वलसौकुमार्या।
वैदर्भरीतिरिव वारिधिराजकन्ये
श्लाघापदं भवसि सारविदां कवीनाम्॥ 23.2 ॥ 962

आरम्भमेत्य महनीय ममोघयत्ना
प्राप्त्याशया श्रितपदा परमेप्सितस्य।
नित्यं फलं कलयसे नियताप्तिभाजा
नाथेन नाटककलापरिपाटिकेव॥ 23.3 ॥ 963

व्याप्त्या प्रसिद्धा श्रितपक्षपाता
बाधानभिज्ञा प्रतिपक्षशून्या।
समीहितं साधयसि ध्रुवं नः
सद्धेतुवद् दुग्धपयोधिकन्ये॥ 23.4 ॥ 964

प्रकृतिरुचिरमूर्तिः प्रत्ययानां विधात्री
समधिकगुणवृद्धिः साधुतामादधाना।
सृजति पदमजाद्यैरीप्सितां द्रागनन्त -
स्थिरफणितिविधेया शब्दविद्येव पद्मे॥ 23.5 ॥ 965

अधिकरण विचारारम्भसीदद्विपक्षं
    किमपि विशदयन्त्या कृत्स्नवेदार्थतत्त्वम्।
गलति गहनकर्मालम्बनं मोहजालं
    कमलमुखि भवत्या कर्ममीमांसयेव ॥ **23.6** ॥ 966

चतुराकृतिलक्षणाभिरामा
    परदेवस्य गुणान् प्रकाशयन्ती।
उपदर्शयसेऽपवर्गमार्गं
    मम शारीरकभारतीव मातः ॥ **23.7** ॥ 967

सुवर्णश्रीरम्यं शुभकरपदर्चं श्रुतिकुलं
    भवद्रूपं चेदं भवति महितं ब्राह्मणगणैः।
तयोरित्थं भेदः स्फुरति तटिनीजानितनये
    बुधेन्द्रैरध्येयं प्रथममितरद् ध्येयमिति च ॥ **23.8** ॥ 968

व्याकोचवारिजधरां द्विजराजसेव्याम्
    अव्याहताममृतशैवलिनीमिव त्वाम्।
निःसीम संसृतिनिदाघ विदाहतप्ताः
    केचित् सुधाब्धितनये कृतिनो भजन्ते ॥ **23.9** ॥ 969

वात्सल्यं तव राघवप्रणयिनि व्याचष्ट काकासुरः
    शक्तिं दुर्घटसाधनीं हनुमतः शीतस्स वालानलः।
औदार्यं त्वदपाङ्गलब्ध विभवोल्लासा महेन्द्रादयः
    कारुण्यं कृपणा वयं तु विगुणा निर्हेतुकं रक्षिताः ॥ **23.10** ॥ 970

दोषौघः शरणं जगाम गुणतामादित्सुरङ्गानि ते
    कौटिल्यं किमपि भ्रुवौ कठिनता कल्याणि वक्षोरुहौ।
दारिद्र्यं बत मध्यभागमधरं रागस्तमः कुन्तलान्
    चापल्यं दृशमम्ब मन्दगतिता पादौ च मौग्ध्यं मुखम् ॥ **23.11** ॥ 971

कृतस्त्वया देवि कृपाकटाक्ष -
लेशैरहं श्लोककृदर्भकोऽपि।
परं त्वहं श्लोककृदित्यभीक्ष्णं
कदा नु गायेयमिति प्रतीक्षे॥ **23.12**॥ 972

आगस्ततिं मे किमदृश्यविद्याम्
अध्यापयस्यब्धिसुते तथा त्वम्।
स विश्वतश्चक्षुरधोक्षजोऽपि
न पश्यति व्यक्ततमां यथैनाम्॥ **23.13**॥ 973

रक्षेति नाथसविधे तव गाढमुक्तिः
यद्युद्गता मम भवेत्तत एव मुक्तिः।
एतावति श्रितमनोरथपूरणेऽस्मिन्
कृष्णप्रिये ननु तथापि कियान् विचारः॥ **23.14**॥ 974

यद्युन्निनीषसि यदूद्वहवल्लभे मां
कर्माणि कारय तदा कलुषोज्झितानि।
नैर्घृण्यमेषि यदि वा न ततोऽपि दूये
नैराश्यमेव हि सुखं निगदन्ति सन्तः॥ **23.15**॥ 975

नैवापवर्गमति दुर्गममर्थयेऽहं
न स्वर्गमम्ब न ततोऽप्यपरं च सौख्यम्।
अभ्यर्थये हरिसखि त्वयि भक्तिमात्रम्
अत्रापि चिन्तयसि चेदथ किं करोमि॥ **23.16**॥ 976

मा कोपं कुरु मातरेकमधुना जल्पामि धृष्टो वचः
शक्तिः कर्तुमकर्तुमन्यथयितुं जागर्ति येयं त्वयि।
तल्लेशो मम चेदसेत्स्यदमृतं सर्वाननेष्यं क्षणात्
विद्मो नैवमुपेक्षसे घनकृपा कस्मात्त्वमस्मानिति॥ **23.17**॥ 977

सौन्दर्यस्य निधिर्मुदामुदयभूः संपत्तिमञ्जूषिका
कान्तीनां निलयः कलाजलनिधिः क्षान्तेर्निशान्तस्थली।
दाक्षिण्यस्य शरण्यसद्म कमले दातृत्वविश्रान्तिभूः
आस्थानी यशसां प्रपाऽसि सतृषामाद्यस्य पुंसो धनम्॥ **23.18**॥ 978

मोहोन्मूलनमूलिका भवजुषां मोक्षाध्व निश्रेणिका
चेतः शुद्धिविधानसिद्धगुलिका चिन्तातमश्चन्द्रिका।
विद्याविभ्रमशालिकाऽसि कमले विष्णोरुरोमालिका
मातस्त्वं मम पारिजातलतिका मोदाम्बुधेर्वीचिका॥ **23.19**॥ 979

विकासः पुण्यानामपि च विकचाम्भोरुहरुचां
विवर्तो हर्षाणां विततिरमृतानां परिणतिः।
विकारः कारुण्यामृत जलधिवीची परिषदां
विकल्पः कल्पद्रोर्जननि तव वीक्षा विजयते॥ **23.20**॥ 980

प्रज्ञालतानां किमुपघ्नयष्टिः
पनायतां कामगवी कवीनाम्।
प्रपञ्चमातस्त्वमकिञ्चनानां
प्राणप्रतिष्ठा परमाऽसि काष्ठा॥ **23.21**॥ 981

अस्मादृशामभ्युदयाङ्कुरो वा
नाथस्य पद्मे नयनोत्सवो वा।
दिव्यौषधं वा दुरितामयानां
पारं परं वा भवती भवाब्धेः॥ **23.22**॥ 982

ताटङ्करक्षां त्रिदशाङ्गनानां
तरङ्गिणीजानितपः फलं श्रीः।
दारिद्र्यविद्रावणमूलविद्यां
जगुर्जगन्नायकनायिकां त्वाम्॥ **23.23**॥ 983

परिष्कृतिं पङ्कजकाननानां
    परायणं नः शरणागतानाम्।
सन्तः शकुन्तध्वजसुन्दरि त्वां
    सर्वस्वमाहुः सकलागमानाम्॥ **23.24**॥ 984

परिकर्म विनिर्मलं मुरारेः
    प्रतियत्नं प्रतिबुद्धशेमुषीणाम्।
भवतीं भवतीक्ष्णयातनानां
    अभिचाराहुतिमाहुरब्धिकन्ये॥ **23.25**॥ 985

मुनिमानस राजहंसिका वा
    मुरभित्कल्पक मञ्जुमञ्जरी वा।
श्रुतिपञ्जरदिव्यशारिका वा
    जननि त्वं गुणरत्नपेटिका वा॥ **23.26**॥ 986

प्रतिसृष्टिरियं तडिल्लतानां
    परिणामो नु शिरीषमञ्जरीणाम्।
प्रतिभाति हृदि त्वदीयमूर्तिः
    परिवृत्तिर्हरिपत्नि काञ्चनानाम्॥ **23.27**॥ 987

प्रस्तावना भुवनपालन नाटकस्य
    प्राच्या दिशो धवलिमा भवकालरात्रेः।
दुर्गर्व सर्वरजनीचर धूमकेतुः
    दोषद्रुमस्य परशुस्तव देवि रूपम्॥ **23.28**॥ 988

आलानयष्टिरसि योगिमनोगजानाम्
    आशापिशाच परिमोचन यन्त्रविद्या।
कार्तान्तलोक गमन प्रतिरोधमुद्रा
    कारुण्यपुण्यतटिनी कमलालये त्वम्॥ **23.29**॥ 989

शरदं तमोघनानां
    शाश्वतसुखसम्पदामुपोद्घातम्।
शरणं व्रजामि कमले
    शौरिवशीकार मूलिकां भवतीम्॥ **23.30**॥ 990

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे सङ्कीर्णस्तबकः त्रयोविंशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ निर्वेदस्तबकः चतुर्विंशः ॥

शरणीकरणीयाङ्घ्रिं शश्वत्तापत्रयातुरैः।
सर्वनिर्वेदशमनीं समस्तजननीं नुमः ॥ **24.1** ॥ 991

अनुपासित तावकाङ्घ्रि पद्मा -
न्यपरामृष्ट परावरस्थितीनि।
जगदम्ब वृथैव जीर्यतो मे
समतीतानि हि जन्मनां शतानि ॥ **24.2** ॥ 992

अपवर्गकथापथातिगानाम्
अनुदासीनहृषीककिङ्कराणाम्।
दिवसा बहवो वृथैव याताः
तव सानन्दमुपासनं विना नः ॥ **24.3** ॥ 993

अवधीरित साधुसङ्गमानाम्
अपचारेषु च बद्धकङ्कणानाम्।
कथमन्यतमं कृपानिधे मां
कमले हन्त वृथा कृथाः खलानाम् ॥ **24.4** ॥ 994

स्मारं स्मारं मलिनविषयान् मानसं मेऽवसन्नं
चारं चारं प्रतिखलगृहं जातखेदौ च पादौ।
कारं कारं कुजनविनुतिं क्लेशिता हन्त जिह्वा
वारं वारं वरजलनिधे किं नु विज्ञापयेयम् ॥ **24.5** ॥ 995

विहितमखिलं त्यक्त्वा कृत्वा च गर्हितमन्वहं
तदुचितफलान्यत्रामुत्राप्यहो कलयन्नहम्।
गुणगणनिधे मृत्वा मृत्वा कियन्ति युगानि वा
मुरविजयिनो जाये जायेयमस्मि भयातुरः॥ **24.6**॥ 996

तृणत्याजं त्यक्त्वा त्रिजगति कलत्रादिविषयान्
प्रणत्या ते दिव्याः कति कति गतिं यान्ति कृतिनः।
अहं त्वेवं तावद्विषयविषयन्त्रेषु पतितः
विषीदन् संसारे विपदवसरे रोदिमि रमे॥ **24.7**॥ 997

जननि महति वंशे जन्म लब्धं ततः किं
विशदमधिगते वा वेदशास्त्रे ततः किम्।
सदसि कथकदर्पः सादितो वा ततः किं
भवजलधितरिस्त्वं भाविता चेन्न चित्ते॥ **24.8**॥ 998

अटित्वा दुर्देशान् सदसि च नटित्वा क्षितिभुजां
पठित्वा दीनोक्तीरपि फलमलब्ध्वाऽतिचपलः।
अपारैर्व्यापारैरलसतनुराराधनमहो
भवत्या हित्वाऽहं बलवदवसीदामि कमले॥ **24.9**॥ 999

निरन्तरमरुन्तुदैर्निरयवेदनापादनाद्
दुरासदधराभुजामलमपावनैः सेवनैः।
रमे ननु रमेत मे दुरितमोचके मेचके
घनस्तनि मनस्त्वया घटितनर्मणि ब्रह्मणि॥ **24.10**॥ 1000

जनित हृदवसादं शुष्कनिर्वेदवादं
जननि जहदपार्थं शश्वदालम्ब्य धैर्यम्।
शरणमिह भजेयं संश्रितान्यैरजेयं
दनुजभिदमुदारं तं भवत्या सदारम्॥ **24.11**॥ 1001

निर्विण्णमब्धिकन्ये
　　निरीक्ष्य मां शीतलैरपाङ्गलवैः।
अभिषिञ्चसि बलिवञ्चक
　　चरणद्वय शरण वरणसाम्राज्ये॥ **24.12** ॥ 1002

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे निर्वेदस्तबकः चतुर्विंशः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ शरणागतिस्तबकः पञ्चविंशः ॥

दुग्धां दुग्धाम्बुधेः पुत्रि दुरितापहरा मम।
शार्ङ्गिणश्चरणाम्भोज शरणागति संपदम्॥ 25.1॥ 1003

धावन्तमुच्चतरदुर्विषयाटवीषु
सारङ्गशाबमिव शश्वदपाङ्गजालैः।
मामच्युतस्य महिषि प्रसभं गृहीत्वा
नित्यं विधेहि युवयोरनुकूलवृत्तिम्॥ 25.2॥ 1004

मातर्हिताहितविवेक विहीनमेनं
मन्दं मुकुन्दवरवर्णिनि मां जघन्यात्।
मार्गान्निवर्तयितुमर्हसि मङ्क्षु माता
कूपे निपित्सुमपि डिम्भमुपेक्षते किम्॥ 25.3॥ 1005

विश्वस्य धात्रि भवती परिपास्यतीति
विश्वस्य सम्यगभयं तु वयं चरामः।
निःश्रेयसं गमय वा निरयं नयेर्वा
कीर्तिं लभस्व यदि वा महतीमकीर्तिम्॥ 25.4॥ 1006

उच्चैरकृत्रिमगिरो यदि नाब्धिघोषाः
उन्मादिनां फणितयः स्मृतयश्च नो चेत्।
नारायणप्रणयिनीं नमतो मम त्वां
नैःश्रेयसी न भविता कथमम्ब संपत्॥ 25.5॥ 1007

गीतोपदेशगुरुपत्नि कृतागसो मे
गोप्त्री त्वमेव भवताद्भवतापभाजः।
आत्मावनेऽप्यकुशलैरपरैः सुरैः किं
बद्धः स्वयं किमु विमोचयिता बतान्यम्॥ **25.6** ॥ 1008

कर्माहृतिर्मतिरुपास्तिरिति प्रतीतैः
मुक्तो मुरान्तक विलासिनि मुक्त्युपायैः।
अस्मादृशस्तव जगत्यनुकम्पनीयः
नानापराधनिधिरम्ब न लभ्यतेऽन्यः॥ **25.7** ॥ 1009

पापोत्थकोप कलुषीकृतनाथचेतः
पाथः प्रसादनविधौ कतकायितोक्तिम्।
योऽहं भवामि स भवन् यदुनाथयोषे
तां त्वामनन्यशरणः शरणं प्रपद्ये॥ **25.8** ॥ 1010

निरतिशय विभूतेः देवि निष्किञ्चनोऽहं
भवदवपरितप्तो भास्वरानन्दमूर्ते।
त्वदुपजनितबोधस्त्वज्जुषः कैटभारेः
चरणनलिनयोर्मां तत्स्वमेवार्पयामि॥ **25.9** ॥ 1011

महति भवती मामार्याणां कुले समजीजनत्
भवपथपरिश्रान्तच्छायातरूननयद् गुरून्।
शरणवरणं साङ्गं शौरावचीकरदिन्दिरे
किमिह बहुना संपूर्णो मे चिरेण मनोरथः॥ **25.10** ॥ 1012

हृद्यं पद्यसहस्रमेतदनघं संशृण्वतः कम्पतां
मोदेनादिमशाब्दिकस्य फणिनो मूर्ध्नां सहस्रं मुहुः।
तत्कालोचित चारुमारुतधुतत्वत्केलिगाढश्रमं
प्रत्नं संप्रति मे प्रसीदतु रमे पक्षीन्द्रवाहं महः॥ **25.11** ॥ 1013

येयं नाद्रियते कृतिः कतिपयैरीर्ष्यागृहीतैर्जनैः
चित्रं सैव विपश्चितामकलुषे चित्ते विधत्ते मुदम्।
विश्वस्याम्ब मनो दुनोति दयिताविश्लेषिणां या नृणां
नो किं कोकिलकाकली भवति सा तोषाय योषाजुषाम्॥ **25.12** ॥ 1014

बहुस्तबकभासुरस्तव नवस्स्तवस्स्वस्तरुः
प्रशस्त विबुधस्तुतस्त्रियुगनायिके वस्तुतः।
समस्तमपि वाञ्छितं वितनुते सदानन्दन -
स्थितिः सुरभिलैः रसैरपि दिशो दशामोदयन्॥ **25.13** ॥ 1015

श्लोकाः श्लाघावसरतरलीभूतवेधःपुरन्ध्री -
चूडागुच्छप्रसृमरमधुस्रोतसा जातसाम्यः।
विश्वाम्ब त्वद्गुणपरिचये वीततन्द्रान् सुधीन्द्रान्
प्रीणन्त्येते मम परमनोभैरवा धीरवादाः॥ **25.14** ॥ 1016

अम्ब त्वद्गुणलेशपेशलमिदं डिम्भस्य मे जल्पितं
साकं लोकपतिस्त्वया निशमयन्नाकं विधातुः पदम्।
मोक्षं चाननुरूपमेव गणयन् मोदाद् महौदार्यवान्
मन्ये सम्प्रति पारितोषिकमसावन्वेषतेऽयं हरिः॥ **25.15** ॥ 1017

समस्त गुणशेवधेरमृतकल्पसूक्तेस्तव
स्तवस्य परिशीलनात् फलमुपैति यः प्रार्थितम्।
लभेत यदि वेतनं सुरभिदुग्धदोहाज्जनः
स कामपुपमीयते जननि तेन नैवेतरः॥ **25.16** ॥ 1018

सानन्दं ये सरसमनसः स्वादु लक्ष्मीसहस्रं
जेगीयन्ते जगति जनितश्रीनिवासप्रसादम्।
शान्तत्रासां विततिममितां शर्मणां निर्मिमाणा
तेषामेषा विहरतितरामिन्दिरा मन्दिरेषु॥ **25.17** ॥ 1019

पौत्रेणात्रेयगोत्राभरणनयचण श्रीनिवासाध्वरीन्दोः
श्रीमद्रामाङ्घ्रिभक्तिप्रमुदित रघुनाथार्ययज्वात्मजेन।
वेदान्ताचार्यपादाम्बुजनिहितहृदा वेङ्कटार्येण क्लृप्तं
रम्यं लक्ष्मीसहस्रं पठत दृढतरं नित्यकल्याणकामाः॥ **25.18** ॥ 1020

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे शरणागतिस्तबकः पञ्चविंशः॥